तत्वार्थटीका ॥र्दणगोनमःसिद्धेभ्यः॥ ॥वीरंप्रणम्यसर्वज्ञंतत्वार्थस्यविधीयते॥टीकासंक्षेपतः स्पष्टामंदबुद्धिविबोधिनी॥१॥सम्य
१ ग्दर्शनप्रवचनमधिगम्यकालसंहननश्रद्धायुरादेः।परिहाणिमवलोक्यसत्वानुकंपयासमासतोमोक्षमार्गमुपदेष्टुकाम
आचार्यइदमाह।सम्यग्दर्शनशुद्धं।योज्ञानंविरतिमेवचाप्नोति।अत्रसम्यग्दर्शनशुद्धमितिकृतरोविग्रहआस्थीयते।यदितावत्स
म्यग्दर्शनेनशुद्धमितिकरोति।करणेतृतीया।परश्वादीनामिवप्राङ्निर्वृत्तिर्वक्तव्या।उतकर्त्तरितदादर्शनज्ञानयोरभेदादात्मनो
यआप्नोतीत्ययुक्तं।अथसम्यग्दर्शनायेतितादर्थ्येचतुर्थीदार्विवयूपायप्रागेवदर्शनाशुद्धंज्ञानमवाप्तज्ञानस्यचकेवलिनइवकिं
दर्शनेन।उतसम्यग्दर्शनाद्धेतोःपंचमी।स्वयंसंबुद्धादिषुविरुध्यते।तेषांहि झगित्येवज्ञानंनहेतुक्रममपेक्षते।अथसम्यग्दर्श
नेशुद्धमितिनिमित्तसप्तमी।चतुर्थपक्षोक्तदोषः।तस्माद्धक्त्योत्रसमाधिर्यथेच्छसितथास्तु।ननूक्तंदोषभूयस्त्वं।नैतेदोषाः।करणे
तावद्वक्ष्यमाणनिर्देशितनिसर्गादधिगमाद्वेतिकर्तर्यपितएवाप्नोतीति।युक्तमात्माहिसम्यग्दर्शनीसलिलमिवस्वच्छतामनंतांज्ञा
नावरणमाप्नोतीतिवक्ष्यते।अवश्यंचयइतिकर्तुर्निर्देशःकर्तव्यः सत्कषायैरात्मानंशोधयतीति।चतुर्थ्यामप्यधिगमाभिप्रायः
नैसर्गिकादवाप्तश्रद्धोध्ययनादिभिराधिगमिकमाप्नोति।तदर्थमिति।शुद्धिकारणंतुशुद्धमध्ययनादिकालेपंचम्यामपिस्व
यंसंबुद्धादिषुनिसर्गसम्यग्दर्शनहेतुकमेवनद्वक्ष्यतिह्यपरोपदेशोनिसर्गइतितेषांहिपरोपदेशमंतरेणक्षयोपशमादि
लब्धिभ्यः।समीहमानानामुत्तरकालेप्रागिवद्रागुत्पद्यतेज्ञानं।सप्तम्यामपिसत्सप्तमीसतिहिसम्यग्दर्शनेशुद्धंज्ञानमन्य
थासर्वमशुद्धप्रसंगइति।अधिकरणेवा।यथाग्राकरेशुद्धानिभांडानीतिएवमन्येषामाक्षेपपरिहारमार्गाः।संतिप्रसंगभयान्नु
नाद्रियंते।तृतीयापक्षःपुनरत्रज्यायान्।सम्यग्दर्शनेनशुद्धमितिकर्तृकरणेकृतेतिसमासः।तत्पूर्वकमित्यर्थः।दर्शनमूलत्वा
च्चश्रेयसस्तेनशुद्धमित्युच्यते।उक्तश्चायमर्थः।प्रवचनेभ्रष्टेनापिचारित्राद्दर्शनमिहदृढतरंगृहीतव्यं।सिध्यंतिचरणरहिताद १
र्शनरहितानसिध्यंतीति।नचश्रुतमधीयानस्याध्ययनादिभ्योधिगमसम्यग्दर्शनावाप्तिरितिकृत्वाऽज्ञानशुद्धंदर्शनमाशंकि
तव्यं।प्राग्दर्शनादज्ञानमेव।तदुक्तंचप्रवचने।द्वादशांगमपिश्रुतंविदर्शनस्यमिथ्येति।नचाशुद्धाशयेभेषजमिवश्रुतमात्म

लाभंलभते।एतेनाशयाशुद्धौतस्यैवसम्यक्त्वेनविपरिणामोजायतइतिव्याख्यातमेव।श्रुतमेवाशयशोधनमितिचेत्राभव्याना
मध्ययनादिक्रियासंभवेपिदर्शनासंभवात्।वक्ष्यतिहिसम्यग्दर्शनपरिगृहीतंमत्यादिज्ञानंभवत्यन्यथात्वज्ञानमेवेति।भव
तिचान्यथापिपदार्थाध्ययनमात्रं।नतुरुचिविरहेप्यदर्शनमवश्यंभागाशयविशुद्धिरेष्टव्या।यइतिजन्मवतःकर्तुरुद्देशःज्ञानं
पंचप्रकारंवक्ष्यमाणं।तत्राद्यंतमव्यभिचारित्वादिष्यते।तस्यविशेषणंउत्तरंतुद्वयंशुद्धत्वादेवत।देवरक्ताहिकिंशकाःविर
मणंविरतिर्निवृत्तंसंयमश्चारित्रमित्यर्थः।सापिसम्यक्प्रवेविवेकेचपंचतयीवक्ष्यते।अत्रकिंसम्यग्दर्शनशुद्धाविरतिरिष्यते।उतज्ञान
शुद्धा।उभयथाप्यदोषः करणकारणत्वेनदर्शनशुद्धाकारणत्वेनज्ञानशुद्धावक्ष्यतिहि।विरतिर्नामज्ञात्वाभ्युपेत्याकरणमिति।इ
त्थंचेयंविरतिर्यदुतदर्शनज्ञानशुद्धाशयस्वामिनी।इतरथातुमार्जारसंयमकल्पास्यादेतच्चसच्चरित्रमधिकृत्यवक्ष्य त्युत्तरलाभे
तुनियतंपूर्वलाभइति।तस्मात्रितयमप्येतत्सम्यक्पूर्वकं श्रेयसायकल्प्यतइति।साधूपदेशः।एवकारोवधारणेदर्शनज्ञानवि
रतयएवजन्मतःसफलश्रुत्वेकारणंनोतमधिकमप्यतोनास्त्येवेति।एकतमतुजन्माऽन्यजन्मापेक्षयासफलश्रुमिवसफलश्रुं।वक्ष्य
ति।चैषांमोक्षहेतुत्वं।तच्चावधारयति।"अयमेवैतत्।नोतमधिकंवामोक्षायेति।तच्चसप्रयोजनंसूत्रेभिधास्यते।चशब्दोज्ञान
मितिभिन्नवाक्यत्वाद्विरतिंचेतिसंबंधाय एकैकस्यवानिर्जराहेतोःप्राप्तौजन्मसफलश्रुमितिविकल्पार्थः।तच्चसफलश्रुमिवेत्यक्तं
आप्नोतीत्यघस्थितंस्वतंत्रकर्तारंदर्शयतिदर्शनादित्रयमाप्नोतिलभतेधिगच्छतीत्यर्थः।दुःखनिमित्तमपीदंतेनसफलश्रुंभव
तिजन्मदुःखयतीतिदुःखपरितापयतीत्यर्थः।तच्चशारीरंमानसंचवक्ष्यमाणंद्वेद्व भूयिष्ठत्वात्।संसारोवादुःखनिमित्तंहेतुः
प्रसूतिराधारः।दुःखानांनिमित्तं।दुःखंवास्यनिमित्तं।तत्रदुःखानांनिमित्तमितिजन्मनिसतिशरीरमनसीतद्भवंचदुःखं अतएवोक्त
मन्यत्रापि।नह्यशरीरंप्रतर्पत्कपद्रयाइति।उत्तरेषामपिनिमित्तंजन्मतदाधुरिवतः।सतूपप्लुतचेताः क्लीबोसम्यक्विषहमाणः
संसारस्वभावमजानत्।वद्वित्वप्रतीकारानभीप्स्यन्नशुभमारभतेततः।कर्मपाशाचपाशितःपुनरपिदुःखभागीभवति।संसार
पक्षेपिदुःखस्यसंसारस्यनिमित्तं।मूढोल्पैकजन्मनिबहूनिजन्मांतरबीजान्युपचिनोति एतेनदुःखंवास्यनिमित्तमितिस्थितं

अपिशब्दोदुःखानांदुःखस्यवानिमित्तमित्यस्मिन्पक्षे।अपिनदुःखनिमित्तमितिविकल्पयति।कथंषट्पुरुषप्रकृतीर्वक्ष्यति॥ ॥
तत्रयदासंसारोदुःखंतदाधचतुष्टयस्यमूढत्वात्तन्निबंधनमुत्तरयोस्तु अवाप्तदर्शनादित्रयं।कयोरेतदेवपरमार्थसाधनं
चरमंबेति।नदुःखनिमित्तं।यदितुशारीरादिदुःखपक्षोदुःखंवास्यनिमित्तमित्ययंवान्योर्थस्तदासर्वेषामेवजन्मवतां
वि दुःखनिमित्तमित्ययंकल्पः।इदमिति।जन्मबहुत्वेपिमानुषंजन्मप्रत्यक्षंप्रदर्शयति।नह्यन्यत्रविरतिलाभोस्ति।कथंनैकेर
षुतावद्भूयसादुःखेनाजन्ममनुनपूर्देहमनसामशरणानामत्यंतोपहतसंक्लिष्टपरिणामानांहितश्रवणमपिनास्ति।
कुतस्तदुपदेशकारणंनिरश्वामप्यत्यंतमूढमनसामकरुणपराधीनाशरणजीवितानांसर्वाभिभूतजन्मनांनामाभियो
ग्यादिदुःषानुषरदेहमनसांहितोपदेशश्रवणश्रद्धाविरतिःकुतः।तथादेवानामपिप्रकृष्टाचाप्तविषयकषायस्कखलवाक्या
दापहतचेतसा।मनुवाप्तहितश्रवणाताकेषांचिच्चकथंचिद्दिनश्रावणसंभवेप्यवश्यभोग्यकर्माधानत्वात्।अकर्मभू
मित्वाच्चविरत्यभावएव।मानुष्येपिदेवकुर्वाद्यकर्मभूमिषुभोगपरत्वाकर्मभूमिषुचोत्साबसायिम्लेच्छादिष्वत्यंतनिर्घृण
त्वात्।आर्येष्वपिचोपदेशकश्रद्धाद्यभावात्।कुतोविरतिःविकलंचेदंनिकसाधनमित्यतःसर्वापवादशुद्धंत्रितयलाभोपा
यक्षममिदमित्याचार्यःस्वजन्मनिदर्शनेनप्रत्यक्षमाह।तेनेतियन्नदोर्नित्य।संबंधाद्यच्छब्दोदृष्टमेवकर्तारंनिर्दिशति।लब्ध
मनिद्यंश्लाघ्यत्वात्।यतिहिसंसारेवश्यंभाविजन्मतच्चदर्शनादित्रयसहितत्वात्।क्षमासाधनंयदिभवति।ततःस्तत्लब्धम
न्यथाहिक्षुद्रजंतूनामिवमरणायैवेति।दर्शयतिभवतीतिस्फुटार्थाजायतेस्मिन्नितिजन्म।तच्चमानुषमित्युक्तं अथवाभ
वतिजन्मेतिसंसारास्तित्वंदर्शयति।आत्माहिस्वकृतकर्मसंतानानुस्यूतः।सन्।धावतिभवाद्भवांतरं।तस्यपर्यटतो
भवतिजन्मएतेनैकांतनित्यादीनांसंसाराभावात्सर्वाप्रक्रियादुरुपपादाइतिव्याख्यानं।पुनश्चवक्ष्यतिविस्तरेणशास्त्र
कर्माधिकारः एव॥१॥एवंसतिसंसारोस्तीतिज्ञापंतेतस्यानादित्वख्यापनार्थमाह।जन्मोक्तंवक्ष्यमाणलक्षणंक्रियतइतिकर्मज्ञानाव २
रणाद्यष्टधावक्ष्यते।क्लिश्नंतिक्लेशयंतिवास्वामिनंक्लिश्यतेचैभिरितिक्लेशाः।तेपिमोहनीयभेदाःक्रोधादयःकषायाव

क्ष्यंते।अनुबद्धेसंततेवेष्टिते।कथंसतिहिजन्मनिकायवाङ्मनोहेतुकंकर्मभवतीत्युक्तं।ततःप्रवृद्धकर्माशयस्योदयिक
भावानुवर्तिनोऽघावशस्यसंसारहेतवःक्रोधलोभादयोनेकजन्मांतरक्लेशनायक्लेशाआविर्भवंति।ततोरागद्वेषादिहे
तुकंतीव्रंकर्मानुबद्धंपुनरपिजन्मनिसतिकर्मभवति।कर्मभ्यःक्लेशाःक्लेशेभ्यःपुनरपिजन्मेत्येवमनुबद्धमित्युच्यते।एतेन
संसारस्यानादित्वंदुःखभूयस्त्वंचव्याख्यातं।अत्रचसत्यप्यनादित्वेपरस्परहेतुत्वेचत्रयाणांजन्मानुबद्धमित्युक्तं।प्रत्यक्ष
त्वादाधारत्वात्पूर्वोक्तत्वाच्च।एवंचकृत्वाअन्यत्राव्यक्तंविविधबाधनयोगाद्दुःखमेवजन्मोत्पत्तिरिति।अस्मिन्निति।तदेव
मानुषंजन्माम्रेडयति।प्रत्यक्षमेवक्लेशानुबद्धंदृश्यतइति।केषांचिद्देवजन्मनएवोत्तरोपपत्तिप्रतिलंभः। ...द्दाशेका न
निषेधायचास्मिन्नित्याह।दूरगानामपिपुनरागत्यास्मिन्नेवकर्मभूमित्वात्प्रयत्नपूर्वकः।कर्मक्लेशाभावइति।तथाप्रयति
तव्यं।तथेतिप्रकारार्थेतेनप्रकारेणदर्शनादित्रयलाभोपायपूर्वकमित्यर्थः।प्रयतितव्यंप्रघटितव्यंसर्वजन्मिनामा
त्मनाकर्मक्लेशसंततत्वं।अथगम्यसंसारोद्विग्नेनविरागमार्गानुवर्तिनाप्रकर्षेणसर्वात्मनातपःसंयमादिषुवर्तितव्यमि
त्यर्थः आद्यर्थेवाप्रशब्दःसम्यग्दर्शनादिलाभानंतरमादावेवयतितव्यं।नपुनर्विश्वसितव्यंपापाहिकर्मक्लेशाःप्ररूढाः
संतःपुनरपिदर्शनादिप्रतिपातयंतीति।नचेयंस्वमनीषिकावक्ष्यतितदाचार्यः।शास्त्रेअनंतानुबंध्युदयात्पूर्वोत्पन्नमपिसम्य
ग्दर्शनंप्रतिपततीति।किमर्थंप्रयतितव्यमित्याह।कर्मक्लेशाभावोयथाभवतिकर्मणांक्लेशानांचअभावः।क्षयस्तैर्वियोगइत्यर्थः
कथंचसभवति।शंकाद्यतीचारवियुक्ताप्रदर्शनाद्धिशुद्धाशयस्त्रिभुवनमप्यपहितमोहमहेंधनज्वलितकर्मदहनक्वाथ्य च्च
मानमशरणममरुज्ञानागमचक्षुषावलोक्यगर्भवासादिभयोद्विग्न प्राणातिपातादिविरतिप्रतिज्ञामारुह्यतद्दृढीकरणार्थं
चपंचविंशतिभावनाभावितांतरात्माद्वादशानुप्रेक्षास्थिरीकृताध्यवसायःसंवृतास्रवत्वादनभिनवकर्मागमतयः॥संयमा
दिभिश्चपूर्वोपात्तक्षयशुद्धाशयोमोहादिमलप्रक्षयादवाप्तकेवलपरमैश्वर्यःफलंबंधनशेषचतुःप्रकृतिक्षयेकर्मक्लेशाभा
वाक्स्तामाप्नोतीति।पुनरपिविस्तरतःशास्त्रेवक्ष्यामः।अत्रचजन्मकर्मक्लेशत्रयाभावेप्यभाष्टेकर्मक्लेशाभावइत्युक्तंते

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

६अ

वश्यंजन्मकारणंजन्मत्वत्तत्कारणमपीत्युपदिष्टं।अतस्तदभावेप्रागेवजन्माभावइत्यभिप्रायः।क्लेशानांचकर्माभवत्वेपिपृ
थग्ग्रहणंप्राधान्यार्थमेतद्भावाभावेहिबंधमोक्षौवश्येनेसकषायत्वाज्जीवः कर्मणोयोग्यान्पुद्गलानादत्तेसबंधः।मोहा
दिक्षयात्केवलंततश्चमोक्षइति।एवंतर्हिकर्मग्रहणंमाभूत्।नैषदोषःकर्मव्यवहारएवनप्रवर्तते।प्रधानाहिकर्मसंज्ञावक्ष्य
माणातदेकदेशाश्चक्लेशाइतिज्ञापितंभवति।एषपरमार्थः।एषइतिवक्ष्यमाणविस्तरमपिसमासेनावधार्यप्रदर्शयति।ब
हुविचित्रग्रंथोपहितोप्येताबानेवैषपरमार्थोयदुतकर्मक्लेशाभावोनोऊनोभ्यधिकोन्योवेति।परमउत्कृष्टोज्यायानर्थःप्र
योजनंफलंपरमार्थः।अत्यंतशब्दत्वात्पूज्यमानोवार्थः।दर्शनादिलाभफलंमोक्षइत्यर्थः।।२।।यदिपुनरेकभवेनपरमार्थः
शक्यतेवगंतुंनचक्लेशप्रहाणंततःकउपायइत्याह।परमार्थालाभेवा।परमार्थउक्तवक्ष्यमाणनिर्वचनःतंयदाकालसंहन
नपरिहाणंर्नलभते।तदादोषेषुदूषयंत्याशयमितिदोषाः।कषायाः।तेषामेवगौणपर्यायाज्ञानार्थंप्रयोजनार्थंचदोषाइत्याहः
आरंभकस्वभावेषुआरंभयतीत्यारंभकःअशुभेप्रवर्त्तयतीत्यर्थः।आरंभकःस्वभावोयेषांतइमेआरंभकस्वभावाः।नह्यदुष्टा
शयोशुभेप्रवर्त्ततेइतिप्रतीतंक्लेशास्तुअप्रवर्त्तमानमपिप्रवर्तयंतीति।एवंसंख्या९व्यापाराणांविशेषसंज्ञागौणीदोषाइ
ति।दोषेष्वितिसत्सप्तमीआरंभकस्वभावेषुसत्सुकिंकर्तव्यं।तथाप्रवर्तितव्यमितिवर्त्ततेयथाकिंभवतीत्याह।कुशलानुबंधं
एवेत्यादिकुशलंक्षेममप्रत्यपायमिवमित्यर्थःतच्चकुशलकारणत्वात्तन्नबध्नाति।तस्मिंत्वानुबंधोस्येतिकुशलानुबंधं।कुशलप्रयो
जनमित्यर्थः।एवोवधारणेकुशलानुबंधमेवनाकुशलानुबंधंनवाकुशलाकुशलानुबंधंस्यादित्यधीष्टे।लिङ्गाव्यमर्धाच्छ
ति।कुशलंमेस्यादिति।किंतत्कुशलानुबंधमितिवक्ष्यमाणमपिसमासेनाह।अनवद्यंनावद्यमनवद्यमगर्हितंकर्मकुशला
नुबंधंभवतीत्यर्थः।यथेतियथापेक्षस्तथाप्रवर्तितव्यं।यथाकुशलानुबंधंकर्मभवति।कर्मेतिविशेष्यंतच्चव्याख्यातं।।३।। ॥
उक्तमपिशास्त्रविकल्पेषट्पुरुषप्रकृतयइति।कापुनस्ताइत्येताःअधमाधमः।अधमः।विमध्यमः।मध्यमः।उत्तमः।उत्तमोत्त ३
मः।इत्यासामाचार्योनिरूपणार्थमाह।कर्माहितमित्यादिअथवाकिमन्यदपिकर्मास्ति।यतोविशेष्यते।कुशलानुबंधमिति

७अ मित्याह।चतुर्विधंकथमिति।षट्पुरुषास्तेषामाद्यत्रयस्याकुशलानुबंधंचतुर्थस्यकुशलाकुशलानुबंधं।पंचमस्यकुशलानुबंध
...षष्टस्यनिरनुबंधमित्येषांस्वामिविकल्पमाह।कर्माहितमित्यादि कर्माहितमिहचामुत्रचाधमतमोनरःसमारभते।अहित
मकुशलमित्यर्थः।कथंहितंइहचामुत्रच इहलोकपरलोकयोः।इहचेत्येवार्थेचशब्दः।आस्तांतावत्परलोकेइहैवतावदिदंजिजी
विषुभिरिवविषपानमारभ्यमाणमहितायेति।उत्तरःसमुच्चयेइहवामुत्रचेति।अधमतमोजघन्यतमःपापिष्ठः।नरोमनुष्य
त्रयाणामपिसंभवेव्यवहारप्रधानत्वादारंभसमर्थत्वाच्चप्रायःपुरुषनिर्देशःसमारभतेसमेकीभावेक्रियायोगाभिविध्योरा
ङ्सर्वण्येतत्करणोद्यहितमारभते।संरंभसमारंभारंभावरुद्धाश्चवक्ष्यति।नासामाद्यद्वितीययोस्तावदयमहितानुबंधी।किं
पुनस्तृतीयस्यामितिदर्शयतिनिदर्शनंत्वस्यमार्गिकमत्स्यबंधादयः।तेहिसर्वकुत्सितवृत्तयोत्यावसायिनोविशिष्टजनधि
कृतजन्मानोरूक्षस्फुटितविकृतशरीराः।कृच्छ्रेणापिजिजीविषवःसलिलारण्यपर्वतादिषुपरोपघातायपर्यटंतः।क्षुत्पिपा
साशीतोष्णवर्षवातदंशादिसन्निपातदुःखप्रत्ययायमिहैवानुवंत्यायुर्भोगान्तेनरंवाकुशलकर्मप्रेरितानरकेपूत्कटदुःख
८अ भाविनोभवंतीत्येवंतूभयलोकाहितानुबंधाधमः।इहफलमेवत्वधमः।इहफलमस्येति।इहफलंकर्म।एवोवधारणे।इहफ
लमेवचकर्म नोर्ध्वमिति।तुशब्दोविशेषोपप्रदर्शननिवृत्त्योः ननुदिहफलमेवाधमस्त्वेवमुपात्तबुद्धिःसनसमारभतइति।परलो
कमनोरथंनिर्वर्त्यविशेष्योपप्रदर्शयति।अधमेजघन्यःपापःनिदर्शनंपरलोकपवादिप्रसक्तयः।तेहिकृच्छ्राप्तविषया
भिषानुषक्तचेतसोमोहपटलाकुलांतरात्मनोभोगलवत्यागासहिष्णवोनिबज्जाअपलापित्वादेकाकिनोमाभूष्यति।कुस्ति
नाइतिवसहायान्।जिघृक्षवक्रः।पुनःपरलोकादागतोमृष्टप्रवादोयमेतावदेवेदृमिंद्रियगोचरोनर्वर्निवस्तुतोर्ध्वमित्येव
मादिभिर्बालिशजनविप्रलंभनोपायैः।परलोकमपोह्यैवैहलौकिकेषुपूर्वेभ्योन्यूनेषुकर्मसुप्रवर्त्तंते।विमध्यम
स्तूभयफलार्थंअप्राप्तोमध्यमाव...विमध्यमः।उभयस्मिन्फलंउभयफलंतदस्यार्थोनिबंधनमित्युभयफलार्थं
कर्मउभयफलायवाउभयपदार्थंकर्मसमारभतेइतिकरोति।कथमुभयत्रापिफलंभुंजीयेति।तुशब्दोविवेचयति

निदर्शनंमहाभोगिकृषीवलवणिगादयः।तेहिपुत्रदाराद्यवियोगमिच्छंतः।पूर्वोपात्तविषयापरित्यागेनशेषोपार्जनपरानिस
र्गमद्रमनसोर्थिजनमनः।प्रीणनकृतप्रयत्नाःपरलोकफलार्थिनःप्रसिद्धपुण्यद्वारेषुयथाशक्तिस्वमुपयुंजात।तदेतत्त्रि
विधस्वामिकमपिकर्मसंसारबीजोपचयात्सामान्यतोकुशलानुबंधमित्युच्यते॥४॥इदानींकुशलाकुशलानुबंधस्वामी
परलोकेत्यादि।परलोकजन्मनःपरलोकजन्मनेवाहितंपरलोकहितं।तदर्थंपरलोकहितायइहलोकाप्रतिबंधंपरलोके
कार्पितमनस्त्वंचैवकारोवधारयति।प्रवर्ततेप्रयत्नतेसमारभतइतिवर्तमानेपिकर्तृनिर्देशेपुनग्रहणं।सहिद्वितीयाव
स्थाप्राप्तः।सर्वार्पितकरणोपकरणइत्युक्तमस्यतुनिरपेक्षस्यावस्थाकृतसामान्यतप्रवर्ततइतिव्यपदेशाइत्ययंविशेषः
पूर्वोक्तरावस्थामध्येभवोमध्यमःक्रियासुसदाअयंक्रियाशब्दोस्तिभाववचनः।कदास्यक्रियाअस्तिस्पंदनेनिःक्रियमाका
शं।अस्तिचिकित्सते।चतुष्पदीक्रियाअस्तिन्याय्येक्रियावान्ब्राम्हणः।इहन्याय्यवचनःन्याय्येषुप्रवर्त्ततइत्यर्थः।तत्त्वन्या
य्यमिव।सदासर्वकालं।यथास्थीयेतिदर्शनं।तापसादयः।तेहिग्रामगृहवासभोगान्परित्यज्यवनवासाभिरतयः।परलोका
र्थिनः।शीर्णपर्णमूलकंदफलाद्याहारीअभिषेचनहवनादिषुक्रियासुप्रवर्त्तंते।एतदपिपूर्वोक्तरोत्कृष्टहीनत्वान्मिश्रानुबं
धमित्युच्यते।कुशलानुबंधस्वामीमोक्षार्थेवतुघटतेविशिष्टमतिरुत्तमः।पुरुषःमोक्षोशेषकर्मवियोगलक्षणोवक्ष्य
ति।तदर्थंमोक्षायसंसारभोगेष्वेकान्तनिस्पृहत्वमेवकारोवधारयति।निर्वृत्तिविशेषणयोःतुशब्दः।चतुःस्वामिकमवे
तद्वयानुबंधंकर्मनिवर्तयति।दर्शनमात्रलाभेपिमोक्षायैवतुघटतइतिविशेषयत्यतएवोक्तंपरमार्थलाभेपिकुशलानु
प्र बंधायानवद्यकर्मणेपतितव्यमिति।वर्त्तनइतिव्यावृत्तत्वाद्विशेषान्तरंच्च घटतइत्युक्तं।दर्शनमात्रमपिलब्धावाप्तपरमार्थ
बीजोहमवश्यमनुक्रमागोधिगमिष्यामिक्षेममितिज्ञानैरपिघटतइतिविशेष।चतुष्पुरुषीतोविशिष्टामतिरस्येतिविशि
ष्टमतिःउत्तमः।प्रधानोविद्वान्नरइतिवर्त्तमानेपिपुरुषग्रहणात्पूर्वोरेकांतभेदविशेषमाह।पुण्यत्वंचास्यदर्शयति।या ४
वदयंनमुच्यतेतावन्मामोविशिष्टपुरुषवेदादिपुण्यराशिभागीवक्ष्यति।पुरुषवेदादयः।पुण्यमितिनिदर्शनंयतिश्रा

वकादयःतेहिदर्शनादिलाभानंतरमेवोदधिसलिलांतर्वर्त्तितइवनौलाभपरितुष्टापरिचितव्यालाकुलभीमगुहानुशायिनइ
वावश्यंभाविभयंसंसारेनुपश्यंतः।सर्वथाशक्तितोयाप्राणातिपातादिविरताः।संसारभोगलवनिरभिवांछायतंतेयदपि
कलमकेदारावसेकप्रायानुषंगाभिवर्द्धितोत्पलवन्निःश्रेयसप्राप्त्यंतरालदेवादिभवसुखंतदप्यवगणय्यासक्तामोक्षार्थैः
वर्धंटंतइत्येतत्।कुशलानुबंधमनवद्यंकर्मः।अन्यथानिरनुबंधत्तुल्यएवस्यात्।ततश्चपंचैवस्युःअंत्यस्यतुचरमत्वान्नि
रनुबंधंचरमेषपिच,कृत्वान्तद्विशेषपरिग्रह॥५॥निरनुबंधस्वामीसचायंयस्तुकृतार्थइत्यादियपुरुषइतिवर्त्तते।पुन
रर्थेनुशब्दः।यपुनरिति।कृतोर्थोनैनेनिकृतार्थोवाप्तेष्टार्थः।आम्रेडनेपिशब्दःआस्तांतावदस्मदादिरकृतार्थः।कृतार्थोपिस
न्नित्याचार्योदर्शयति।उत्तमंप्रधानंमोक्षफलमवाप्यादिधिगम्यज्ञात्वासचोत्तमः।क्षमादिदशलक्षणोवक्ष्यतेकृतलाभा
दिषुकृतार्थशब्दंव्यभिचरंतंदृष्ट्वाविशेषणमाहोत्तममवाप्यकिमुत्तममवाप्यमुत्तममर्थइतिवर्त्तते।अर्थवशाच्चविभक्तिपरि
णामः।उच्चैर्गृहाणिदेवदत्तस्यामंत्रयस्वैनमितियथासचोत्तमोर्थः।सर्वप्रयत्नप्रयोजनंकेवलज्ञानं।तदवाप्यकृतार्थोभवती
तिदर्शयति।एतेनैवधर्मस्योत्तमत्वंव्याख्यातं।नहिसर्वज्ञोन्यथाप्रणयति।परेभ्यउपदिशति।कृतार्थत्वेपिचतुर्थीवक्ष्यमाणना
मकर्मन्बोदितः।तदुपयोगार्थमुपदेशनादानकर्मणापरानभिप्रेतीतिदर्शयति।नित्यंसउत्तमेभ्योप्युत्तमइतिपूज्यतमएवोनि
त्यंप्रतिदिनमुपदिशत्याकर्मक्षयात्।अयंह्यागमतीर्थकरःप्रतिदिवसमाद्यांचरमांचपौरुषीधर्मकथांकरोतिनियोगपदा
दिषुचापेक्षिकमुत्तमत्वंपूज्यतमत्वंचतन्निषेधार्थमाह।नित्यमेवासावुत्तमोत्तमोनित्यंचपूज्यतमोनपर्वकालादिषुविति
सइतियदपेक्षोनिर्देशः।उत्तमेभ्योऽनंतरनिर्दिष्टेभ्योऽन्येभ्यश्चप्रसिद्धेभ्यःउत्तमेभ्योपितावदयमुत्तमःकिमुतेतरेभ्यःइ
त्यापिशब्दोदर्शयति।इतिएवमर्थेएवंचकृत्वायंपूज्यतमएवकारश्चार्थेउत्तमोत्तमश्चायंपूज्यतमश्चेति।आदरंचावधा
रयतिसर्वादरेणायंपूज्यतमः॥६॥पंचभिरेवगतेऽर्थेऽस्योपन्यासःप्रवचनप्रणेतृत्वादाचार्यश्चोपदेष्टुकामः।कृतार्थो
प्युपदिशति।किंपुनरस्मदिध्दइत्यसूयाहाराउपगोरवंदर्शयति।कःपुनरसाविति।प्रयोजनमेवोदाहरणेनाह।५७। ॥

 तस्मादर्हतीत्यादि। यथाकृतार्थोप्युपदिशति। तस्मात्कारणादिति कारणे पंचमी। अर्हति। भागीयोभ्यतमः। पूजामर्चनमभीष्ट
 वादिभिरभिगमनं कोसाविति निर्दिशति। अर्हन्नेव। नाम्नः प्रयोजनमुक्तं निरुक्तद्वारेण पूजामर्हतीति। एवोवधारणे अयमे
वासावुत्तमोत्तमो नान्य इति लोके कृत्स्नेपि जगति नैकदेशे कुतः पुनः पूजामर्हतीत्याह। देवर्षिनरेंद्रेभ्यः पूज्येभ्योप्यन्यसत्वा
नां देवेभ्यो ऋषिभ्यो नरेंद्रेभ्यः प्रत्येकमिंद्रशब्दः पूज्येभ्योप्यन्यसत्वानामिति माहात्म्यख्यापनमेव। अन्यसत्वानां देवादयः
पूज्यास्तेभ्योप्यर्हति पूजामर्हन्निति। एवं चान्येभ्योपि पूजामर्हतीति व्याख्यातमेव। नहि राजनि समुत्तिष्ठति पर्षदुत्थानं प्रतिवि
तर्कः। सतावदर्हन् पूजां अथ पूजकानां कृतार्थमकोपप्रसादमर्चयतां का गुणावाप्तिः। नैवं शंक्यं। दृश्यते हि अग्निरकोपप्र
सादोपि सेवकानामीप्सितनिवृत्तिहेतुः स्यादग्नेरिव दाहयनीप्सितमपि तस्माद्भविष्यतीति। तच्चैवं दुष्टबुद्ध्या पूरागद्वेषम
प्यग्निमिवान्यायेन सेवमानाः स्वाशयदोषाद्वशिनीवत्सोष्टुक्षेपमात्मोपघाताय कर्मोपचिन्वंति स्वपरिणामोह्निनः।
प्रवचने प्रधानं कर्मोपचयहेतुरित्युपदेशवक्ष्यति च शास्त्रे। प्रमत्तयोगात्प्राणव्यापरोपणं हिंसेत्येवमादिषु। ननु चात एव
ते कृततरामर्चार्हा यदुत निराकृतरागद्वेषमलाः। नहि कलुषमुदकं मलविशुद्धमेयद्येवमुच्यतां नार्हितदर्चनात् किं हितमवा
प्यत इति। आह॥ ८॥ अभ्यर्चनादर्हतामिति। अभ्यर्चनात्पूजनादभिगमनस्तुतिवंदनपर्युपासनादेः कस्य अर्हतां कर्म
णि षष्ठी। अर्हतोभ्यर्च्येत्यर्थः। किं भवतीत्याह। मनःप्रसादः। मनःप्रसादः। प्रसीदतिनेमेः। नचैतदाशंक्यं प्राक्पूजनादप्रस
न्नेमनसि पूजनप्रवृत्त्यभाव एवेति। भवति हीश्वरानुवृत्त्यादिभिरपि प्रवृत्तिः। साचलौकांतिकविधौव स्यते। पूजनादूर्ध्वं
प्रायेण मनसि प्रसादाभिप्रायः। लोकेपि ह्यप्रसन्नमनसामपीष्टजनादिसमागमानंतरं मनः प्रसाद इति प्रतीतिः। ततः कि
मित्याह। ततःसमाधिश्च तस्मान्मनःप्रसादात्समाधिरेकाग्रता निर्विघ्नं वमनस्त्वं निर्वृति र्भवति। चशब्दः समुच्चये। समाहि
तस्य सतः शुश्रूषा ततः। श्रवणं श्रवणाद्ग्रहणधारणेहापोहाः। ततः। संसारतत्वाधिगमः तस्माद्धिताहितप्राप्तिपरिहाराववि
त्ये च मादयश्चेति। तस्मादपि निःश्रेयसं तस्मादपि समाध्यादिगुणावाप्तिनारतम्यान्निःश्रेयसमधिगम्यत इति। अतो हि

तत्पूजनं न्याय्यं मतइमेकल्याणपरंपरा निःश्रेयसि निरशानिर्वर्त्तीन। तत एव तेषां कृतार्थानामपि सतामर्हतां पूजनं न्या
यादनपेतमिति सिद्धं। एवं च कृतार्थत्वेपि कृततरामर्हत्पूजनं न्याय्यमिति दर्शितं भवति। अधुना हि सत्वाः प्रायोऽलसाः क्लेशा
प्र दिभीरवः। प्रमादिनश्च तेषां शांताकारप्रतिमादिदर्शनाद्द्रव्याद्यपेक्षकर्मोपशमादिलब्धमोहनीयविवरप्रसन्नमनसां
ना प्रायेण तद्गुणश्रवणश्रद्धोपजायते। ततो दर्शनादिलाभ इति। केषांचिच्चाधिगतदर्शनानामपि प्रमादिनां प्रतिमादिदर्शनेन तद्
दनगुणानुस्मरणात्संवेगादि भवतीति। साधूक्तं तत्पूजनं न्याय्यमिति॥ ८॥ गृहीतमेतत् यत्पुनरुक्तं कृतार्थोप्युपदिशतीति
तद्विरुद्धं कृतार्थश्चोपदिशतिवेतिनहि कश्चिन्निरभिवांछाश्रममाद्रियमाणो दृष्ट इति चोदितः। कारणमाह। तीर्थप्रव
र्त्तनेत्यादि भवसमुद्रं तरंति तेन तदधिगम्यत तीर्थं प्रवचनमित्यर्थः। तस्य प्रवर्त्तनं प्रणयनं। तदस्य कर्मणः। फलमुप
भोगो विपाकः। प्रयोजनमिति तीर्थप्रवर्त्तनफलं। यत्प्रोक्तं। उपदिष्टं कर्म्मकोक्तं। प्रवचनतत्प्रामाण्याच्च शास्त्रे वक्ष्यते
। दर्शनविशुध्यादिहेतुकं। कमीष्टकेकत्तरत्पुनस्तदित्याह। तीर्थकरनाम। तीर्थं करोतीति तीर्थकरः कृञो हेत्वादिषिति
हेतौ टस्तीर्थकरस्तीर्थहेतुरित्यर्थः। तस्य नाम। कारणे कार्योपचारः तीर्थकरनामकारणं। तीर्थकरनाम यस्मिन्नुपात्ते तीर्थक
रोयमित्येवं व्यपदिश्यते। तस्योदयात्कृतार्थोप्यर्हं स्तीर्थं प्रवर्त्तयति। यत्प्रोक्तं तस्योदयात्तद्विपाकात्कृतार्थोप्यर्हं स्तीर्थमि
त्येतदुक्तं निर्वचनं प्रवर्त्तयति प्रणयत्युपदिशति। करोतीति। तस्य चैतदेव फलमित्युक्तं न चोपभुंजानः पुनरपि वेष्यते
इत्याशंकितव्यं। उक्तं हि षष्ठस्य निरनुबंधं कर्मेति। किं पुनरित्थं दृष्टमित्याह। न किंचिदसाधारणोयमतिशयस्तथापि निद
र्शनमात्रमिदं॥ ९॥ तत्स्वाभाव्यादेवेति। तदेव प्रकाशनं स्वभावस्तत्स्वभावः। तद्भावस्तत्स्वाभाव्यं प्रकाशमयमित्यर्थः। तस्मा
देवकारणात् प्रकाशयत्येव भासयति। तन्मयत्वमेवास्य प्रकाशने कारणं। नान्यदित्येवकारोवधारयतीति भा
वः भासः करोतीति भास्करः। यथाधर्म्मप्रत्यासत्तौ। लोके भुवने। अत्र च भास्कर उभयोरपि स्वभावानुगृहीता निराकां
क्षा तन्मान फलाप्रवृत्तिरित्यर्थः। तदेवं सर्वतीर्थकरोपदेशप्रयोजने व्याख्याते अधुना यस्य तीर्थे प्रवर्त्तमाने आचार्यः

तत्त्वार्थटीका· शास्त्रं प्रकर्तुमिच्छति। तं जन्मनः प्रभृति कथयितुकाम इदमाह ॥१०॥ यः शुभकर्मेत्यादि। यः इत्यन्देशोऽस्मादेकादशयामा
६ र्यायातस्मै इति निर्देशापेक्षः। शुभं कर्म भूतप्रत्यनुकंपादानादिहेतुकं दर्शनविशुद्ध्यादिहेतुकं च वक्ष्यते। तस्यासेवन
मभ्यासस्तेन भावितो भावो नराल्मास्येति। शुभकर्मासेव भावितभावः कियत्कालं भवेषु नेकेषु नैकस्मिन्न द्वयोर्बहुषु। न
रिभ आगमो यं। कांतारप्रनष्टसाधुमार्गप्रदेश नात् सम्यग्दर्शनप्रथमलाभो वर्द्धमानस्वामिन इति। अंते किमित्याह जज्ञेज्ञा
न नेत्यादि जज्ञे ज्ञानवान्। रुज्ञानामक्षत्रियविशेषास्तेषामपि विशेषसंज्ञा इक्ष्वाकवः। केषु ज्ञातेष्विक्ष्वाकुषु तेषामपि बहुत्वात्
पितुरस्य विशेषणं सिद्धार्थः स एव नरेंद्रः तस्य कुलं गृहं तदुपचारात्। संतानो वा तस्मिन् दीपनं दीपः प्रकारोद्भुतं लल्लामे
त्यर्थः। वर्द्धते हीदं को शाद्यभिवृद्ध्या वर्द्धमान इत्यतो दीप इत्यन्क्तं किं गुणो जातवानित्याह ॥११॥ ज्ञानैरित्यादि। पूर्वमेवाधि
गतान्यवाप्तानि पूर्वाधिगतानि ज्ञानानि तै रप्रतिपतितै रनाश्चतैर प्रतितगमहणान्व ज्ञापयति। पूर्वतनभ पमि
वेष्वपि शुभकर्मासेवनादवाप्तान्येवासन्। प्रमादात्तु पुनरावृत्तान्यनंतरैः पुनरप्रतिपातितैरिति। अत एव प्रागुक्तमस्माभिः
कर्म क्लेशेषु नाविश्वसितव्यमिति। ज्ञानपंचकत्वादाह मतिश्रुतावधिभिः तेषामप्येकैकशः शुद्धतारतम्यसद्भावादाह। त्रिभि
रपि शुद्धैर्युक्तः। त्रिभिरपीति शुद्धमेव विशेषयति। त्रीण्यपि शुद्धानि नैकं द्वे वेति। अन्यथा त्रिकं कंठो मेव। युक्तः सहितः संप
न्नः युक्तग्रहणा नान्यतो ज्ञानमाशंकितव्यं। उक्तसलिलस्व छभावास्तिवत्। वक्ष्यते च समाधिः शास्त्रे। किं पुनरित्थमित्या
ह। शैत्यद्युतिकांतिभिरिवेंदुः। युक्त इति वर्तते। यथा हि इंदुः शैत्यादिभिरविरहितः क्षेत्रात् क्षेत्रांतरं यात्येवमसावपि। अप्र
तिपतितज्ञानत्रयो देवभवादिहागत इति। तस्य जातस्य किं स्वरूपमित्याह ॥१२॥ शुभसारेत्यादि। अयं सारशब्दोऽस्ति ताव
द्बाहुल्ये लवणसारो वेतसः। अस्ति दृढत्वे सारकाष्ठं खदिरः। अस्ति परिविस्तरे एतत्सारोऽयं मनुष्यः। अस्ति शेषे वा कूसारो भवा ६
न्। अस्ति प्राधान्ये सारोऽयमत्र गृहे। अस्ति स्वे त्रैव वक्ष्यति निःसारः संसार इति। इह तु प्राधान्ये सारं प्रधानमिति। यावत्प्राधान्य
एव चायं मुख्यः। विविधं प्रयुज्यते पंचारजः सत्वमवैकुव्यं। संहननं शरीरदृढिमा वीर्यमुत्साहः। माहात्म्यं महिमा कलादि

नि शग दा ना
प्रावीण्यं रूपं चार्वंगावयवसंनिवेशः। गुणाः दाक्षिण्यादयः। लोके वाः ज्ञाननिबंधनास्त्र्येषां प्रायो दर्शनात्प्रत्येकं शुभविशेष
णं। एभिः शुभैर्निर्वृत्तैर्हितप्रयोजनैर्युक्तः। संपन्नः किंनामेत्याह। जगतीत्यादि। वीरो विक्रांतः शूरः महान्वीरः महावीर इति। ए
वमर्थे कृत्स्नेपि जगति अयमेको महावीर इति। एवं च कृताभिख्यः। अंतर्मुहूर्तमात्रेण बाल्ये कौमार दशो व्यतीत्य अवाप्तयौ
वनतृतीयदशां स्थिरदशा स्तैर्गुणैर्यो गुणतो निमित्ते पंचमी। अभिख्याति रभिख्या कीर्तिर्गौणं नाम कृताभिख्याय स्येति
कृताभिख्यः। प्रतिष्ठितकीर्तिरिति यावत्। कथं गुणतस्तदुक्तं हि प्रवचने। पूर्ववैरिसंगमकारोपहितकालचक्रादिसन्निपाता
प्रधृष्यत्वादिंद्राद्यो वीरनामानमुच्चैरुच्चैरूरिति। गृहनामापि चास्य गौणं कुलदीप इति गतत्वान्न कंठोक्तं अथ किं प्रा
कृतवत्। गृहम् षितवान्नेत्याह ॥१३॥ स्वयमेवेत्यादि। स्वयमेवानुपदेशात् अनाचार्यो बुद्धतत्वो वगतपरमार्थः। उक्तं हि
पूर्वाधिगतज्ञानत्रय इति बु ध्वा तत्वं किमवस्थः सत्वहितेत्यादि। सत्वहितार्थमभ्युदितमचलितं सत्वमस्येति। सत्वहितायाभ्य
ताचलितसत्वः। बुद्धतत्वोऽप्येवममन्यत अलमनेनानेक दुःखसन्निपातप्रतिभयवहुलेन संसारवासेन मोहदौरात्म्यं
हीदं यदिंधनमरणेपि वर्त्तमानाः सत्वानो हि जंतवस्तदेषां प्रतिबोधनं न्याय्यमिति एवमभिध्यायन्नभिनंदितशुभसत्वो भि
नंदितमनुमोदितमभिष्टुतमनुवृंहितं सत्वमस्याभिनंदितशुभसत्वः। केनाभिनंदितः सेंद्रैर्लोकांतिकैर्देवैः। सलोकांतिकैरिं लोकांतिकदे
द्रैरिति प्राप्ते सेंद्रैरित्यन्क्तं लोकांतिकानामत्र प्राधान्यात्। ते ह्यत्यंतसम्य क् दृष्टय एतच्छीलाश्च। वक्ष्यति हि लोकांतिकाः सर्व वतारास्यकृद्द
एव सम्यक् दृष्टय इति। एवमभिसंबुद्धेन किमनुष्ठितमित्याह ॥१४॥ जन्मजरेत्यादि। जन्मना जरया मरणेन च आर्त्तमभि हिएत्यधिकार
त तमभिभूतमभिगतं तं जगत् त्रिभुवनमप्यशरणं अपरित्राणमभिसमीक्ष्य ज्ञानचक्षुषावलोक्य :सारं निस्सारं मरण नि म
कम ये। चतसोपि हि नरकतिर्य नुष्यदेवगतयोदाहक्रू धा मथाभियोग्यादिदुःखमय्यः कात्र सारवत्तेति। अभिसमीक्ष्य किं
कृतमित्याह। स्फीतमित्यादि। स्फीतं समृद्धकंटकं अपहाय राज्यं जनपदं शमाय धीमान् प्रवव्राज। शमाय मोक्षाय न स
नु परलोकार्थं उक्तमस्य निर् बंधं कर्मेति धीमानिति निःक्रमणानंतरमेवास्य चतुर्थमनःपर्ययज्ञानमाविर्बभूव। अन्यथे

पधीमत्वंनवेयंस्वमनीषा। उक्तंहिप्रवचनेचरिमप्रतिपत्त्यनंतरमेवप्राक्केवलोत्पत्तेश्चतुर्ज्ञानिनस्तीर्थकराः प्रवव्रजुः
अतःप्रव्रज्यावहुत्वेकतरामभ्युपेतवान् इत्याह॥१९॥प्रतिपद्येत्यादिप्रतिपद्यगृहीत्वा॥अशुभकर्मक्षपणोपायभूतंआ
ग शुभ मननवपुण्योपादानमंत्यभवानाकांक्षत्वात्। अतोनिःश्रेयससाधकंमेक्षम एकंकिंतच्छ्रमणलिंगंश्रमणचिन्हं
प्रायःश्रमणत्वगमकं। तच्चस्वकरपंचमुष्टिचतारितनिःशेषकेशंअष्टादशशीलांगसहस्रानुष्ठानाभ्युपगतप्रतिज्ञमभा
रापत्तिहितमितेनैकदुष्करकृतवैकक्ष्यंअत्यंतसर्वसत्वानुद्वेजनमसंगपदप्रापकंप्रतिपद्य। अन्येप्येवश्रमणलिंगो
पचारात्विशेषमार्ययेवाह। कृतसामायिककर्मा। कृतंसामायिकंकर्म करोमिभदन्तसामायिकंसर्वान्सावद्यान्यो
गान्प्रत्यावेक्षेइत्येवं। नचास्यान्योभदंतोन्यत्रसिद्धेभ्यः।आचारार्थत्वनेनसिद्धानुत्यक्तं। व्रतानिविधिनासमारोप्यअ
यंप्रमशब्दोस्ति। भोजनेपयोव्रतइति। अस्तिनिवृत्तौच षलान्तंव्रतयति। अस्याचारेइदंवःकुलव्रतं।अप्रतिज्ञायोरुच्छिलशा स्नि
यिव्रतोयतिःइहतु नि वृत्ति प्र तिज्ञयोर्हिंसादिनिवृत्तिमीमांपनादिप्रतिज्ञाचाभ्युपगम्यतानिचव्रतानिहिंसादीनिवक्ष्यंते।वि
धिनावक्ष्यमाणा पूर्व्याचारव्ययस्तार्थमंतएवव्रतानीत्युक्तमितरथाहिवक्ष्यमाणस्तत्रनिर्देशाद्भूतमितिब्रूयात् चातु
र्यामिकनिवृत्त्यर्थंचव्रतग्रहणमागमेह्ययमाद्यं तयोस्तीर्थकरयोःसत्वाशया पेक्षयापंचमहाव्रतोधर्मइतिसमारोप्या
त्मस्थानिकृत्वाकिंप्रवव्राजेति। वर्त्तते। यथाहिनामराजाहस्त्यादिचलयुक्तोऽराष्ट्र नीतिहृत्यराज्यंप्राप्नुयादेवमस्यमुष्याप्रवृत्तिरि
ति॥१६॥सम्यक्त्वेत्यादि। सर्वेइमेधर्माःसकलशास्त्रार्थनिबंधनावक्ष्यमाणास्तथापितस्यविशेषउच्यते। सम्यक्त्वंक्षायिकं
ज्ञानंकेवलादृत्तेचरित्रंछेदोपस्थाप्यपरिहारविशुद्धिवर्ज्जे। एतेह्यतिचारवशेनभवतःनिरतिचारश्चायंशेषत्रयंत्ववस्था
विशेषवशेनसंभवेत्। संचरोरुद्रसर्वाश्रवत्वात्। कृत्स्नःतपोबाह्यंषड्विधमप्यनस्तपसमुविनयव्युत्सर्गेयथासंभवं ७
ध्यानंतुप्रधानकर्मक्षयकारणत्वात्।समाधिरितिकंठोक्तमेवअनेनबलेनमुक्तः।मोहादीत्यादिमोहज्ञानदर्शनावर
णांतरायाद्विहत्यप्रक्षपय्यअशुभानिगतार्थत्वेपिःशुभग्रहणमन्यकर्मभ्योशुभतरत्वमप्यापनार्थंचत्वारिकर्माणीति

घ्युत्क्रांत्यत्नुपूर्व्याकेवलोत्पत्तिस्तत्रसंबंधसंख्याज्ञापनार्थमुक्तमेतेहिचत्वारोपिसंसारदुःखप्रतिभयप्रदाःशत्रवः। किंफ
लमित्याह॥१७॥केवलमित्यादिकेवलमभिन्नमसाधारणमधिगम्यप्राप्यविभवीति। विभुःसर्वगतज्ञानात्मेत्यर्थःस्वय
८ मेवस्वशक्त्यैवनराजेवसामन्तादिभिश्चः। किंतनूकेवलंज्ञानंचवक्ष्यमाणमनंतंनक्वचित्प्रतिहतंसर्वत्रगमनराच्चविभु
रित्युक्तंअधिगम्यकिंकृतमित्याह। लोकहितायेत्यादिसर्वमेतदूतार्थमेवमितियदेवेदमधुनाप्रवर्त्तीत। कियत्पुनस्तदि
त्याह॥१८॥द्विविधमित्यादिवक्ष्यमाणमेनत्। महाविषयंसर्वत्रद्रव्याण्यसर्वपर्यायाणित्रैकाल्यमस्येति।अभिनगम
युक्तं। गमाःपंथानोनयाःवक्ष्यमाणास्तैरसंख्येयैर्युक्तमभिसंनतंकियद्गुणमित्याह। संसारेत्यादिसंसृतिःसंसारःसंसरणं
वासंसारःसनामादिश्चतुर्विधोवक्ष्यते। सपवादःसंसारार्णवः।कथंचासावर्णवः।नरकतिर्यक्मनुष्यामरगतिचतुष्टयदुस्त
रविपुलपात्र।प्रियाप्रियविरहसंप्रयोगक्षुद्भिघातादिसंनिपातप्रतिभया नेकदुःखागाधसलिलः।परोपघातिक्रूरानार्यज
नानेकमकरविचरित्तविषमः।मोहमहानिलप्रेरणाध्यायमानगंभीरभीषणप्रमादपातालनरकादिविकृतभीमवडवामु
खग्रस्यमानानेकपापकर्मसत्वः।रागद्वेषप्रबलानिलोद्धतसंजायमानवीचीप्रसृतावार्यवेलःतदेवमस्यभगवंतोयतयः
द्वादशांगविपुलशरीरसम्यग्दर्शनायेवद्धसंधिप्राणिदयादिव्रतसंपन्नकनिरुद्धाश्रवद्वारं।संतोषामितस्वादूदकाश्चक
पहिपावनंचिशुद्धज्ञानसन्निहितनिर्यामकं।सकलचारित्रविधानानुकूलपवनप्रेरित्तं।विशुद्धध्यानबलोपहितसर्वमंग
लरक्षं। प्रवचनयानपात्रमारुह्यसंसारार्णवस्यपारप्राप्तिफलं।शिवमक्षयमनामयंमोक्षमवाप्नुवंतीत्येवमेतद्लंपर्या
ते प्तं।संसारार्णवपारगमनायेत्यभ्युच्यते।अतएवपूरंत्यनेनतद्धाधिगम्येति तीर्थमित्युक्तं।अन्येपिपृथिवीकायिकादयः
सत्वाःसंसारस्यलोकस्यकर्मप्रेरिताःपारंगच्छंतीतिज्ञापनार्थंदुखक्षमायालमितिविशेषितं।किमस्यमहात्म्यमित्या
ह॥१९॥ग्रंथार्थेत्यादि प्रत्येकेपटुशब्दःसंतिहिकेचिद्यथाधीतग्रंथपटवोनार्थपटवः।केचिच्चानधीतग्रंथाअप्य
र्थपटवःकेचिदप्यनधिगतग्रंथार्थाअपिस्वविकल्पितवचनपटवइत्यतोविशेषयति।त्रिष्वपियेपटवः।एवंविधा

तत्त्वार्थटीका ८ अपिकेचिदुदासीनाभवंतीत्याह। भयत्नवद्भिरपिविजिगीषोद्यतैः। वादिभिर्निपुणैर्न्यायकुशलैरनभिभवनीयमन्यैरध्यक्षमन्यै
र्वादिभिरन्यैस्तीर्थकैः। किमिवभास्करइवसर्वतेजोभिः। भास्करइवमणिप्रदीयादिभिः। सर्वतेजोभिरनभिभवनीयंइदंतीर्थं
देशयामासकिमर्थः पुनरयमुपन्यासइत्याह ॥२०॥ कृत्वेत्यादिकायवाङ्मनांसित्रीणिकरणानितैः शुद्धं। अकलंकशुद्धानिवा
त्रीणिकरणान्यस्मिन्नितित्रिकरणशुद्धं त्र्यंगारजघादिपा[ठा]त्तुनिष्ठापरनिपातः। तस्मैइतियः शुभकर्मासेवनइत्युक्तं। संबध्य
तेपरमर्षयेनमस्कारंकृत्वेतिवर्तते। पूज्येत्यादिपूज्यतमायभगवतेगनमभिदेनादिभ्योपिनमस्कारमर्हति। किमुतमन्तइति
स्मारयति। भजनंभजनंवानमितिभगः श्रीरित्यर्थः। साचसर्वातिशयमयीवर्णितावक्ष्यतिच। सोस्यास्तीतिभगवान्। तस्मैभग
वतेवीरायविलीनमोहायगतमस्याचार्यः। परमभक्त्याविर्भावितचेताः पुनः पुनः कंठोक्तंनामकरोति। अथवास्ययमेवबुद्ध
त्वइत्यतः। प्रभृतिसामान्यतीर्थकरलक्षणसद्भावान्तद्वचनसंजिघृक्षुर्विशिष्यवीरायेत्याह। नन्वमेतव्यमिदमितिवर्तमान
तीर्थप्रणेतृत्वाद्विशेषित्वमेवेति। तदपिहिसामान्यार्थमेवातीताअपिइदमेवद्वादशांगंदेशयामासुः। तथानागतादेशयिष्यं
ति। अवस्थितत्वादर्थानां अन्यथाकेवलज्ञानहीनोत्कृष्टताप्रसंगः स्यान्नचेयं। स्वमनीषिकाउक्तंहिप्रवचनेइत्येतद्द्वादशांगंग
णिपिटकं। नकदाचिन्नासीन्नकदाचिन्नभवति। नकदाचिन्नभविष्यतिबभूव। भवति भविष्यतिचेतिविलीनमोहापध्वस्तसंसा
रबीजायेत्यर्थः ॥२१॥ कृत्वोत्तरकालंकिमाह। तत्त्वार्थेत्यादि। तत्त्वार्थोधिगम्यतेऽनेनास्मिन्वेति। तत्त्वार्थाधिगमः इयमेवास्य
गौणाख्यानामेति। तत्त्वार्थाधिगमाख्यस्तंबह्वर्थंबहुर्विपुलोर्थोस्येति। बह्वर्थः। सचबह्वर्थस्सप्तपदार्थनिर्णयरत्नाबाध्य
ज्ञेयविषमः संग्रहंसमासंलघुग्रंथंश्लोकशतद्वयमात्रंव क्ष्यामीतिवचोरूपमन्यथाहिश्रुतेःक्रियाफललक्षणमात्मने
पदंस्यात्। शिष्यहितमत्यग्रंथंत्वल्पं अप्यधीयते अ[द्य]धुनाहिकालपरिहाणेरल्पसत्त्वात्सत्त्वानामशक्यः। सकलप्रवच ९
नाधिगमस्तदनधिगमेचदीर्घः संसारः तस्मादिममल्पमर्थसंग्रहमधीत्यबीजमात्रमपितावद्वहंतांशिष्याइत्यतः
शिष्यतंवक्ष्यामीतिअभिप्रायः। इममितिअनंतरमेववक्ष्यामीतिकस्यसंग्रहमित्याह। अर्हद्वचनैकदेशस्य अर्हता

तृभ्यो
९ मर्हद्[भ्यः] प्रावचनं। द्वादशांगंगणिपिटकं। तस्याप्येकदेशस्यसंग्रहंवक्ष्यामि। नसर्वस्यमहत्त्वादित्यर्थः। एवंतीर्थमहिमाक्षिप्तबु
द्धिराचार्यःशक्तिमसंभावयन्नाचार्यदेशीयः प्राह ॥२२॥ महतइत्यादि। अयंमहच्छब्दोऽभिप्रायः। प्रांशुत्वेमहावृक्षः अस्तिवै १९
स्ते पुल्येमहोदधिः। अस्तिपूजनेमहापुरुषः अस्तिभूम[नि] महौजाआदित्यः। अस्तिप्राधान्येमहादेवः अस्तिसंज्ञायांमहाजनः
अस्तिप्रशस्येमहोदयोभूयाः इहतुभूमस्तेबहुग्रंथविषयस्येतिप्राधान्यपूजितत्वेन चएवंवैपुल्यमपिमहोदधिरेवव
क्ष्यति। दुर्गमग्रंथभाष्यपारस्यदुर्गमोग्रंथभाष्ययोः पारोनिष्ठास्येति। दुर्गमग्रंथभाष्य पारः तत्रानुपूर्व्यापदवाक्य
संनिवेशोग्रंथः। तस्यमहत्त्वादध्ययनमात्रेणापिदुर्गमः पारः। तस्यैवार्थविवरणंभाष्यं। तस्यापिनयवादायुगमत्वा
न्वि दलब्धपारः अयंह्यागमः सर्वशक्य[श्चे]तेनमहतापिपुरुषेणसकलप्रवचनार्थः। अशक्योव्याख्यापयितुमिति। तदित्थ
मस्यकःशक्तइत्यादि। अयंकिंशब्दोस्ति क्षेपेकिंसखा योभि[द्रु]ह्यति अस्तिप्रश्ने। किंतेप्रियं अस्तिनिवारणेकिंतेरुदितेन द ो
नु अस्त्यपलापेकिंतेहंधारयामि। अस्त्य[ज्ञाने] नयेकिंतेहंकरोमिअस्त्यवज्ञानेकस्त्वामुद्धापयते। इहत्वपलापेनास्त्यसोयोस्य
जिनवचनमहोदधेः प्रत्यासंकर्तुसमर्थइत्यभिप्रायः। यश्चैतत्प्रधारयेदसाविदमप्यध्यवस्येदित्याह ॥२३॥ [शि]रसेत्या शि
त्रि दिभेत्तुमिच्छेत् ड[क्षि]क्षिसेत्रसक्षितिंदोर्भ्यांतमेवगिरिसहक्षित्योक्षेप्तुमिच्छेत्। दोर्भ्यांबाहुभ्यांप्र[ती]तितीर्थेच्चसमुद्रंमिच्छे
द्दोर्भ्यामितिवर्ततेमित्येच्चपुनः कुशाग्रेणतमेवसमुद्रमुदबिंदुपरिमाणाधिगमायकुशाग्रेणमानुमिच्छेत्। किंचखद्यो
तकेत्यादि खद्योतकैर्भास्करमभिवामीति। भास्करोयमित्येवमिच्छेत्। मोहोन्मूढोनिरर्थकमुन्मत्तोनात्मज्ञः। मोहादि
तिचगिरिभेदादिषुसर्वत्रसंबध्यते। योतीत्यादि। अतिमहाग्रंथार्थंजिनवचनंयेः संग्रहीतुमिच्छति। सइदंप्र[क्रां]तंस
र्वमध्य वस्येत्इत्यर्थः। एवंचोदितआचार्यः सर्थमेतदेवमित्यनुज्ञापवादमाह। एकमपीत्यादि। एकमपिपदंकिंपुन
रियान्सप्तपदार्थसंग्रहइति। नुशब्दोविशेषयति। जिनवचनादित्यवच्छेदेपंचमीयथासमुद्रात्कुंभेप्रकाशते। यस्मा
दितिकारणेपंचमी। यस्मात्कारणात् निर्वाहकंसुगृहीतमप्यायस्यमानमुत्तरोत्तरज्ञानकारणत्वाद्भवोत्तारकमित्यर्थः

नचेमंस्यमनीषिकाइत्याह। श्रूयंतेइत्यादि। श्रूयंतेचानंताइति। चशब्दः समुच्चयेबीजरूपात्तद्विनाशादुत्तरोत्तरवृद्धसं
भाव्यावसीयते। श्रूयंतेत्यभिप्रायः। मात्रोवधारणेएवंश्रूयतेप्रवचनेकरोमिभंतसामायिकमित्येतावतैवभावतः।
रूपगृहीतेनानंतकालेनअनंताःसिद्धाइत्यक्तंचप्रवचने। उदाहरणमात्रंतुषमाषैःस्वाध्यायइति। यस्याश्चैवमागमोनि
इ. र्वाहक ‸ तिचावसीयते॥२४॥२५॥२६॥२७॥ तस्मादित्यादि। तस्मादागमप्रामाण्यात्समासतः सं‸ पेणव्यासतोविस्त क्षे
रेणयथाशक्त्याश्रेयंजिनवचनंनपुनरवमंतव्यमितिदर्शयतिश्रेयइति। इदमेवहिश्रेयोनान्यदिति। निर्गतविचा
रंनिःशंकमित्यर्थः। ग्राह्यमध्ययनश्रवणाभ्यांधार्यमनुप्रेक्षणादिभिः। वाच्यमर्थविचारणादिभिःग्रहणधारणे
ताच दात्मोपकारिणीकिंपुनर्वाचनयेति। चोदिताध्यापनस्यैवगौरवख्यापनार्थंआत्मप्रयत्नदृढीकरणार्थंचाह
ह ॥२९॥ नभवतीत्यादि। श्रोताहिकदाचिदन्यमनस्कोदुष्टांतरात्मावाश्रृणुयादेवंविधस्यश्रोतुर्नहितश्रवणमात्रादेवै
कांतेनधर्मोस्तीति। दर्शयतिहितग्रहणमाम्रेडनार्थंहितमपितावत् श्रृण्वतां सर्वेषांधर्मः किंपुनरर्हतमिति
ब्रुवतइत्यादि। वक्ताहियदास्तुतिमानलोभादितिरीह। कथममीश्रोतारोऽनुगृहीताःप्रतिबुध्येरन् ‸ त्यवाप्तबुद्धिर्हित त्नि
मुपदिशति। तदास्यैकांततोभवतिधर्मएवंचकृत्वास्वपरिणामोनःप्रवचनेषुशुभाशुभोपचयंप्रतिपरंप्रमाणमि
तिदर्शितं। तच्चात्रात्मनेपदाशंकानिराकृतंहिकरत्यादिक्रियाफलं। निर‸ नुबंधा‸ प्रायान्। नचधर्मोप्यभिप्रेतोवश्यं भि
भावीत्यसावित्यक्तः। एवंविनिश्चित्याह ॥२९॥ श्रममित्यादियोहृदयशोषादिरात्मगतश्रमस्तमविगणय्यनेतन्ममदुः
खमिहैवाचेतस्तृपयुक्तः। शरीरमितिपरिचिंत्योपदेष्टव्यं। तस्मादितिप्रक्रांतप्रयोजन ‸ परसं‸ हनिश्चिनोत्ययंविनि मु ह
श्चयोयदुतश्रेयोमोक्षमार्गः। सर्वकालमुपदेष्टव्यः नपुनरश्रेयःसावद्यमिथ्याश्रुतमात्मपरोपघातीति। इदंचपुनः
श्रेयसउपदेशप्रयोजनंनिर्दर्शयआह आत्मानमित्यादियदयंश्रुत्वापापेभ्योनिवृत्यहितेषुप्रवर्तमानःकल्याण १
भागीभवति। सतत्रोपदेशाहेतुरित्यभावपिहितोपदेशेनानुग्र तेइति। विद्याशिल्पकलाद्युपदेशोद्यपिहितबुद्धि ते

त्ते स्तदर्थिनामित्यादिनिराकरणार्थमाह। नत्तेचेत्यादि। विगतद्वंद्वसन्निपाताव्ययपदप्रापणहेतोर्मोक्षमार्गादृतेनान्यो
हितोपदेशः क‸ श्चिदस्मिन्जगतिविद्यतेयेत्वन्येरागबुद्धिविकल्पवशेनहितोपदेशत्वेनगृहीतास्तेभवबीजानु
बंधित्वाद्धितोपदेशाभासाअपिनाभवंति। कुतोहितोपदेशाः। यतश्चैवंतस्मादित्यादि। तस्मादित्युपसंहरति। परमुत्कृ मु
ष्टंइदमेवहितोपदेश नंतरंमोक्षमार्गः इति। एवमर्थेएवंनिर्धार्यवक्ष्यामिति। समाप्तौवा। अलमतिप्रसंगेनअधुनोपन्या ह
सप्रयोजनंमोक्षस्यमार्गआदौवक्ष्यामि। प्रवक्ष्यामीति। एतावत्यएताआर्याया श्चात्रनाभिलिखिताः ‸ नश्रमोभिशंक्यः। तामु
प्रसंगभयात्प्रयोनिगदोक्तार्थत्वाच्चनविमर्दः। अतःपरंशास्त्रंभवतीति। इतीयंकारिकाटीकाशास्त्रटीकांचिकीर्षुणा
संदृब्धादेवगुप्तेनप्रीतिधर्मार्थिनासता॥५॥५॥ ॐनमोभगवतेश्रीवर्द्धमानस्वामिने म॥५॥ नमःश्रीवाचकमुख्या
च्य यगौतमाय॥५॥ जैनेंद्रशासनसमुद्रमनंतरत्नमालो‸ भव्यजनतोषविधायमेन। रत्नत्रयंगुरुसमुद्धृतमिद्बुध्या
तत्वार्थसंग्रह कृतेमणमामितस्मै"सवधीपोविधुरांधियंमेनयप्रमाणादिविचारनीतो। पद्वेविधत्तांव्यसनाव
मग्नेकुर्वंतिसंतःकरुणामवश्यं"संक्षिप्तविस्तीर्णरुचिप्रबोधैः पूर्वैर्मुनींद्रैर्विवृतेपिशास्त्रे"यातुंपथावांछतिमध्यमेन।
बुद्धिर्मदीयापरिपेलवापि"त्रक्तंजिनेंद्रैर्जगदेकनाथैः। सर्वनयद्वंतमतानुसारि"ज्ञेयस्वरूपंप्रविभज्यसम्यक्संयोज
नंकेवलमेवचिंत्यं विमुक्तिमार्गमुनिनाथदेशिते। व्यधायिमोद्या ‸ दसांप्रतंमया"तितिक्षतांतरकृजनःसमाधिना धः१
विलोक्यरंध्रैषितयाविनाकृतः॥४॥ मोक्षमार्गोपदेशःश्रेयान्। परिनिर्वाणस्यपुरुषार्थप्राधान्यात् दुःखोद्वेगाद्विजी
वलोकः कथप्रेप्सयाचक्लेशार्तिहेतूनपरिजिहीषन् कथानेदनिशितोपादिक्रियाच। सर्वक्रियासुप्रवर्तते। कथंदुः
खप्राप्त्यभावश्चलोकेतत्रांतरेषुवसन्निवृष्टः। कारणस्याभावोभीप्स्यते। धर्मस्यार्थकामयोश्च। कथंहिद्विविधंवै
षयिकभेदान्निर्वाणप्राप्तिलक्षणात्मकमुषभेद त्वात्त्रयन्मोक्तंसुषंतदात्यंतिकमैकांतिकमनतिशयमबाधकं केव
लंनिराबाधंस्वाधीनंचशश्वदप्रतिपातादात्यंतिकंव्यतिकीर्णसुखदुःखहेतुभावार्थांतरानपेक्षत्वादैकांतिकंप्रक

 र्थकास्थावस्थानादनुत्तरत्वादनतिशयंप्राण्युपमर्द्दनजलौकिकसौख्यवैपरीत्यादबाधकं।सर्वद्वंद्वस्पर्शाविषया
 तिक्रमादुःषक्लेशाकलंकितंकेवलंनिःप्रतिद्वंद्वमितिनिराबाधंआत्म तादात्म्याविर्भावात्।मनोज्ञविषयसंसर्गाय
त्तानौत्सुक्यनिरस्येतिस्वाधीनमिति।तच्चैतत्स्ववीर्यप्रशमादिगुणतत्वस्यात्मनःसंसर्गप्रतिबंधापरागमात्।पुनर्भव
न प्रबंधोच्छेदाद्दुःखानामत्यंतनिर्वृत्तेर्ज्ञानादिस्वतत्वावस्थानतिःश्रेयसावाप्तेरधिगम्यतइति।तत्साधनशासनमुष्य
तत्र प्रयोजनःरू ·उपदेशः परमर्षेस्तदनुषंगतःशेषव्याख्यानात्।अतश्चमुख्यपुरुषार्थसाधनसाध्याव्यभिचारशास
नाच्छास्त्रमेतत्।विषयद्विसंयोगसमुत्थस्यतु मुषस्यात्यंतिकादिविपरीतविशेषणा॒ गतत्वाद्दुःखोत्तरत्वात्।दुःखप्र नु
तीकारमात्रत्वाच्चतदर्थंशास्त्रमशास्त्रंस्यात्।तदुपायोपदेशविधिमंतरेणापि।तसिद्ध्युपपत्तेश्चैत्यभ्युदयमाख्यसत्स्व
वफलोधर्मप्रतिषेध्यपक्षक्षिप्तः।प्रतिमंतव्योर्थकामौच।यस्माच्चैतेदुःखाभावार्थिनांनात्यंताभावहेतवः।तस्माद
र्यफलधर्मार्थकामोपदेशोनहितोपदेशइति।सर्वेणापितदर्थःप्रयासोनारुध्येयइत्यर्थः।सर्वस्यास्यविषयस्रुषर्द्दि
फलत्वात्तद्दोषदुष्टत्वादिति।परमर्षेः।प्रचक्रुनिसर्गदेवलोकानुग्रहकारितायांप्राणिनांचहिताविभागोपदेशविशि
ष्टानुग्रहाहश्चभावान्निःश्रेयसावाप्तिहेतूपदेशप्रवृत्त्युपपत्तेःसदाचार्ययुक्तितोहिताहितप्राप्तिपरिहारार्थिनांच
कामादिषुदोषदर्शनान्निःश्रेयसार्थित्वान्निःश्रेयसमार्गोपदेशःशास्त्रेप्रवर्ततइत्ययंशास्त्रप्रवृत्तिहेतुरुक्तःशास्त्र
संबंधःसचायंभाष्यकारिकाभिःप्रकाश्यते।पुरुषार्थसिद्धिंप्रत्यागूर्णानांहिताहितप्राप्तिपरिहारार्थिनांचविधेयप्रति
षेध्यविवेकप्रदर्शनार्थंहिकारिकाद्वयमाद्यंपरमकार्यमभीप्सुभिःप्रधानपुरुषार्थप्राप्तिकांक्षिभिःपरहितप्रेक्ष
भिर्निःश्रेयसार्थिभिरित्यर्थः।परमनिर्वृतेरगतत्वात्।तत्सिद्धियोग्यताप्रतिघसामर्थ्यादेवंप्रकारसाधनगुणस १०
मग्रैर्भाव्यमर्थापास्ततद्विपरीतार्थतत्साधनपरिहारिभिश्चेयतोविधेयोर्थः।कर्मक्लेशानामत्यंताभावादनवर
तीप्रतिपात्तिमुक्तिमुषं।सम्यग्दर्शनादीनि।तत्साधनानिचअर्था दस्तनीयः।संसारस्रुषाभिलाषः।तत्सुष
ठ

साधनानिच।तस्मान्निःश्रेयसावाप्तयेयतितव्यं तद्विसिसेसमर्थंचसाधनमारोग्यस्येवचिकित्सासम्यग्श्रद्धानज्ञानसं
न्र वरनपोसीति। रुरैश्वर्यरुषंतत्साधनार्थंचनयतितव्यमिति।यतश्चैवंसम्यग्दर्शनज्ञानतपोगुणसामग्रीयोग
युक्तस्य।द्रव्यक्षेत्रकालभावप्रभेदसंसारमहादुःखप्रपंचापातमहाभयहेतूनांकार्त्स्न्येनप्रत्यक्षयादात्यंतिकीदुःख
निवृत्तिर्निःप्रतिद्वंद्वाप्रतिपातिपरमसुषलाभश्चोपपद्यते।तस्मादुक्तं।तेनमुक्तुश्चंभवतिजन्मेति।कर्मक्लेशाइतिच
दुःखनांनैमित्तिकत्वात्।भवेन्निवृत्तिरिति अनपेक्षपरिणामत्वात्स्वभावत्वंहिनाप्रवज्येरन्क्लेशाः प्राक्तनंतुकर्मक्ले
शविशेषणंनप्रधानेश्वरादिकृताः कर्मक्लेशाइतिएवंक्रियांतरप्रसिद्धिप्रवृत्तिः।क्रियांतरप्रसिद्धिनिवृत्तिश्वकृता।
तस्मादिदमुक्तंभवतासम्यग्दर्शनज्ञानचारित्राणिमोक्षमार्गइति।नतेवमप्रश्वासः कश्चिदिहहिसम्यग्दर्शनादि
युक्तोमुमुक्षुस्तदर्थंसम्यगीहमानोपिनिःश्रेयसमनवाप्योपरमेत।सइदानींरुरमुखप्रतिषेधाद्विफलप्रयासः
स्यात्।इश्यतेहिप्रश्वासः।प्रधानकार्यसिद्धिश्चयथाइतोष्टयोजन्यामु यिनीवर्त्तते।तामेकेनाह्नागच्छपरेणनि ज्ज
यत्तेथाः।यदिवैकेनाह्नानप्राप्नुयास्ततोः मुकस्मिन्ग्रामेमुखमुषित्वाश्वःप्रवेश्यं।तूर्णंचागच्छेरित्येतस्माद्रा सि
ध्याद्गताप्रश्वस्तः।सत्कगमनेविरसीभवति।पूर्वस्मात्तुव्याहन्यते एवंन्रुरैश्वर्यंहिनिरपेक्षउपदेशोऽप्रश्वासायस्या
दिति।नतःप्रश्वासार्थमुच्यतेपरमार्थलाभेवाइत्यादि।जन्मांतरसंचितानांहिकर्मणांबंधनिकाचनाद्यवस्थावैचित्र्या
त्तद्धेतुकरागादिदोषाणांचकर्माचाहित्वताछीस्यात्कश्चिद्बुवैनैवनिःश्रेयसंनाधिगच्छेत्।तथापितस्यरुद्धप्रयोग
पुण्यं· हेतुकंकल्याणप्राप्तिकारणंकर्मस्यादितिस्यान्मतंनत्वेवमभ्युदयाशंसाकृतास्यात्।इष्टशरीरेंद्रियसुखविशेषप्रादुर्भा
वफलत्वात्पुण्यस्यानिषिद्धाभ्युपगमेबाध्यपेतबाधास्यादितिउच्यतेनैषदोषःन्रुरैश्वर्यमुखप्रतिषेधपरंहिमुनेः।
छत्तंवचनंसद्धंकामाइत्यादिस्वर्गलोकगमनंपुनमुकुलप्रत्यायात्यादिवचनंतुप्रधानार्थनिश्चयदार्ढ्योपादनार्थं दर्शि
यथानुच्छित्वाशिशोपिविजिगीषुर्भोगेषुनव्यासज्येतेति तदुच्छेदाद्भोगेषुव्यासंगोपिस्वनुबंधइतितत्प्राधान्यप्रतीते

रितरसुखस्याप्यमुखत्वमुपदिष्टंस्यात्। तन्मात्राभिष्वंगपरिहारार्थमित्थंसर्वत्राप्रियहितनिश्चयसिद्धिं। सिद्धेवाभवति
सासनेदेवेयाअप्परामहिड्ढिए उप्पसन्नेविमलेनवंदिमासिद्धिंविमाणाणिवयंतितायणो। दुक्कराइंकरित्ताणंदुस्स
हाइंसहित्तुय। केइत्थदेवलोएसु केचसिज्झंतिनीरया। इत्यादि नरसुरैश्वर्यनिःश्रेयसविषयाणांसर्ववाक्यानांसिद्धिः।
ततश्चनेदंयथोक्तप्रश्नासबाक्यतुल्यंनह्यत्रकालाध्वपरिमाणगेत्तशक्तिवन्नियतिकालपरिच्छेदइतियथावासर्व
मुपकृत्तंभोजनविधानमुपचर्यंब्रूयात्किंत्वपथ्यमिति। एवंचनत्प्रसंगप्रतिषेधोगम्यते। तस्मात्सतस्योपसर्जनमर्थो
ऽनभिसंहितानुषक्तइति। नैवचात्रनरसुरैश्वर्यसुखानुज्ञानिःश्रेयसावाप्तिहेतुत्वेनानवद्यकर्माभ्यनुज्ञानात्। पुन
र्भवःवप्रबंधकरंनभवति। मोक्षकरमेवतुभवतीत्यनवद्यंहिकर्मतत्। सर्वत्रहिभगवतानिर्निदानत्वमभिप्र
शस्तमुक्तंमुच्छो॥२॥निदानकरणेमुक्खमग्गस्सपलिमंथू। सव्वत्थविणंभगवनाअणिदाणयादापसत्था इत्ति। ततोऽयप्याशुनल य
भेत। तथापितत्सम्यग्दर्शनादिकृतएवसतस्यमोक्षइति। इदानींविचित्रप्रस्थानत्वादधमादिषट्पुरुषविशेषनिर्दा
रणे॰नमंगलपूर्वकत्वाच्छास्त्रप्रवृत्तेर्मंगलपूर्वकमिदंशास्त्रं। तच्चात्रैकांतिकादिफलयोगात्प्रकृष्टत्वाच्चनमस्कारो
भावमंगलंप्रवचनेनसद्धर्मतीर्थप्रणायिनेमहावीरायेति। भगवतएवपूज्यानुत्तरत्वप्रतिपादनार्थंतदनुषंगतः। शास्त्रा
पेक्षाद्यातार्थप्रदत्वशुद्धेः प्रवचनशुद्धिराख्यातास्यादिति। भगवतिजातप्रसादबहुमानोगुणज्ञः। संग्रहकारः श्लो॰ नृणां
शास्त्रेगौरवोत्पादनार्थंबाह। के॰ मीहितंमित्यादिपुरुषार्थानांचतुर्णामुभयस्मिन्नपि लोकेयोविपरीतानुष्ठायीअयं
तमुभयलोकगर्हितपरदारचौर्याद्यासेवमानः सोधमाधमः। ऐहलौकिकमुखप्रार्थनापरः। लोकसुखविमुखः। ऐहिक
प्रत्ययायभयादत्यंतनिंद्यं चौर्यपरदारादिपरिहरन्विषयसुखासक्तः। पुरुषोऽधमः इत्यनुमीयतेस्वप्रस्थानात् ११
यउभयलोकार्थंप्रयतते। दानाध्ययनाद्यासेवमानः। सत्कारलाभयशोमित्राद्यैहिकंफलंपरलोकेपि। नरसुरैश्वर्यप्रा
प्तिमभिकांक्षन्। सविमध्यमोऽनुमीयतेयः पुनरिहमुखनिरपेक्षोभिषेचनोपवासब्रह्मचर्यगुरुकुलवासोपेक्ष्याद्या

सेवमानः। परतीर्थिकोलोकोत्तरमार्गप्रतिपन्नोवादेवेंद्रचक्रवर्तिमहामंडलिकाद्यैश्वर्यसमाकृष्टमानसस्त्रीभोग्यादिवा
प्रार्थयमानोनिदानपरस्तपोविक्रयेणपरलोकसुखमेवप्रधानीकुर्वन्मध्यमइत्यनुमीयते। दृष्टानुश्रविकेष्वर्थेषु
शब्दाद्यातिशयदर्शनादपरितुष्यत्संसारभयोद्वेगात्सर्वसंगत्यागोलोकइयर्तिः श्रेयससुखावहइति। म[ ]नः पुन ग न्वी
र्विषयाभिष्वंगेमनआधेयमितिनिःश्रेयसावाप्तिप्रधानः सर्वथापुनर्भवप्रबंधोच्छित्तयेप्रयतितव्यमित्येवंपरानु
ष्ठानः। कर्मक्लेशाभावोयथाभवत्येषपरमार्थइतितत्प्राप्तियोग्यानिसाधनानिसम्यग्दर्शनज्ञानचारित्राणि। सर्वा
तिचारविशुद्ध्यासमाचरन्नुत्तमोनुमीयते। ऐकांतिकात्यंतिकनिरतिशयाबाधनिःश्रेयसफलप्रधानकृतार्थः प्रार्थनात्
यः पुनः प्रार्थनीयात्यंतविशुद्धफलप्राप्तावत्यंतकृतार्थोपि। प्रार्थनीयफलाभावान्। परनिमित्तोपकारफलनिरपेक्षः स
त्वानामनुपयाविनानिष्कारणवत्सलः। अत्यंतहितपरः परोपदेशेवर्त्ततेनिसर्गतएव सोत्यंतशुभतीर्थकरनामकर्मो
दयप्रभावादत्कव्यएषोपदेशइतितीर्थकृत्त्वस्वाभाव्यात्प्रयतातेभास्करप्रकाशनप्रवृत्तिवत्प्रकृष्टतमत्वात्सर्वलो
कोत्तमः। ततश्चपूज्यानामपिपूज्यतमत्वाद्देवाधिदेवइत्यभिलप्तिवार्थप्रेक्षावत्नादरैः। सएवातित्राम्यादर्चनीयः सकः
अर्हन्निति। सामन्योक्तंविशेषेव्यवस्थाप्याते। यावत्तस्मादर्हतिपूजामर्हन्नेवोत्तमोलोकइति। सकिमर्थंकृपाएसादाभाव
दर्थ्यनुग्रहाप्रवणः। सर्वजगतासेव्यतइतिचेत्। प्रक्षीणाशेषरागादिदोषग्रामस्यप्रसादद्वेषणभावेपितत्सेवातोनिःश्रे
यसलाभस्यध्रुवत्वात्तदाह। अभ्यर्चनादर्हतामित्यादि। कृतकृत्यस्यप्रयोजनोद्देशाभावादप्रेक्षितकार्यचेष्टानामत्वात्परा
नुग्रहप्रवृत्तिरेवतर्हिनस्यादितिचेत्। नतीर्थकृन्नामकर्मानुभावाज्जगद्धितकारित्वशीलत्वमुपपत्तेः अनपेक्षितप्रयोजन
भास्करप्रकाशनादिवदित्याहतीर्थप्रवर्त्तनफलमित्यादि। अथवानुत्तरपारमर्षज्ञानबुद्धातिशोषाद्यप्रमेयद्धिनिःश्रे
यसाभ्युदयार्थगमनमपेक्ष्यकृतार्थत्वविशेषणात्। अवश्यवेद्यतीर्थकरनामकर्मवेदनाद्यायुष्कनंतुबंधादिक्षप
णमात्रकार्यशेषापेक्षमकृतार्थतापिस्याद्वादिनोनदोषायेति। अत्राहसंसारांतर्वर्त्तिजनसामान्यात्सर्वेयंकुतोनुत्तरगुणस

 संपश्तनार्थत्वंयानहीष्टस्वयंभूरिति। उच्यते अनुभावविशेषजनिततारतम्यकुशलाकुशलप्रपंचैः कर्मभिरेवापादि
 तप्रकर्षनिकर्षभेदवैश्वरूप्याजीवलोकोदृष्टोनहिकर्म्मणामलंघ्यमस्तीत्यतोनेकजन्मांतराभ्यासानीर्थकृत्वाभिनि
र्वर्तिकाभिः दर्शनतपोयोगाद्युत्तमविशुद्धाभिर्भावनाभिरुपचितस्फीतीकृतपरमप्रकृष्टपुण्यसंभारातिशयाद्दोषा
णामत्यंतव्यवत्तेरनर्थगुणरत्नमहानिधीनांपरमेश्वरत्वमुपपन्नंभगवतइत्याह। यः शुभकर्मासेवनइत्यादि। या
वत्कृत्वात्रिकरणशुद्धंतस्मैपरमर्षयेनमस्कारंवीरायविलीनमोहायेति। अतोऽपरिमेयाऽनुत्तरानंतगुणस्वार्थसंप
द्युक्तः सद्धर्मतीर्थस्यास्यप्रणायकोभगवान्जगत्परमेश्वरः। प्रत्यासन्नोस्मत्परमबोधवोमहावीरोभिप्रणम्यइत्य
स्यैवनमस्कारइत्येवंनमस्कारभावमंगलपुरस्सरत्वंतत्वार्थाधिगमसंग्रहस्याविष्कृतं। ऋद्धिश्चयथोक्तमौनींद्र
प्रवचनानपेतत्वादिति। ५। इदानींसंग्रहविवक्षाप्रयोगजनमाह। वक्ष्यामिशिष्यहितमिममिति। कथंबह्वर्थसं
ग्रहंलघुग्रंथसमितिवचनात्। कालानुभावादल्पसामर्थ्याभव्याः कथंनामाल्पीयसावाक्यबंधनमहतोर्थराशे
रधिगंतारःस्युरितिस्यान्मतांकिमयंकृत्स्नस्यप्रवचनस्यसंग्रहउततदेकदेशस्येतिएकदेशसंग्रहोयमित्यादि
अर्हद्वचनैकदेशस्येति। इदंयुगीनभव्यलोकानुग्रहमभिसंधायकिमर्थंपुनः। समस्तश्रुतसंग्रहादरएवनकृ
तइतिचेत्। कृत्स्नश्रुतार्णवसंग्रहकरणाशक्यत्वादर्थमपिहिनैवाशक्यमारभ्यतेइत्यशक्यताप्रतिपादनार्थ
माह। शिरसेत्यादिस्याद्बुद्धिर्जिनवचनैकदेशसंग्रहत्वाच्छिष्यहितप्रतिज्ञाचितथास्यात्। सर्वजगत्स्वभावनिर्ण
याद्धिताहितप्राप्तिपरिहारार्थिनामनुग्रहःस्यात्। सकलजगत्तत्वंचसमस्तश्रुतौघप्रतिपाद्यमिति। उच्यतेनायं
नियमःश्रुतार्णवस्यपारंगतेनैवतएवश्रेयःप्राप्तिरितिकिंत्वेतदपिदृष्टं। प्रवचनेधर्म्मस्यैकस्यापिपदस्योपयोगः
संसारनिर्वाहकः। किमंगपुनरेवंविधार्थविस्तारविषयस्येति। तस्मात्संक्षेपाद्विस्तराच्चजिनवचनंश्रेयस्करमिति
नदाह। एकमपितुजिनवचनमित्यादि। यावद्वार्यवाच्यंचेति। किंचजिनमतानभिज्ञस्यपरस्येदंचोद्यंलोकानुग्रहा

संपादनाद्यर्थएकदेशसंग्रहइति। कथंसंसारदुःखार्त्तसत्वानुकंपाद्रवीकृतात्मापरानुग्रहप्रवणोविधिप्रवृत्तोअ
संपादितपरोपकारोपितत्प्रयोगशुद्धिनएवस्वयंतावन्निश्रेयसंभाग्भवतीतिनियमादस्याकंयतिधर्मोदेशनीयः
सद्धर्मइतिहेतोः। प्रोक्तंहिभगवद्भिः। उट्ठिएकया। अणुट्ठिएकया। सस्सूसमाणेमुपवेअए अच्छवमित्यादि। यावत्
तुभमाणाणंजहासेदीवेअसंदीणेएवंसरणंभवइमहामुणी। तथाभयसयसहस्समहणोबिवोहउभविअपुंडरी
याणंधम्मोजिणपन्नत्तोपकप्पजइणाकहेयव्वोइतितदाह। नभवतिधर्मइत्यादिहितोपदेशोनूकर्तव्योनिःश्रेयसा श्र
वाप्त्युपायोपदेशान्नामः। कश्चिद्धितोपदेशइत्यत्रुक्तं। सम्यग्दर्शनज्ञानचारित्राणिमोक्षमार्गः इदमाद्यमनवद्यमुप
देशसूत्रंसकलतत्वार्थशास्त्राभिधेयमुररीकृत्यअंगीकृत्यप्राघ्नतत्। द्वादशांगप्रवचनार्थसंग्रहाहिसामायिकसूत्र
वत्। यतइहहिशास्त्रेप्रसंगानुप्रसंगतस्त्रयएवपदार्थाः। सम्यग्दर्शनादयोहिमुक्तेःकारणत्वेननिरूप्यंते अथक
स्मादेतएवमोक्षस्यकथ्यंते। नपुनःसएवप्रधानत्वादादौप्रदर्श्यतइत्यच्यते। कारणायत्तजन्मत्वात्कार्याणांका
रणमेवोपादादने। प्राक्प्रेक्षापूर्वकारिणेथयासत्यमसौप्रधानं। तथापितुतत्रप्रयोवादिनांनास्तिविप्रतिपत्तिः
यद्यपिभावाभावादिरूपेणास्तिविगानंतथाप्यस्तिताचत्। मोक्षइत्यनादृत्यभावादिरूपतांतद्धेतुष्प्रायोसंवाद
इतिमन्यमानाःपरपरिकल्पितांश्चाहेतूनेवमुक्तेःपश्यत्सम्यग्दर्शनादित्रयमेवोपन्यस्तवान्। अत्रचावधारण
मवश्यद्रष्टव्यंसम्यग्दर्शनादीन्येवमोक्षमार्गइत्यनवधारणाद्धिसत्यन्यस्यापिमुक्तिपथस्यसद्भावादनर्थकमेवोप
देशदानंस्यात्तेनैवसिद्धत्वादिति। सम्यग्दर्शनशब्दश्चदर्शनशब्दश्चदर्शनशब्दसन्निधौश्रूयतेअतस्तेनैवसहास्या
भिसंबंधोनज्ञानचारित्राभ्यामिति। कश्चिदाशंकेतातस्तन्निवारणायाह। भाष्यकारेसम्यग्दर्शनंसम्यग्ज्ञानसम्य क्
क्चारित्रमिति। अर्हदभिहिताशेषद्रव्यपर्यायप्रपंचविषयातदुपघातिमिथ्यादर्शनाद्यनंतानुबंधिकषायक्षया
दिप्रादुर्भूतारुचिर्जीवस्यैवसम्यग्दर्शनमुच्यते। सम्यग्ज्ञानंसकलक्षणव्यवहाराव्यभिचारात्मकंज्ञानावरणकर्मक्षयो

पशमसमुत्थमित्यादिभेदं। सम्यक्चारित्रंतुज्ञानपूर्वकंचारित्रावर्त्तिकर्मक्षयक्षयोपशमसमुत्थंसामायिकादिभेदंस
दसत्क्रियाप्रवृत्तिनिवृत्तिलक्षणंमूलोत्तरगुणशाखंअत्रभाष्येचोदयतिअथकिमर्थंप्रत्येकंसम्यक्शब्दःप्रयुज्यते
यावतासम्यग्दर्शनेसतिपरज्ञानचरणंवातत्सम्यगेवभवभवतीत्यतोनसम्यग्दर्शक्शब्देनयोर्विशेषणतयोपादे
यउच्यते। सत्यमेतत्। किंतुनज्ञानमात्रमत्रविवक्षितंचारित्रमात्रंवा किंतुविशेषरूपे। उभेअपिद्वनरथाहिसम्यग्द
ग र्शनसंपन्नविद्येति। सम्यग्ज्ञानसम्यक्चारित्रेनतुतेसशोन्मोक्षमार्गतांबिभ्रतइत्येतत्यान्वेवनत्रसम्यक्चारित्रंनभ
यइति। तच्चनयतःदेशरूपेपिचारित्रेचारित्रशब्दोवर्त्ततएवतच्चात्ताभिमतचारित्रासम्यक्शब्दविशेषणेनव्यावर्त्तत
इतिस्यादेवं। तत्राशंका। किंतेभवतोमोक्षकारणाउतमाभूतां। तदाशंकानिरासार्थंसम्यगिति। ज्ञानचरणयोरुपाधि
त्वेनोपादायिसूरिणा। अथवादर्शनज्ञानचारित्राणांत्रयाणामपिव्यभिचारउपलभ्यते। यतोमिथ्यादर्शनपुद्गलोदये
जीवस्यमिथ्यादर्शनमिथ्याज्ञानंमिथ्याचारित्रमिति। मुक्तेरसाधकत्वान्मिथ्याशब्देनविशेष्यंतेतान्येवसम्यग्दृष्टेर्मु
क्तिसाधनत्वाद्यथार्थग्राहित्वाच्चसम्यक्शब्देनविशेष्यंते। दर्शनंचज्ञानंचचारित्रंचदर्शनज्ञानचारित्राणि। सम्यक्त्वानिद
र्शनादीनिचेति। सम्यग्दर्शनज्ञानचारित्राणीति। अतोव्यभिचाराद्युक्तं। यतसम्यक्शब्देनसर्वाणिदर्शनादीनिविशेष
यति। चारित्रमितियोयमितिशब्दः। सइयत्तांदर्शयति। एतावत्येवमुक्तेर्मार्गोनान्योस्तिएवइत्यनेननुइतिनइयत्ताचध
नस्याशवमंनर्विपरिवर्तमनंस्वप्रत्यक्षंपरस्मैवासामान्येनप्रतिपादितंपरप्रत्यक्षंनिर्दिशतितिस्रोविधाः। प्रकाराअनं
तरप्रदर्शितायस्यसत्रिविधःकोसावुच्यते। सूत्रोपन्यस्तोमोक्षमार्गइतिमोक्षइतिचज्ञानावरणाद्यष्टविधकर्मक्षय
लक्षणः। केवलात्मस्वाभवःकःकथ्यतेस्वात्मावस्थानस्वरूपोनस्थानंयतोमोक्षस्यमार्गः। शुद्धिरुच्यतेनपुनर्दानशुद्धिर्वि
वक्षितायात्वसौकर्मणांमुच्यमानत्वावस्थतस्थोधनाद्येनानिप्रवर्त्तंते। अथवैषत्प्राग्भारधरणीमोक्षशब्देनाभिधा १३
तुमिष्टा। यस्मात्तदुपलक्षितोपरियोजनान्क्रोशषड्भागेभवतामाकाशदेशःप्रादेशिद्दिव्यदृश्वभिराधाराः। तस्यायंमा

र्गःपंथाःसमस्तप्रत्यपायविपुतः। पाटलिपुत्रगामिमार्गवत्। मोक्षमार्गइत्यस्यएषत्रिविधइत्येतद्विवरणमेवंसामान्ये
नसूत्रप्रकाशःप्रत्ययादिअधुनापरःप्रश्नयति। किमेतावदेवमोक्षमार्गोपदेशनमुतविस्तरेणाप्यस्तिकिंचिदितिअस्ती
त्याह। यद्यस्तिकिमितिनोच्यते। आहतंपुरस्तादित्यादि। तमितिमोक्षमार्गमनंतरश्रुतंनिर्दिशतिपुरस्तादित्यस्मात्सूत्रादु त
परितनसूत्रेषुलक्षणतइति। लक्ष्यतेनेनेतिलक्षणं। तद्विधांतर्बर्विर्भेदेनरुचिपरिच्छेदानुष्ठानाख्याः। पौरुषेय्यशक्तयो
जीवस्ययाःसमासाद्व्यपदिश्यते। सम्यग्दर्शनीत्याद्यांतरंबाह्यंतुतत्प्ररूपणसूत्रशब्दराशिरेतर्लक्षणोपकारित्वात्प्र
वर्त्तमानः। तत्वार्थश्रद्धानंसम्यग्दर्शनमित्यादि। विधानंइतिभेदतः। ननुचसर्वद्रव्यभावविषयारुचिरेकैवकुतस्तस्याः
प्रभेदसंभवःउच्यते। सत्यमेकारुचिस्मात्तुनिमित्तभेदाद्भेदमश्नुतेक्षयक्षयोपशमोपशमलक्षणंसास्वादनवेदकलक्ष
णंच। तथाचैव्योत्पत्तिकारणवशादेकरूपायाअप्यपरिष्टाद्भेदोनिदर्शयिष्यतेकस्याश्चित्स्वभावएवनिमित्तमुत्पद्यमा
नायाः। कस्याश्चिच्चोपदेशोनिमित्तमुंचयाश्चात्यंतभेदमाश्रित्यभेदवृष्टंविधानतोवक्ष्यतिचकारःसमुच्चयेविस्तरेणेति
सम्यग्दर्शनंसम्यग्ज्ञानंसम्यक्चारित्रमित्येष। त्रिविधोमोक्षमार्गइत्यमुंसमासव्याख्याभेदमंगीकृत्यइहैववासूत्रेव
क्ष्यमाणं। तत्रसम्यगितिप्रसंसार्थोनिपातइत्यादिकं। संक्षेपमाश्रित्यवक्ष्यमाणोविस्तीर्णोभिमतस्तत्वार्थश्रद्धानंसम्य
ग्दर्शनमित्यादिरतोविस्तरेणेत्याह। उपदेक्ष्यामइतिभणिष्यामः। स्वपरानुग्रहार्थं। यदितर्हिलक्षणविधानाभ्यामुत्त
रत्रोपदेक्ष्यसितत्तस्तमेवब्रूहिकिमनेनाद्यसूत्रोपन्यासेनसंक्षेप्यर्थाभिधायितानर्थकेनेतिचोदित। प्रत्याहशास्त्रानु
पूर्व्यात्यादिमुख्यपुरुषार्थसाधनसाध्याव्यभिचारशासनाच्छास्त्रमिष्टंप्रमाणप्रमेयसिद्धिनिरूपणंच। तस्यानुपूर्वी
क्रमःपरिपाटीतस्याविन्यासोरचनातत्प्रयोजनार्थंतुशब्दाद्धाभक्रमप्रदर्शनार्थंचशुश्रूषूणांचादरप्रतिपादनार्थमि
दमुच्यते। अवशिष्टपदार्थाभिधानंउद्देशस्तन्मात्रमिदंसम्यग्दर्शनादिसूत्रमभिधीयते। संग्रहप्रतिज्ञानात् एक
कपयत्यादौसम्यग्दर्शनंलक्षणविधानाभ्यांनिर्द्धारयिष्यामि। ततोज्ञानंततश्चारित्रमित्येषावक्ष्यमाणरचनेति

प्रतिपद्यस्व। अपेचलाभक्रमः। सम्यग्दर्शनादीनांपूर्वसम्यग्दर्शनेततश्चारित्रमुत्पत्ताविति। त्रिष्याणांचात्रग्रहणादिव्रूप्र
वर्त्तमानानांतरंशक्यंवचनमंतरेणादराधानमित्यतः। सकलशास्त्रसंग्राहीदमादावुच्यते। सूत्रं आह परः उच्यतं
नामतथाकिंतूच्यमानेस्मिन्नत्वेवंभवितव्यं। सम्यग्दर्शनज्ञानचारित्राणिमोक्षमार्गाइत्यभिधानस्याप्यभिधेयमाश्रि
त्यवचनंप्रवर्त्तनेमोक्षमार्गशब्दस्यसम्यग्दर्शनादीन्यभिधेयानितेषांचवहुत्वात्। बहुवचनेनैवभवितव्यमितिउच्य नै
ते। प्रेक्षापूर्वकारितानुमीयतेसूत्रकारस्येवमभिदधतः यतोमोक्षमार्गाइत्युक्तेएकैकस्येतत्परनिरपेक्षंप्रतिसाधन
भावोगम्येत। नचैतदिष्टंयतः। समुदितैरेवदर्शनादिभिः साध्यामुक्तिः नव्यस्तैरितीत्येतदाह। एतानिचेत्यादिना
एतानि। प्राक्प्रत्यक्षीकृतानिसम्यग्दर्शनादीनिव्यपदिति। शे चशब्दोहिशब्दार्थोनिपातानांअनेकार्थत्वात्हिशब्दश्च
यस्मादर्थः। समस्तानीतिसर्वाणिसम्यग्दर्शनेसत्यपियदिज्ञानंनभवति। तयोश्चसतोर्यदिक्रियानविद्यतेततइष्ट
मर्थंनसाधयंतिरोगापनयनलक्षणमारोग्यमिवरोगिणः। यथाह्यारोग्यार्थिरोगिणः। भेषजेरुचिस्तद्यंचपरि
ज्ञानमिदमेवौषधमस्यव्याधेरपनयनकारिसतिचैतस्मिन्द्वयेयदिसम्यग्ज्ञानपूर्विकायांपथ्याद्यभ्यवहरण
क्रियायांविशेषणेवाप्रवर्त्तेत। ततोऽस्यारागः। प्रणस्यतिनान्यथा। एवमिहापित्रितयंसमुदितंत्रिफलाद्यपदेश
वत्सिद्धेः सकलकर्मक्षयलक्षणायाः। साधनभावंबिभर्त्ति अर्थापत्त्यासिद्धेप्याह वचसास्यष्टमर्थापत्तिलभ्यफ
ग लप्रदर्शनायथा। एकतराभावेपीत्यादिसम्यग्दर्शनादीनांत्रयाणामेकतरस्याप्यभावेअलाभेसाधनान्यनिर्वर्त्त
कानि। अस्मात्कारणात्त्रीण्यपिमोक्षमार्गशब्दः। समुदितान्यभिधेयीकृत्यप्रवृत्तइत्येकत्वात्तस्यसमुदायस्येक
वचनमेवन्याय्यमिति। अतस्त्रयाणांसम्यग्दर्शनादीनांग्रहणमाश्रयणंमोक्षार्थिनाकार्यमिति। एकतराभावेप्य
साधनानीयमुंग्रंथपुनरुक्तंमन्यमानागुरवः कथयंतीवंउपात्तेसाध्यंमोक्षंनसाधयंति। व्यस्तानियत्पुनःप्रत्ये १४
कमेषांसाध्यंनतत्साधयंत्येव। यथासम्यग्दर्शनस्यदेवलोकप्रापणसामर्थ्यंज्ञानस्यज्ञेयपरिच्छेदः। क्रियायाः

शुभात्मकर्मादानंदशक्षयोवाकर्मणामिति। अथवाविवरणग्रंथेषुनगुरुलाघवंमत्याद्रियंते। सूरयः अर्थापत्त्यनभिज्ञानाम
प्यपदेशप्रवृत्तेरथवाएतानिचेत्यन्यथाख्यायते यएवंवेदयंतिकिमर्थमितिबाह्यमोक्षकारणतयाभ्युपेयंते। सम्यग्दर्शना
दीनि। नपुनर्यथान्येष्वादिभिज्ञानमेवाकेवलंमुक्तिकारणमभ्युपगम्यतेयतः पंचविंशतितत्त्वज्ञइत्यादिकथयंति। उच्यते।
नकेवलंज्ञानंमुक्तेः। कारणंपर्याप्तंक्रियारहितत्वात्पंगुवत्। नचक्रियामात्रंविशिष्टज्ञानरहितत्वादंधवदतोभ्युपेहिसमस्तानिस
म्यग्दर्शनादीनि। मोक्षकारणान्येकतरभावेप्यसाधनान्यतःकारणात्त्रयाणांग्रहणंकृतं। अथयदादर्शनादीनामेकंप्राप्तंभ
वत्तितदापरस्यावस्थानमस्तिनास्तीति आह। भजनाकार्यात्रतांदर्शयति। एषांचेत्यादिना। एषामितिदर्शनादीनांसूत्रोक्तानांच
शब्दः समुच्चयेकथमितिचेदपेवसमस्तानांमुक्तिदेहतुनाप्रतिपन्नाएवसिद्धमपिचप्रतिपत्तव्यंकिंतदितिचेदुच्यते। लाभनिय
मइति। पूर्वस्यलाभइति। सूत्रक्रममंगीकृत्यपूर्वस्यसम्यग्दर्शनस्यलाभेप्राप्तौभजनीयं। विकल्पनीयंस्याद्वानचेति। उत्तरंज्ञा
नंचारित्रंच यतःदेवनारकतिरश्चांमनुष्याणांचकेषांचिदाविर्भूतेपिसम्यग्दर्शनेनभवत्याचारादिकमंगप्रविष्टंज्ञानं
पत्तिहेतुत्वात् न च यं साध्यमित्यपुमेवार्थं भाष्येण स्पष्टयति परमिति सूत्रक्रमप्रामाण्याज्जीवाधिकरणमाद्यं जीवपरिणामोऽन्तरंगस्तद
यत्तत्वात्कर्मबंधस्य निमित्तमात्रत्वाद्बहिरंगमजीवाधिकरणं दृष्टाभिधायी वा परशब्दः प्रायोगिकः वैस्रसा वा निर्वर्तनादयोऽवसेयाः
आद्यं च जीवविषयत्वाज्जीवाधिकरणमुक्तं कर्मणः बंधहेतुर्भवतः इदं तु तदधिकरणमुच्यते परमत्र बंधनिमित्तमात्रत्वादजीवाधि
करणं समासतः संक्षेपतश्चतुः प्रकारं भवति समासग्रहणान्मूलोत्तरगुणभिन्ने द्वे शरीरादिकान्यकलापश्च व्यासः सूक्ष्मभेदः आ
पादितो भवति तद्यथेत्यादिना चतुरो विकल्पान् स्वरूपतः पठति निर्वर्तनेत्यादि इति करणेन मूलभेदेयत्ताप्रतिपादनार्थः आम्नाया
ताः शब्दनिर्देशद्वारेण निर्वर्तनादयो भेदाभेदद्वारेण स्वरूपकथनमेषां क्रियते तत्रेत्यादि तत्र तेषु निर्वर्तनादिषु निर्वर्तना तावद्व्याख्यायते
निर्वर्तनं वाधिकरणं निर्वर्तनाधिकरणमिति समानाधिकरणः भावसाधनपक्षे षष्ठीतत्पुरुषः निर्वर्तनाया अधिकरणमेव मनस्या
पियोज्यं तद्द्विविधं द्विप्रकारं द्रव्यप्रदर्शनार्थमाह मूलगुणनिर्वर्तनाधिकरणमुत्तरगुणनिर्वर्तनाधिकरणं चशब्दः समुच्चये मूलं
चासौ गुणश्च मूलगुणः मूलमाद्यं प्रतिष्ठा संस्थानाद्योगुणो मूलगुणः स एव निर्वर्तनाधिकरणं स हि निर्वर्त्यः सन्नधिकरणं भवतीति क
र्मबंधस्य तथांगोपांगसंस्थानमूर्त्यादिते तूर्णादिरुत्तरगुणः सोऽपि निर्वर्त्यो गुणः सन्नधिकरणीभवति कर्मबंधस्योत्तरगुण एव निर्वर्तनाधिकरणं
तत्र मूलगुणनिर्वर्तना पंचशरीराणि स्वाधिकरणशब्देनोदितो भाष्यकृता लाघवे विषयत्वे कोऽपि च प्रत्यासत्तेर्गम्यते तो मूलगुणनिर्व
र्तनाधिकरणमौदारिकादीनि पंचशरीराणि तानि च द्वितीयाध्याये व्याख्यातानि प्रकृतिवस्तुतियोज्यं ते औदारिकशरीरवर्गणाद्यो

तत्त्वार्थ॰टी॰ पुद्गलैर्निर्वर्तितमौदारिकशरीरसंस्थानं समचतुरस्रादि तस्य मूलगुणनिर्वर्तनाधिकरणमात्मनो भवति बन्धनिमित्तत्वात् उत्तरगुणनिर्वर्तनाधि-
१९० करणमौदारिकस्याङ्गोपाङ्गमुखकर्णादि अवयवसंस्थापनादि वैक्रियस्यापि बहुशः स्ववर्गणायोग्यद्रव्यनिर्मापितमादिसमचतुरस्रसं-
स्थानं मूलगुणनिर्वर्तनाधिकरणमस्योत्तरगुणनिर्वर्तनाधिकरणमङ्गोपाङ्गकेशदन्तनखादिकं आहारकशरीरस्यापि स्ववर्गणायोग्य-
पुद्गलद्रव्यनिर्मापितं संस्थानं मूलगुणनिर्वर्तनाधिकरणमुत्तरगुणनिर्वर्तनाधिकरणमङ्गोपाङ्गादि कर्मसंघातलक्षणस्य कार्मणस्यापि
तद्योग्यद्रव्यनिर्मापितस्य संस्थानं मूलगुणनिर्वर्तनाधिकरणं उत्तरगुणनिर्वर्तनाधिकरणमस्य न संभवति तैजसस्याप्युष्णलक्षणस्याशितपी-
तपाचकशापानुग्रहसमर्थस्य लब्धिप्रत्ययस्य च परनिग्रहानुग्रहकारिणः स्ववर्गणानिर्मापितसंस्थानं मूलगुणनिर्वर्तनाधिकरणमस्याप्युत्तरगु-
णनिर्वर्तना नैवास्तीति वाङ्मनःप्राणापानाश्चेति चत्वारो मूलगुणनिर्वर्तनाभिसंबन्धः वाङ्मनोवर्गणायोग्यद्रव्यनिर्मापिते वाङ्मनःसं-
स्थाने सविशेषे मूलगुणनिर्वर्तनाधिकरणं तथा प्राणापानवर्गणायोग्यद्रव्यनिर्मापिते उच्छ्वासनिःश्वासाकारो मूलगुणनिर्वर्तनाधिकरणमे-
षामप्युत्तरगुणनिर्वर्तना न संभवत्येवेति मूलगुणनिर्वर्तनाधिकरणमिदं व्याख्याय प्रकारान्तरेणोत्तरगुणनिर्वर्तनामाविष्कुर्वन्नाह काष्ठपु-
स्तचित्रकर्मादीनीति मूलगुणनिर्वर्तना कर्मशब्दः प्रत्येकमभिसंबध्यते तत्र काष्ठकर्म क्रियते कुट्टकादीनां कृतिरुत्तरगुणनिर्वर्तनोच्य-
ते प्रसिद्धपुद्गलाद्याकृतेर्बिम्बनिर्वर्तनादेवं पुस्तचित्रकर्मणोऽपि वाच्यं पुस्तकर्मः सूत्रचीवरकादिग्रथितकृत्रिमपुत्रकादिकं चित्रकर्मा-
ऽन्तःप्रसिद्धमादिग्रहणात् लेप्यपाषाणपत्रच्छेद्यजलकर्मलेप्यकर्मपरिग्रहः शब्दमप्यनेकाकारमाख्यातं रूपणादिवस्थानतो मूलगुणनिर्वर्तनाधि-
करणं तीक्ष्णतोज्ज्वलतादयश्चोत्तरगुणाधिकरणमिति अधुना निक्षेपाधिकरणस्वरूपनिर्धारणायाह निक्षेपाधिकरणं चतुर्विधमित्यादि तच्च
अप्रत्यवेक्षितादिना चतुःप्रकारादीनां दर्शयति अप्रत्यवेक्षितचक्षुषा निक्षिप्ते भूप्रदेशे निक्षिप्यस्य दण्डकादेः स्थापनमधिकरणं प्रत्यवेक्षितेऽपि भू-
देशे दुःप्रमार्जिते रजोहरणेनाप्रमार्जिते वा निक्षेपाधिकरणं भवति सुप्रमार्जितं स्वेकतस्त्रिरिति तद्विपरीतं दुःप्रमार्जितमप्रत्ययेति शा-
ऽपलाद्वेत्यतो प्रत्यवेक्षिते दुःप्रमार्जिते देशे निक्षेपाधिकरणं सहसा निक्षिपतः अनाभोगोऽसन्तमपि सन्तं तिर्यग्दृ-
दं स्मरति प्रत्यवेक्षिते सुप्रमार्जिते च देशे निक्षेपमन्यं तथाविधमनिक्षेपाधिकरणमिति इदानीं संयोगाधिकरणद्वैविध्यमिद- १९०
र्शनाह संयोगाधि द्विविधमित्यादि तत्र भक्तमशनपानाद्यास्वाद्यभेदात् त्रिधा तस्य संयोजनं पात्रे मुखे वा व्यंजनगुडोपदंशा-

लवणादिनाम्नः तथा पानद्राक्षादिमद्यं पानकाद्यपि प्रासुकजलादिना शालादिव्यञ्जनं शर्करामरिचादिभिरेवं भक्तपानसंयोजनाधिकर-
णमुपकरणसंयोजनाधिकरणं संप्रति निसर्गाधिकरणत्रैविध्यप्रतिपादनायाह निसर्गाधिकरणमित्यादि कोऽयः शरीरमौदारि-
कादिभेदं तस्य निसर्गस्त्यागो यथा येन तस्तु न स विधिना यद्बुद्धं दनड इति यावत् शस्त्रपातनाग्निजलप्रवेशोद्बन्धनादिभिर्वा वोपित्यागःक्षेपणं
शर्करोपदेशात् ते सन्तमश्वेस्ववावादा पापारोपे शरीरादीनां सजीवनिसर्गाधिकरणत्वमुक्तं जीवाधिकरणे पात्मनः परिस्पन्दनः परि-
णामो योगः मूलगुणनिर्वर्तनाधिकरणे च संस्थानमात्रमेषामितीति विशेषः ॥९॥ अत्रोत्तरान्तं भवतेत्यादिना संबन्धमाचष्टे अत्राभ्या-
मात्माश्रवविचारे भवतोऽस्ति किमुक्तमिति उक्तमात्रवादं करोतीति सकषायाकषाययोर्बन्धकयोर्योगः कायादिव्यापारो साम्पां-
परायिकेर्यापथयोः कर्मणोराश्रवो भवति इति शाप एवं शास्त्रार्थ एवं प्रयुक्तं भवतीति सांपरायिकं चाष्टविधं ज्ञानावरणादिभेदेनाभिधी-
यते कर्मजातिभेदं व्यतिफलभेददर्शनात् संदेहबीजसंभवः तस्मात् प्रश्नं किं सर्वस्य ज्ञानावरणादेरष्टविधस्यापि कायादियोगोऽवि-
शिष्टः सामान्यलक्षण आश्रव आहोश्वित् अस्ति विशेषो भेदकर्मकर्मप्रतिकश्चिदस्तीति इतिकरणः प्रश्नेयत्तां दर्शयति अत्रोच्यते इ-
त्याचार्यः अस्ति भेद इति संगिरामहे यागस्यामान्येनाभेदेन भवत्यपि योगस्य सामान्येनैकरूपस्य उपलक्षणे प्रतिकर्म मात्रं प्रत्यविशेषः
कर्मजातेः फलभेदोऽन्यथा हारः कश्चिदेकरूपो जग्धः प्राप्य जठरं रसरुधिरमांसमेदोमज्जास्थिशुक्रमलविशेषभावेन परिणमते
तथैकप्रयोगवितस्य कर्मणः आश्रवभेदनं भवेत्यस्याष्टधा परिणामः प्रकृतिप्रकृतिं प्राप्येति प्रकृतिः स्वभावः किंचित्कर्म ज्ञानावरण-
स्वभावं किंचिद्दर्शनावरणस्वभावमित्येवमष्टविधमपि भिन्नस्वभावं बध्यते अतः प्रकृतिमाश्रित्याश्रवभेदस्तद्यथेत्यनेन तमाश्र-
वभेदं प्रतिप्रकृतिं प्रस्फुटीकरोति नाप्यक्रममयन्यत्र स्त्रीस्त्राचदाद्ययोः प्रकृत्योराश्रवभेदः तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनो-
पघाता ज्ञानदर्शनावरणयोः प्रदोषादयः कृतद्वन्द्वा अपि तत्प्रदेशेन संबिहितषष्ठीतत्पुरुषसमासाः सूत्रकृता निर्दिष्टाः तयोः प्रदोषाद-
य इति समासेनाभिनिर्दिशत्यसमासेपश्चादि पुच्छ्यन्ते तयोरिति कयोः प्रदोषादयः आश्रवा इत्याह ज्ञानदर्शनावरणयोरिति ज्ञानं
च दर्शनं च ज्ञानदर्शने आवरणमाच्छादयेते ज्ञानदर्शनावरणयोरिति एतमेवार्थं भाष्येण स्पष्टयति आस्रवो ज्ञानस्य ज्ञानवतामित्या-
दिना संयुक्तलक्षणमाश्रवस्तमभिसंबध्नन् प्रदोषादिना एकैकेनैकवचनान्तेनाह आश्रव इति कस्याश्रवः प्रदोषादिः किंवि-

तत्त्वार्थ·टी· यथोक्तेन सांपरायिकादि विविधकर्मबंधप्रस्तावात् प्रतिविशिष्टं तु एवमिव सामान्याश्रवाच्च प्रकृतिमेव संबध्नाति ज्ञानस्येति
१९१ ज्ञानस्य संबंधिनः प्रदोषादयो ज्ञानविषयास्तदावरणस्य कर्मण आश्रवा भवंति ज्ञानं चेतनात्मनः स्वरूपं इति तत्प्रतिपिपादयि
षयेदमाह एतैर्हि ज्ञानावरणं कर्म बध्यते यस्मादेतैः करणभूतैरध्यवसायविशेषैः प्रदोषादिभिरात्मनाश्च परिणामैः कर्म ज्ञाना
वरणाख्यं बध्यते उपादीयते गृह्यते तस्मादेवमाश्रवाद् स्वेव ज्ञानावरणाश्रवा नाम्यायत्तत्तुल्यत्वाद् दर्शनावरणस्यातिदेशं क
रोति एवमेव दर्शनावरणस्येति एवमनेन सूत्रेणातिदेशं प्रतिपादयति यथा ज्ञानावरणस्याश्रवाः प्रदोषादयस्तथा दर्शनावरणस्या
पि कर्मण एत एवाश्रवा बोद्धव्याः दर्शनं चक्षुरचक्षुरवधिकेवललक्षणं सामान्यमात्रोपयोगश्चेतनाविशेषः तस्यावरणं न बध्नाति
नद्योऽपि यथोक्तलक्षणाश्चक्षुर्दर्शनादि विघातकारित्वात् तदावरणमत्राप्युपधानस्तु इति शब्देनाध्यर्थेनालप्यस्वपनशीलता
निद्रादयः प्राणातिपातादयः परिगृह्यंते इति शब्दस्तु ज्ञानदर्शनावरणयोराश्रवेयत्ताप्रदर्शनार्थः एवमुक्तेन प्रकारेण दर्शनस्य
दर्शनवतां दर्शनसाधनानां च प्रदोषादय आश्रया दर्शनावरणस्य आश्रवा भवंतीति प्रतिपादितं ॥ ११॥ इदानीमसद्वे
द्यस्याश्रवाख्यसंबंधं यथानयोः कर्मप्रकृत्योरिंद्रियमोहनीययोराश्रवकलापस्तथा दुःखशोकादिभिर्भूतव्रत्यनुकंपादिश्च यथाक्र
ममसद्वेद्यसद्वेद्ययोराश्रवकलापोऽवगंतव्यः सूत्रद्वयेन दुःखशोकतापाक्रंदनवधपरिदेवनान्यात्मपरोभयस्थान्यसद्वेद्यस्य
॥१२॥ भूतव्रत्यनुकंपा दानं सरागसंयमादि योगः क्षांतिः शौचमिति सद्वेद्यस्य दुःखादयः कृतद्वंद्वाः षडप्याश्रवा भवंत्यसद्वेद
नीयस्य कर्मणः भूतव्रत्यनुकंपादयोऽपि पंचविहितद्वंद्वाः सद्वेदनीयस्य कर्मण आश्रवाः तत्र प्रथमसूत्रे तावद्दुःख
शोकतापाक्रंदनादि तत्र दुःखयतीति दुःखं बाधालक्षणं विरोधिद्रव्यांतरोपनिपातादिष्टवियोगानिष्टश्रवणादय द्वेषोदया
पघातः पीडालक्षणः परिणामः आत्मनो दुःखमित्यर्थः अनुग्राहकसंबंधविच्छेदे वैक्लव्यविशेषः शोकः अनिष्टमनोज्ञवियो
गादिष्वस्मिन्नानाविलापः करणस्य तीव्रानुशयपरिणामः तापः परितापसंयुक्ता अश्रुपातांगविकारप्रचुरविलापाभिव्य
क्तमाक्रंदनं प्राणिप्राणवियोजनं वधः कारुण्याभिधानश्च संक्लेशप्रवणं स्वपरानुग्रहलाघनमनुकंपाप्रायं परिदेवनं शोकाद १९१
यस्तु सर्वे दुःखजातीया एव तथापि व्याख्यानभिधानमकारि तत्र कारणं तद्विषयाऽसंख्येयत्वेऽपि कतिपयविशेषसंबंधेन तदा

३०

श्रयानादिति शब्दस्यार्थे आदिग्रहणाद्वा निरनुकंपत्वाद्यनेकविदेवनदमनबंधनगोपांगवेदनासंक्लेशजननतीव्रानुपरिणामप्राण
वधादयः परिगृह्यंते आत्मा च परश्चोभयं च तेषु स्थितानि दुःखादीन्यात्मपरोभयस्थानि तद्विषयाणीति आत्मस्थानीति स्वात्मनि वर्तमानानि
यथोक्तलक्षणानि दुःखादीनि स्वयं दुःखप्रणीतागमनिरपेक्षाण्यसद्वेद्यस्य कर्मण आश्रवा भवंति वेदयते तत्कर्मणोऽग्रहणमसदिति वेद्यते
अनेनेत्यसद्वेद्यमप्रशस्तत्वात् तथा परस्य क्रियमाणानि स्वात्मव्यतिरिक्तस्य चेतनावतः परार्थस्येत्यात्मनात्यैतान्येव दुःखादीनि स्वा
त्मपरयोरपि क्रियमाणान्यसद्वेद्यस्य कर्मण आश्रवा भवंति पूर्वं स्वात्मन एव दुःखाद्युत्पादयति शस्त्रपाटनाग्निज्वलनावपाता
दिना परस्मै वा वाग्दंडादिना दुःखमुत्पादयति उभयस्थानि त्वधर्मणः समवायेन स्वपरमर्मस्थितं निरोध परस्य तु जिक्रियानिष्ठा
उभयोः स्वपरयोर्दुःखादिसंवेदनेनैवमसद्वेद्याश्रवान्निरूप्य सद्वेद्याश्रवनिरूपणार्थमाह ॥१२॥ सर्वभूतानुकंपेत्यादि द्वितीयसूत्रभाष्यम्
सर्वप्राणिनः प्राणिनि भूतानि वेति सर्वभूतानि सर्वं स्वरूपप्रभवं बिभ्रंति वा एकेंद्रियाजीवायुवनस्पतिद्वित्रिचतुःपंचेंद्रियाः प्राणिनस्तेष्वनुकंपा दयाघृणे
त्यर्थांतरं आगारं गेहं कंडनीपेषणीचुल्लीउदकुंभप्रमार्जनी आधारयोगस्थानित्येतानां वाकार्पटिकादीनां गृहस्थलिंगाज्जनानामागारात्
इवाश्रमस्थो गृहिणस्तेषु गारं गृहस्थेष्वित्यर्थः तद्विपरीता अनगाराः कृतशिरस्तुंडमुंडा निष्क्रांताः कृतशिरस्तुंडमुंडा निष्क्रांताः सर्वपापसंविग्न
श्रावकाः सर्वारंभनिवृत्ता साजीवायतयस्तेष्वगारानगारेषु प्राणातिपातादिनिवृत्तिसंपन्नेषु अनुकंपादिशेषः प्रकृष्टानुकंपातिशा
वनीयत्वेषु तस्य कपानवस्त्रपात्राश्रयादेर्दानादथ वनीपकादिष्वगारिष्वनगारेषु च ज्ञानदर्शनचरणसंपन्नेषु त्वं कांतकर्मनिर्जराफ
लं भवति अथवानुग्रहबुद्ध्यादीकृतत्वेन परपीडामात्मसंस्थामिव स्वाभिकृतं तेनोक्तं भवनमनुकंपा स्यात् परानुग्रहाभिप्रायेणाति
सर्जनं रंजनादानं संज्वलनलोभादिकं षाः तत्सद्वर्णे विरागः संयमनं संयमः प्राणवधादुपरतिः सरागस्य संयमस्सरागसंयमो
मूलगुणोत्तरगुणसंपत् संयमासंयम इति यावत् संयमासंयमः स्थूलप्राणातिपातादिनिवृत्तिरणुव्रतगुणव्रतशिक्षाव्रतविकल्पा
विषयानर्थनिवृत्तिमात्रानिसाधेण तुर्व्रतः पारतंत्र्यादुपभोगादिनिरोधोऽकामनिर्जरा अकामस्यानिच्छतो निर्जरणं पापप
रिशाटः शुल्लपंकजलोपवासरज्जुबंधनमकामनिर्जराश्रुषः परिक्लय मिथ्याज्ञानोपरता शय्याः बालाः शक्तोऽत्र इव दिनादि
तपांसि परिहार्य विमुखा तपोजलानलप्रवेशं गिरिनिपातनगिरिविषभक्षण उपपातादिलक्षणं तेन ताः शायतपसा बालानां योगो बालत

तत्त्वार्थ·टी· बंधित्वा बालतपो विबालं तेन बालतपसा योगो बालतपोयोगः अथवा बालं तपो येषां ते बालतपसः लोकानिमतनिरवद्यक्रियानुष्ठा
१९२ नं योगः दंडनावनिवृत्तस्यार्थं योगानिधानं धर्मप्रणिधानां क्रोधनिवृत्तिर्मनोवाक्कायैः क्षांतिः क्रोधकषायोदयनिरोधः उदितस्य वा कथंचि
द्वैफल्यापादनं क्षमाभ्यः एवं चमेदादिनो देवादिकस्य क्षांतिरस्य यंत्रकमेव लोभकषायविशेषणं उपरमः शौचं यादृक्कषायस्तृष्णा
लक्षणं अंतरो मलस्तत्क्षालने शौचं शुचिभावः शुचिकर्म वा शौचं लोभकषायरुक्त्याल्यावायस्य संतोषवारिणा विमलत्वापाद
नं निरुद्धवाक्कायमनो कुशलप्रवृत्तेरपरणतपोनुष्ठायिनः साधोर्निर्जराफलं तदेकदेशानुष्ठायिनस्तु यद्देशास्रवस्तथाद्यमं शौचं स्नेह
गंधलेपापकर्षलक्षणं प्रासुकजलादिना क्रियमाणमास्रवः सद्वेद्यस्यत्युत्पाजायते हतत्राह इत्याकारार्थः आद्यर्थो वा धर्मानुरा
गाधर्मनिषेवणं शीलव्रतपोषधोपवासरतितपोनुष्ठानबालवृद्धतपस्विग्लानवैयावृत्त्यानुष्ठानधर्माचार्यमातृपितृभक्तिः सिद्धचै
त्यपूजाप्रभुपरिणामाद्यः सद्वेद्यस्यास्रवा भवंतीति ॥१३॥ एवमभिधायासद्वेद्यप्रकारस्य वेदनीयकार्मणः उपादानहेतूनधुना दर्श
नचारित्रमोहनीयमोहनीयस्य संसारपद्धतिलताबीजस्यास्रवहेतवमुच्यंते ॥१३॥ केवलिश्रुतसंघधर्मदेवावर्णवादो दर्शन
मोहस्य कर्मणो आस्रवो भवति भगवतामित्यादि भाष्यं षणमर्षादीनां ज्ञानाभिधानयोगाद्भगवंतस्तेषां भगवतामिति अर्थादयो
रूपेऽपि संभवतीति तद्व्यवच्छेदकं एवं परमर्षीणामिति प्रसूताः कृत्स्नमस्तप्रग्दर्शनज्ञानावरणसंपन्नास्ते वा केवलिनोऽपि संभवंती
त्यतः केवलिनामित्याह सकलज्ञानावरणक्षयप्रभूतस्य समस्तज्ञेयविषयो बोधः सादात्यस्थैदर्शितनापर्यायः केवलं तद्येषा
स्ते केवलिनस्तेषामवर्णो रागद्वेषमोहस्यमावेशाद्व्यभूतदोषोद्भावनमस्य वाक्यमो वा निंदाप्रख्यापनं वा वदनं वादो भाषणमवर्णस्य वा
९८ दोवर्णवादस्तत्रथादिगंबरत्वादिगतत्त्वपाकर्मोपयोगसाजः समस्तरणत्वमावक्कायत्यास्त्रमोदिनस्सार्वापायनिलुणोऽस
त्यतिदुष्करदुरपवरमार्गोपदेशिनः इत्याद्यवर्णज्ञापनं तत्त्वार्थश्रद्धानलक्षणं दर्शनं तन्मोहयत्याच्छादयतीति दर्शनमोहस्तस्यास्र
वो भवति मिथ्यात्वादेरित्यर्थः अर्हत्स्नामकर्मोदयादर्हंतस्तीर्थकरास्तैः प्रोक्तं सकर्णैर्णोपदिष्टमविपरीतं यथावस्थितद्रव्यानुया
रिक्तं कारणे कार्योपचारं कृत्वा प्रोक्तमित्युक्तं च वक्राह समुद्धये अंगानि द्वादश आचारादीनि दृष्टिवादांतानि उपांगानि औपपातिकप्रकृ १९२
तीसंगाणि उववादीनि अंगोपांगे वर्त्तिनद इति सांगोपांगं तस्य चश्रुतस्य सश्चवनस्यावर्णख्यापनं अविधप्राकृतभाषानिबद्धं वृत्तं

३१

कायमायावृत्त्य प्रमादस्मादोपदेशानुसन्दर्भता बकुलं कुत्सिता पवादप्रायमित्येवमाद्यवर्णज्ञापनं संकृतज्ञानस्येति चत्वारो वर्णाः साधु
संयतीश्रावकश्राविकाख्याः वर्ण्यंत इति वर्णा भेदास्तेभ्यश्चतुर्भ्यो वर्णेभ्यश्चातुर्वर्ण्यं संघो गणः अथवा सम्यक्त्वज्ञानसंवरतपांसि
चत्वारो वर्णा गुणास्तद्वच्चातुर्वर्ण्यः चतुर्णां वा वर्णानामयं चातुर्वर्ण्यसंघः न तु पुनस्त्रिष्याणां [illegible] वा तस्य चतुर्विधस्य संघस्यावर्णः
साधवस्तावत्स्नान्यावज्जीवं चवदारपरायणाः [illegible] शौचवाह्याः [illegible] जनितकर्मोदयजनित [illegible] वंतापनदःस्वा
नुभविनः कलहकारिणो ऽस्नाचाः [illegible] विदुःषिता एवमन्ये व्यंतीत्यवर्णज्ञापनमवमेव संयतीनामवर्णज्ञापनं तथा श्रावकश्रा
विकाणामपि [illegible] मनेकप्रकारं स्नानं धर्मार्थिमेषामन्ये द्विजातिभोजनं सपादिकरणं हरिकेशकल्पः खल्वेते गार्हस्थ्ये [illegible]
नि स्नायतामित्याद्यवर्णप्रकाशनं सामान्येन चास्य संघस्यावर्णख्यापनं काकशृगालसारमेयाणामपि संघाः संघ एवोन्मतेः [illegible] संघो मो
[illegible] तीर्थकरानंतरत्वात्संघः सपर्याद् [illegible] परिकल्पनमात्रमित्याद्यवर्णज्ञापनं प्रगटीकरणं तथा
पंचमहाव्रतसाधनस्य धर्मस्यावर्णवादोऽवर्णभाषणं पंचसंख्यापरिच्छिन्नानि महाव्रतानि [illegible] जायंते नानि साधनमस्य धर्मस्य पं
चमहाव्रतसाधनः मनोवाक्कायैः कृतकारितानुमतिभिः प्राणवधादिनिवृत्तयो महाव्रतानि रजनीभोजनाद्यन्यकर्म [illegible] निवृत्तिर
गुणाद्येषां महाव्रतैरेवातः कृमादेदशलक्षणकस्य धर्मस्यावर्णवादो दर्शनमोहस्यास्रवो न पश्चविशेषमादर्शमानस्य मायास्त
प्रणीतस्य वा माऽसंनमकः पुनस्तस्यापवादः अस्फुटयापवर्गदृष्टिर्धर्मोनिश्चस्फुरादिना प्रमाणेन विषयीक्रियते न चाप्रमाणको
स्तीति वक्तुं पार्यते न च पुद्गलाः धर्मः [illegible] देवतानात्मपरिणामो धर्मः आत्मपरिणामग्राह्यत्वात्क्रोधादिपरि
णामवदित्याद्यवर्णभाषणं चतुर्विधानां च देवानामवर्णवादः चतस्रो विधा येषां ते चतुर्विधाः भवनपतिव्यंतरज्योतिष्कवैमा
निकाः [illegible] तेषां वावर्णवादो दर्शनमोहस्यास्रवः परस्परप्रवीचाराः खलु देवाः [illegible] बलवंतो ऽपि बलं देवमध्य
[illegible] भूतदोष [illegible] शोणितवल्भपहारात्रिनो देवाः [illegible]
दः [illegible] देवानामवर्णवाद इति [illegible] मिथ्यात्वपरिणामोन्मार्गदे
शनधार्मिकजनताद्रूषणं सर्वज्ञसिद्धदेवान [illegible] कारिताः संयतपूजाप्रयोगः दर्शनमोहस्य सं[illegible]संसारपरिवृद्धिमूल

तत्त्वार्थ टी. निमित्तस्यानंतसंसारानुबंधिनो मिथ्यात्वरूपास्रवा दृष्टाः ॥ छः ॥ अथ चारित्रमोहस्य क आस्रव इत्युच्यते ॥ छ ॥ कषायोदयात्तीव्रात्मप
१९२ रिणामश्चारित्रमोहस्य कषायाः कोपादयस्तेषामुदितिरुदयस्तस्य निमित्तत्वेनापदिश्यते सकोपादेः कषायस्य तीव्राः प्रकृष्टाः
परिणामा आत्मनोवस्थाविशेषाः शब्दादिविषयेषु गर्धीर्ष्यालुत्वमनृतवादित्वं वक्रतापरदाररतिप्रियास्त्रीवेदबंधहेतवः ऋजु
समाचारतामंदक्रोधकषायादिना स्वदाररतिप्रियता अनीर्ष्यालुत्वं पुरुषवेदबंधहेतवः तीव्रक्रोधादिना पशूनां वधच्छेदनमुंड
नरतिस्त्वंस्त्रीपुरुषयोरनंगसेवनशीलताशीलव्रतगुणधारिणां पाखंडिभिक्षुप्रमिथारिणीकारिता तीव्रविषयानुषंगिता न
पुंसकवेदबंधहेतवः उत्प्रहसनदीनाभिलाषिताकंदर्पोपहसनबहुप्रलपनशीलताहास्यवेदनीयस्यास्रवः स्वशोको
त्पादशोचनपरता आविष्करणशोकमहाकृतानिनंदिता शोकवेदनीयस्य विचित्रपरिक्रीडनपरचित्तावर्जन बहुविधरमण
पीडाऽभावदेशाद्योत्सुक्यप्रीतिसंजननादी निरतिवेदनीयस्य परराजप्रादुर्भावनरतिविनाशपापशीलताऽकुशलक्रिया
प्रोत्साहनादयस्त्वरतिवेदनीयस्य स्वयंभयपरिणामपरभयोत्पादननिर्दयत्वत्रासनादी भयवेदनीयस्य सद्धर्म
प्रसक्तचतुर्वर्णविशिष्टवर्गकुलक्रियाचारप्रवणजुगुप्सापरिवादशीलत्वादयो जुगुप्साया आस्रवा भवंति कषायोद
यादित्यादिनोक्तं कषः संसारः कर्म वा तस्यायास्ते कषायास्तेषामुदयो विपाकस्तस्मात्कारणाद्भूताद्यस्तीव्रः प्रकर्षप्राप्त आत्मनोऽविशुद्धः
परिणामश्चारित्रमोहस्यास्रवो भवति तथा परमधार्मिकाणां साधूनां गर्हणा धर्माभिमुखानां च विघ्नकारिता देशविरत
जनांतरायकरणेन मधुमद्यमांसविरतिगुणदर्शनेन चारित्रगुणसंदूषणेनाचारित्रगुणदर्शनेन परस्य कषायनोकषायोदी
रणेन वरणगुणोपघातकारि कषायनोकषायवेदनीयं चारित्रमोहं बध्नातीति ॥ छ ॥ अथायुष्कचतुष्टयस्य यथायथं क आस्र
व इत्येतदुच्यते वक्तव्य इतीदं सूत्रचतुष्टयमायुषो नियतकालपाकस्य ॥ छ ॥ बह्वारंभपरिग्रहत्वं च नारकस्यायुषः बहुविपुलः प्रकृतः आरंभ
मारंभः प्राणिप्राणव्यपरोपणं अनवरतकंडनीपेषणीचुल्लीउदकुंभप्रमार्जनीव्यापारो वा बहवश्चासावारंभश्च बह्वारंभः परिग्रहणं परि
ग्रहो मूर्छा गार्ध्यं ममत्वमंतरंगं शरीरादिषु बाह्येषु च वस्तुषु क्षेत्रवास्तुहिरण्यसुवर्णादिषु स एव बहुश्चासौ परिग्रहश्च बहुपरिग्र १९२
हः तयोर्बह्वारंभपरिग्रहयोर्भावो बह्वारंभपरिग्रहत्वं तथा परिणामश्चात्मनश्चशब्दः समुच्चिनोति नामैकदेशेन दर्शयति मि

वश्चायं च प्रत्येकमभिसंबध्नाति बह्वारंभता बहुपरिग्रहता चेति नारकाः पापकर्मणां सत्त्वानामधिवासा अनादिकालप्रसिद्धास्तेषु
भवा नारकास्तेषां नारकाणां यद्दुष्टीवितं तत्र तस्यास्रवो भवंति तेषु नारकेषु भवं यदायुरिति संबंधः अपरे तु बह्वारंभाः परि
ग्रहाश्च यस्यासौ बह्वारंभपरिग्रहस्तस्य भावो बह्वारंभपरिग्रहत्वं चशब्दादमी मोक्षपथकारणद्वयमभिसंबध्नाते कृष्णपापरागस्य बलारि
त्वमप्रत्यक्षपंचेंद्रियवधकत्वमपादश्चेत्यस्मिन्सूत्रे जात्यंतं न प्रमितं स्यात् अपरे त्वाचक्षते बह्वारंभपरिग्रहत्वं चशब्दात्कषायोद
यात्तीव्रपरिणामश्च उच्यते एवमेव बह्वारंभपरिग्रहग्रहणपरं पंचेंद्रियवधः शास्त्रविनाशाविनो बहुशो नारकायुष आस्रवाः
तथैवप्रपंचमानानेदमनेकं प्रतिपद्यंते मिथ्यादृष्ट्याश्लिष्टाचारता गिरिराजिशैलस्तंभकीवकटुंगग्रंथिकृमिरागसदृशकोपादि
कषायता परपरितापकरप्रतिध्यानवधबंधनाभिनिवेशानृतवचनपरद्रव्यादानाविरतमैथुनोपसेवा स्थिरवैरावशेंद्रियनिरनुग्र
हत्वाल्पकृष्णलेश्यापरिणामरौद्रध्यानानामास्रवप्रपंचो नारकस्यायुषः ॥ छ ॥ उक्तो नारकस्यायुषो हेतुस्तस्मनंतरं तैर्यग्योना
युष उच्यते ॥ छ ॥ माया तैर्यग्योनस्य माया शाठ्यं वक्रता मनोवाक्कायक्रियाकुटिलता ग्रंथिरूपा तिर्यंचः पृथिव्यप्तेजोवायुवनस्पति
द्वित्रिचतुःपंचेंद्रिया नारकमनुष्यदेववर्जास्तेषां योनिस्तिर्यग्योनिः तिर्यग्योनौ भवं तैर्यग्योनमायुस्तस्यास्रवो जाय
ते माया मिथ्यात्वावष्टंभाधर्मदेशनानारंभपरिग्रहकूटकर्मनीलकापोतलेश्यापरिणामार्तध्यानानामार्गप्रज्ञापना मार्गप्रणाश
सातिचारव्रतशीलता बहुधाराजिसदृशकोपाद्यल्पारंभः साधूपस्थापनायेकाकमाः खलु मायायाः कृतं
ग्रहणं सूत्रकारेण स्पष्टीकृतमेव भाष्यकारेणेति ॥ छ ॥ उक्तस्तैर्यग्योनायुष आस्रवोऽथ मनुष्यायुष आस्रवः क इत्यु
च्यते अल्पारंभपरिग्रहत्वं स्वभावमार्दवार्जवं च मानुषस्य आरंभपरिग्रहलक्षणे अल्पः स्तोकः अल्पारंभपरिग्रहयोर्भावः अल्पारं
भपरिग्रहत्वमात्मनो मंदपरिणामतारंभे परिग्रहे वा स्वभावः सहजो धर्मः सहजं मार्दवं न तु द्वात्रिंशत्प्रकृत्ये जातिकुलरूपबललाभ
बुद्धिवाल्लभ्यकश्रुतमदस्थानैर्गर्वविरहितः मृदोर्भावो मार्दवं मृदुता तथा सहजमार्जवमृजोर्भावो यथावस्थितमनोवाक्कायविषय
वक्रतात्यागः चशब्दः कारणांतरसमुच्चिनोत एतदेव भाष्येणाप्युच्यते अल्पारंभपरिग्रहत्वमित्यादिना अल्पारंभत्वमल्पप्राणातिपा
तार्थगुणधिकत्वमल्पपरिग्रहत्वमल्पे शब्दादिविषयाल्परागता स्वभावमार्दवं सहजैव भद्रता स्वभावार्जवं प्रकृत्यैवर्जु

तत्त्वार्थ टी. तावद्ग्राहमिथ्यादर्शनाति विनीतस्वभावप्रज्ञापनीयता बालुकाराजिसदृशरोषता अग्रगताऽप्रमिताभिमानता स्वभावमार्दवता लोकयात्रानु
१९४ ग्रहो मध्यस्थगुरुदेवतातिथिपूजासंविभागशीलता कापोतलेश्यापरिणामधर्मध्यानध्यायिता मध्यपरिणामता च मनुष्यायुष आस्रवो
भवतीति॥१८॥ किमेत एवास्रवा नारकादीनामथ अन्येऽपि संतीत्याह॥१९॥ निःशीलव्रतत्वं च सर्वेषां॥ निःस्वभाववचनः शीलमुत्तरगुण
संपत्कल्पानि शीलं प्राणातिपातादिनिवृत्तिनिर्वृत्तानि व्रतानि ताभ्यां रहितो निर्गतः स्वभावस्तथा संबंधनोपयोगसंबध्यते निःशीलत्वं निर्व्रतत्वं च सर्वे
षां नारकतैर्यग्योनमानुषाणामायुषस्त्वास्रवो भवति चशब्दात्पूर्वोक्तहेतुपालनापेक्ष्यते एतदेवस्वाभिप्रायस्पष्टयति निःशीलव्रतत्वं चे
त्यादिना शीलव्रतयोरभावः शीलव्रतत्वमात्मनस्तथाविधः परिणामस्तद्वन्तो निःशीलव्रतत्वं सर्वेषामिति विशेषसंयोगेऽभिहितान्येव
संबध्यते नारकतिर्यग्योनिमनुष्याणामायुषामास्रवो भवति नारकादित्रयायुषामेव चास्रवो यथोक्तानि चेति चशब्दमाचष्टे यथा
प्रागनारकादित्र्यायुषामास्रवहेतुकानि बह्वारंभपरिग्रहत्वमायाल्पारंभपरिग्रहत्वस्वभावमार्दवार्जवकारणानीति अथ देवमप्यायुः सर्व
शब्देन किं नाक्षिप्यते भोगभूमिजा मनुजा योजिते वा मिथ्यादृष्टयो निःशीलव्रता अपि मृत्वा देवेषूपपद्यंते न च तेषामणुव्रतम
णुव्रतं बालतपोऽकामनिर्जरा सम्यग्दर्शनानां कश्चिद्देवायुषो हेतुरस्ति अथ समर्णानंतरं देवं स्यात्समासाद्यं नीत्यतथा कश्चिद्देवायु
ष आस्रवो वाच्यः सच तावन्निःशीलव्रतत्वादिति ते हि शीलव्रतरहिताः प्राणातिपातादिभ्योऽनपगतास्ततो मध्यवर्तिनास्व
रूपेण वत्रपं देवायुरस्य मेवं विधं चाभ्यंतरस्य नो विद्युतो प्रयुज्य व्याख्याय आगमं कार्यमिति॥१९॥ अथेत्यादिसंबंधः अथ आस्रवाभि
धित्सुत्वनारकतिर्यग्योनमानुषायुषो भास्रवो भेदितः अनंतरं देवस्यायुषो वाच्यस्तत्राऽनंतर्यमथशब्देन प्रतिपादयति देवाना
मिदं देवमायुस्तस्य कस्मास्रवद्भूतिकरणस्वपरिणामतेरवद्योतकः अत्र एषेऽभिधीयते॥२०॥ सरागसंयमासंयमाकामनिर्जरा
बालतपांसि देवस्य सरागसंयमादयश्चत्वारः कृतद्वंद्वाः सूत्रेणोपात्तास्ते च स्वभावी देवस्यायुष आस्रवा भवंति आत्मकारणोपन्यस्ता
एव ते व्याख्याताः सद्देयासि आस्रवस्तावेध्यनानुस्यमेव प्रपंचतो व्याचष्टे संयमो विरतिर्व्रतमित्यादिनाभ्यंतरपर्यायमेरभाव
साधनः संयमनं संयमः सम्यग्ज्ञानपूर्विका विरतिः प्राणातिपातादिपापस्थानेभ्यो निवृत्तिर्नियमो व्रतमित्यनर्थांतरं रागः संज्वलन १९४
कषायतत्स [illegible] देशविरागस्तस्य संयमः सरागसंयमः इतिकरणो नियमनिरूपाद्यनेकपर्यायोपलक्षणार्थः अन

33

र्थांतरमित्यनेनैकार्थाभिधायित्वं सूचयति पर्यायशब्दानां कतिप्रकारं च नसद्भूतं किं लक्षणं चेति एतदेवदर्शयति॥ हिंसानृतेत्यादि हिंसादयः पं
चकृतद्वंद्वाः पंचमीबहुवचनेन निर्दिष्टाः पंचमी च विरामार्थानां प्रयोगेऽभिहिता हिंसादिभ्यो विरमणं यत्तद्व्रतमेवं च ख्यातेत्याचष्टे यथा प्रागा
येत्यादि इति शब्दश्चव्यवमित्यस्यार्थे एवमेष सरागसंयमो देवस्यायुष आस्रवो भवति संयमासंयमः उक्त श्रोद्धेमुचितकारणेन निवृत्तिकावि
प्रवृत्तिः स्थूलप्राणिविषयसंकल्पकृतप्राणव्यपरोपणनिवृत्तिमेव प्रतिजानीते गेही तत्त्वार्थः सजपाणिप्राणव्यपरोपणविरमणं चिं
गिरातत्तस्यैवंविधस्य संयमासंयमस्य पर्यायानाचष्टे देशविरतिरणुव्रतमित्यनर्थांतरं संपूर्णप्राणातिपाताद्येकदेशो देशः स्थूला
त्प्राणातिपातादिरमामीत्येवं मम प्रत्यापिदृष्टव्यं प्रपंचसुवक्ष्यते समामाधायेऽणुव्रतद्वंद्वं च अणुव्रतं अणुस्तोकं देशनिवृत्ति तं
इतिकरणेनागारिधर्मादिपर्यायाक्षेपः एतच्चकिमिदेवस्य कलं व्याख्यायते तेनाह देशसर्वतइत्यादि देशतो विरतिरणुव्रतं सर्वतो वि
रतिर्महाव्रतमेवं वक्ष्यते सप्तमाध्याय एव संक्षेपतश्चैष देवायुषः संयमासंयम आस्रवः कामइच्छा सेव्या सर्वकारिता तदर्थो
पभोगस्ताजो या निर्जरा साकामनिर्जरा निर्जरा कामदुःजलपरिणतिः न कामनिर्जरा अकामनिर्जरा अनभिलषतो विनयत एव
कर्मपुद्गलपरिशाटः सा च पराधीनतयानुरोधाद्वाकुशलनिवृत्तिराहारादिनिरोधश्च अकुशलं पाप नवत्वान प्रवर्तन लंघनो
परोपणकर्दमस्फोटनादि तत्र चानवनाम्नहीतो न गडादिसंयतः कर्तुमसमर्थो विरोद्धव्यवसायी न च प्राणातिपातादिभ्यो निवृत्त्या
नो पितेन प्रवृत्तः परवशत्वान्नास्त्यादिनव च विधा हारः आदिग्रहणात् शिशिरकाले निरावरणदेशावस्थापितो पहृतप्रावरणः
शीतसंपातमधिसहते ग्रीष्मेऽपि तीव्रतिग्मांशुसंगतस्तिष्ठन् स्वेदसलिलमानसं स्नानोपनीततपत्राणः चशब्दः समुच्चितोऽनुरोधा
दुत्स्वनुरोधाद्विलपं प्रीतिर्वैरिभिर्मित्रस्वजनादेरापदि नातायामपरोयरातद्धनुरोधात्सोढवानितोऽथ पिंडविशेषोऽकुशलनिरोधमाति
ष्ठते अरतिपरिगतश्च पृथक् चतुर्विधाहारविन्दुविपरिणामो देवस्यायुष आस्रवे वर्ततइति बाल्यं राग द्वेषाभ्यां मिथ्यादर्शनमह
वर्तिष्यामाकलितो बालः सत्त्वावबोधपराङ्मुखः तस्य पर्यायिकतंकरोति बालो मूढ इत्यनर्थांतरं मूढो विविक्तः अतत्त्वे तत्त्वाभि
निवेशात्सन्निर्यथावस्थितः द्वयान्नकृतः कुशलद्वानः शोषमिविशब्दादिप्राप्त्याघ्याते तस्य तपो बालतपः इत्यनेन षष्ठीसमासप्रदर्शि
तेन समानाधिकरणनिमित्तनैवं दर्शयति बालं च मन्तपश्चेति बालतपः बालमस्य मर्थसन्मार्गप्रतिपादने सकलकर्मद्वये

वालतपो बालस्याविमूढस्य यत्तपस्तद्बालतप इति कीदृक्पुनस्तदित्याह तत्राग्निप्रवेशेत्यादि अग्निप्रवेशो मरुप्रपातो मरुभ्यः पतनं मरुदर्शभृगुः
१९९ नदीगिरितटाद्यधोदेशो वा तत्र पतनं प्रपातः जलप्रवेशो जले निमज्जनम् आदिग्रहणात् बालाद्यज्ञानमरणाद्यासोद्वंधनगरदुःस्थान
शास्त्रपाटनविषभक्षणमरणादिपरिग्रहः तदेवमित्यादिनाप्रमस्तमेव सूत्रार्थमुपसंहरति तदित्यस्मादेवमित्यनेन प्रकारेण सरा
गसंयमसंयमासंयमादीनि वेति सरागसंयमस्य प्राप्तपर्यायाप्यार्थसोदलोपादानं दुःसरेणांतिकृष्टत्वाद्यथाक्रमं प्रमस्योपादानमा
दिग्रहणादिकामनिर्जराबालतपसी आस्रवत्वेनाह सूत्रार्थः देवस्यायुष आस्रवा भवंतीति पर्यंतवर्तिनेति नेतिकरणेन
देवायुराश्रवविस्तारोद्देशः कल्याणमित्रसंपर्कधर्मश्रवणगौरवतपोभावनापात्रदानमरणसमये पीतपद्मले
श्यापरिणामाऽव्यक्तसामायिकविराधितसम्यग्दर्शनादिवं दैवस्यायुष आस्रवा इति॥छ॥ एवं ज्ञानदर्शनावरणवेद्यमोहायु
षामास्रवाः क्रमेणाभिधाय नामास्रवाभिधानानंतरं प्रस्तावात् अथ नाम्नः कः आस्रवः इति करणः प्रश्नपरिसमाप्तौ अत्र प्रश्ने यथा
वसरविते अभिधीयते तस्य प्रकारद्वैविध्यात् तत्रादावशुभनामकर्मणो आस्रवस्तावदभिधीयते॥छ॥ योगवक्रता विसंवादनं चा
शुभस्य नाम्नः योगः आत्मप्रभावात्त्वा शक्तिरूपात्मनः करणविशेषः कायवाङ्मनोलक्षणस्तस्य मनाकौटिल्यप्रवृत्तिः स्वा
यमेव योगवक्रतानार्जवप्रणिधानं मायाविनं योगपर्यायाद्भूत्वार्थांतरं विसंवादनं तस्य व्याख्यापगमेतदपरे वोपाये
न व्यापनं वचनाद्युक्त्यविशेषस्य सूत्रार्थमशुभं यन्नामकर्म नरकगत्यादि तस्य त्रिंशद्भेदं तस्याश्रवो भवतीत्याम्ब्य
लेनदेवमक्षरयति कायवाङ्मनोयोगवक्रतेत्यादिना कायादयः कृतद्वंद्वास्तेषां वक्रता कायादिगतो मायाव्यवहारः प्रश
प्रतिपन्नोत्तद्विपरीतप्रतिज्ञापनमापारो विसंवादनमशुभनामकर्मण आस्रवः कायस्य तावद्वक्रता मनविकष्टांग
प्रत्यंगावयवाकृतिनिकेतनं नाट्यानांगमलक्षणाधिविदूषकस्त्रीमुद्रनजात्यनुकृतैतकस्कंदनदराजर्षिविशेषावनाशैरसज्जावोज्जवनं वक्रतावा
ग्वक्रता यथाजातः स्वभावबाग्विषयोपरतभावः गीतमातवचार्णवविषयवाद्यनामार्यालमनार्यालंवत खवेविडंबना परतामनोवक्र
तात्मैदैवमनसिप्रवस्तापत्नीकपंक्तिपूजामत्कारास्याजिह्वादीनां विकालाभाद्यासप्राकारतत्पर कार्येन्द्रवेपते एवं स्वविषयैव योगवक्रताविसं १९९
संवादनं तु परविषयं तद्यथा विसंवादनं निर्दिदिष्टौतिं तस्मार्थस्यावस्थितस्य भावस्यान्यथाकरणं विनापूर्वयोर्मित्रयोर्विप्रलंभादीति प्रयोगः परस्य

रंग्नीतिचेदकरणं वा विसंवादनं एवमेते कायादिविकल्पा नाम्नो ऽशुभस्यास्रवा भवंतीति अनुक्तसमुच्चयार्थो वा चशब्दः मिथ्यादर्शनामायाप्रयोग
पि नास्थिरचित्तता कूटमानतुलाकरणसुवर्णादिप्रतिरूपकत्वादुत्पन्नकूटसाक्ष्यदानांगोपांगव्यावर्तनवर्णगंधरसस्पर्शादन्यथापादनयं
त्रपंजरक्रियानिकृतिभूयिष्ठता परनिंदात्मप्रशंसा मारणानृतवचनपरद्रव्यादानमहारंभपरिग्रहोज्ज्वलवेषरूपमदपरुषासभ्यप्रलाप
क्रोशामौखर्यसौभाग्योपघातवशीकरणप्रयोगपरकुतूहलोत्पादनालंकारदानचैत्यप्रदेशगंधमाल्यधूपादिचौर्यविडंबनोपहासेष्टका
पाकदवाग्निप्रयोगप्रतिमायतनप्रतिश्रयारामोद्यानविनाशनतीव्रकषायपापकर्मोपजीवनादीनि वाऽशुभस्य नाम्नः आस्रवा इति॥छ॥
अथ शुभनामकर्मणः क आस्रव इत्यत्राह॥छ॥ विपरीतं शुभस्य विपरीतमित्येतदेवोन्नयमनंतरसूत्रोक्तमास्रवद्वयं विपरीतं सदवक्र
तायोगानां प्रस्पष्टयोगान्यार्जवयुक्तयं अविसंवादनं वा विप्रलंभनमसंतारणं परस्य विपरीतग्रहणादेवचशब्दप्रसिद्धिते वैपरीत्य
ग्रहणमपि धार्मिकदर्शनसंभ्रमसंसारभीरुताप्रमादवर्जनसद्भावार्पणक्षमादिवादयः शुभस्य नामकर्मणोऽनुष्णगस्पादेः प्र
तिग्रहादयश्चास्रवा भवंतीति॥छ॥ किं चान्यदित्यनेन संबंधमाचष्टे अन्यदप्युक्तं विशेषेण तीर्थकरनामसामान्येन शुभनामक
र्मण आस्रवे प्रतिपादिते एवं किं त्वनुपमशक्तिप्रभावस्य त्रिप्रकारातिशयविशेषत्रैलोक्याविभूतिविजयिनस्तीर्थकरनाम्न इमे
आस्रवा वेदितव्या॥छ॥ दर्शनविशुद्धिर्विनयसंपन्नता शीलव्रतेष्वनतीचारोऽभीक्ष्णं ज्ञानोपयोगसंवेगौ शक्तितस्त्यागतपसी
संघसाधुसमाधिवैयावृत्त्यकरणमर्हदाचार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना प्रवचनवत्सलत्वमिति तीर्थ
र्थकृत्त्वस्य परमप्रकृष्टदर्शनविशुद्धिरित्यादिनाष्टं परमामित्यतिशयेन युक्तं प्रकृष्टप्रकर्षपर्यंतवर्तिनी परिस्फुटशंकादिदोषाशं
कादयश्चत्वारो मलाः सम्यग्दर्शनमलाः कात्रुनरसौ परमप्रकृष्टेत्याह दर्शनविशुद्धिरिति तत्त्वार्थश्रद्धानं सम्यग्दर्शनं शुक्लक्षण
विधानं दृष्टिदर्शनं तत्त्वविषया रुचिः श्रीतिश्रीवादिभ्यः प्रत्यावधारणं तस्य दर्शनस्य नानाशुद्धिर्निर्मलता यथा नाना विचित्रं विचित्रमि
ति दायोपशमिकक्षायिकौपशमिकसम्यग्दर्शनानां यथास्वं नानाविशुद्धिर्विशुद्धिस्तीर्थकरनामकर्मण आस्रवः विनयसंपन्नतेति विनी
यते नाष्टप्रकारं कर्मेति विनयः स च ज्ञानदर्शनचारित्रोपचारभेदेन चतुर्धा तत्र ज्ञानविनयः कालबहुमानोपधानादिः दर्श
नविनयो निःशंकनिःकांक्षादिभेदः चरणविनयः समितिगुप्तिप्रधानः उपचारविनयोऽभ्युत्थानासनप्रदानांजलिप्रग्रहादिभेदः

एवंविधेन विनयपरिणामेन परिणतः कर्ता विनयसंपन्न उच्यते तद्भावो विनयसंपन्नता सा च तीर्थकरनामकर्मण आस्रवः स्यादस्मन्
मुच्चयार्थः तथा शीलव्रतेष्वात्यंतिकोऽत्रानमप्रमादोऽनतीचारः शीलमुत्तरगुणाः पिंडविशुद्ध्यादिसमितिभावनातपःप्रतिमाभिग्रहलक्षण
मूलगुणाः समाधिहेतुत्वाच्छीलशब्दाभिधेयाः व्रतग्रहणेन च महाव्रतानि रजनीभक्तविरतिपर्यवसानान्याद्रियंते शीलानि व्रतानि तानि
तेष्विति तद्विषयः आत्यंतिकोऽत्यंतभवः संयमप्रतिपत्तिकालादारभ्य यावदायुषः क्षयस्तावदविच्छेदाद्भवसात्यंतिको प्रमादः सं
बध्यः इत्याभिति प्रकर्षवचनः प्रकृष्टोऽप्रमादोऽत्यंतमप्रमादः विकटेंद्रियविकथाकषायनिद्रालक्षणः पंचधा प्रमादः अनेन स्यावि = मद्य १
ष्टो जीवः कार्याकार्यविमूढत्वाद्धायकर्मादि प्राणातिपातादि वा परिहर्तुमक्षमो भवति तदप्रमादः प्रमादपरिवर्जनमप्रमत्तता अन = विषय २ = कषाय ३
तिचार उच्यते अतिचरणमतिचारः स्वकृतागमातिक्रमणातिचारो न तिचारः नु सर्वोपवादात्मकः सर्वज्ञप्रणीतसिद्धांतानुसारितया शी = निद्रा ४
लव्रतविषयानुष्ठानमित्यर्थः एतच्च तीर्थकरनामकर्मण आस्रवः अभीक्ष्णं ज्ञानोपयोग इति अभीक्ष्णं मुहुः प्रतिक्षणं ज्ञानं वाद = श्रुपघात ५
शांगं प्रवचनं प्रदीपांकुरावस्थानादवलंबनीयं तत्रोपयोगः प्रणिधानं सूत्रार्थोभयविषयमात्मनो व्यापारस्तत्परिणामितेति भा
वत् वाचनाप्रच्छनानुप्रेक्षाम्नायधर्मोपदेशैः स्वस्यानंतीर्थकरनामकर्मण आस्रवः संवेगश्चेति अभीक्ष्णमिति संबध्यते चशब्दः
समुच्चितो संवेजनं संवेगो भीतिर्विजनं वा संसारदुःखाज्जातिजरामरणशोकाभावाप्रियविप्रयोगादेश्च भयपरिणामः प्रतिक्षणं जग
त्कायानित्यताशुचित्वादिचिंतनाद्वा सांसारिकसुखेषु निरभिलाषस्तस्य भवपरिणामादिवजनं संवेगः अभीक्ष्णं तादृशः परिणामः स
मुपजायमानस्तीर्थकरनामकर्मण आस्रवः यथाशक्तित्याग इति शक्तिः सामर्थ्यमनुत्कर्षः यथास्वात्मरूपाशक्तिर्यथाशक्ति
स्तत्पूर्वकं त्यागः स्वात्मरूपशक्त्यपेक्षस्य स्वस्यार्जितस्यानुकंपानिर्जरार्थं पात्रे प्रदानं दानं तच्च त्रिविधं विशेषतस्तु विधिनायतिज
नायदानं त्यागस्तीर्थकरनामकर्मण आस्रवः तपश्चेति यथाशक्तीति संबध्यते कर्मणस्तापनाच्छोषणात्तपस्तद्द्विधा
तद्बहिर्भेदाभ्यंतरभेदेनैकैकं षोढा प्रायश्चित्तादिभेदादनशनादिभेदाच्च तत्स्वसामर्थ्यापेक्षमनुष्ठीयमानं लोकपंक्तिपूजाभिलाषरहि
तक्षणेनैव तत्तीर्थकरकर्मण आस्रवः संघः समुदायः सम्यक्ज्ञानदर्शनचारित्राणां तदाधारश्च साध्वादिश्चतुर्विधस्तस्य समाधानं स्वस्था ११६
तानिरूपद्रवत्वं समाधिस्तस्य करणं जननमुत्पादनं तत्करोति येन ज्ञानदर्शनचारित्राणां वृद्धिर्भवति दिवसमनाबाधश्च साधु

संपत्तीर्दर्शयति उद्भवजीवितः दर्शनचारित्रलक्षणाभिः पौद्गलिकाभिः शक्तिभिर्मोक्षं साधयंतीति साधवः तेषां वैयावृत्त्यकरणं व्या
पृतस्य कार्यमनुष्ठानं प्रवणस्तस्य भावो वैयावृत्त्यं साधूनां मुमुक्षूणां सापकाररोपधिशय्यासनभोजनविश्रामणादिभि
रर्दर्शनचारित्रस्य मनोवाक्कायैः शुद्धः परिणामो वैयावृत्त्यमुच्यते चशब्दः समुच्चये अथवा संघसाधुकस्य समाध्यासादनं अन्या
वच्छिन्नपरिणामः परमात्मभावस्तस्य विशुद्धिर्निर्मलता अथवा परमात्मासौ भावविशुद्धिश्चतक्षमाभक्तिः स्वगुणसंदोहरूप्यम
स्तसुरासुरवृंदवंद्यैश्वर्यविभवसामर्थ्ये सन्मार्गोपदेशात्परमोपकारित्वात्तत्र मनःपरिणामविशुद्धिः सर्वविकाभक्तिः सन्नतास्तिशा
यो कीर्तनवंदनसेवानुष्ठानधूपगंधपुष्पार्चनायतनप्रतिमाप्रतिष्ठापनस्तपनविधिरूपा तीर्थकरनामकर्मण आस्रवः पंचविधाचा = ज्ञानाचार १
रानुष्ठानाच्चाजिनाचरणीयोपदेशाच्चाचार्याः धर्मोपदेशादीक्षाव्रतोपदेशादिग्राहकाः आम्नायवंतस्तावाचार्याः अत्रैव भक्तवाचनाचार्य दर्शनाचार २
त्वादुपाध्यायग्रहणं अंगानंगप्रकीर्णकाद्यनेकश्रुतनदीर्घसियोगाद्बहुश्रुताः ओघकंते तेन जीवादयः पदार्था इति प्रवचन चारित्राचार ३ तपाचार ४
मागमः श्रुतज्ञानं चशब्दः समुच्चये तेषु परमभावविशुद्धा भक्तिर्यथाप्रमेवमभिगमनवंदनपर्युपासनयथाविहितक्रमपूर्वका वीर्याचार ५
ध्ययनश्रवणश्रद्धानलक्षणा तीर्थकरनामकर्मण आस्रवः सामायिकादीनामित्यादि आवश्यकादिषु समस्तस्यासौजन्यरूप इत्येवं —
दर्शनप्राप्तिः समभ्योजनसमत्वेति सामायिकं सकलसावद्ययोगविरतिलक्षणं प्रतिक्रमणकादि तदादि येषां षडावश्यकानां तानि सा
मायिकादीनि तेषां सामायिकादीनामावश्यकानामवश्यमहोरात्राभ्यंतरे कर्तव्यानामावश्यकानामवश्यं तयानुष्ठेयानि तानि वस
शाविधेनसंयमविषयव्यापाररूपत्वादनेकप्रकाराणि इत्थं मिथ्यात्वाकारादीनि तेषां भावतोऽनुष्ठानस्यापरिहाणिर्भावतः इति तदुपयोगान्
त्वाकथनमत्र प्रयुक्तम् हि सर्वक्रियानुष्ठानं द्रव्यमात्रत्वाच्छुभबंधनिर्जराफलं अल्पमेव प्रवचनेव कथ्यते तच्च भावहीनं वेतस्मात्तदनुष्ठानक
रणं तस्यापरिहाणिर्यथा विहितकालेऽसेवनमस्वभावतिरिक्तये त्येवमेषा आवश्यकापरिहाणिस्तीर्थकरनामकर्मण आस्रवो भवति
सम्यग्दर्शनिस्यादि तत्त्वार्थश्रद्धानलक्षणं सम्यग्दर्शनं सकलगुणाधारस्तदादिर्यस्यासौ तदादिः सा सम्यग्दर्शनादिर्मोक्षमार्गस्य सकलकर्म
क्षयोत्तरकालमात्मनः स्वात्मन्यवस्थानं मोक्षस्य मार्गः पंथाः प्रत्युपायो ज्ञानक्रियालक्षणस्तस्य प्रभावना प्रख्यापनं प्रकाशनं केन प्रकारे
णेत्याह निहत्य मानं करणोपदेशाभ्यामिति मानो हंकारः सदजात्यादिस्थानोद्भूतः श्रेयो विघातकारी यथाह श्रुतशीलविनयसंपन्न

अधर्मार्थकामविघ्नमानस्य कोपकारणमुक्तमपि पंडितो दद्यात् न मे वं विधं मानं अकृतस्य कारणं स्वयमनुष्ठानं गृद्धधनः कालविनया-
वहुमानाद्यथैव वर्णनं तेनागुणप्रवचनवात्सल्यं वर्णितं उपदेशोऽस्मै प्रतिपादनं कृतिथ विदधन मिति भुक्त्वा हीन्यादि तथा यथावत्तेन प्र
वचनप्रतिपत्तिरपेक्षितवादिनामर्हत्प्रणीतस्यानवद्यस्यापवर्गतीर्थमार्गस्यैकांतिकात्यंतिकनिरतिशयाबाधकल्याणफ
लस्योच्चैः प्रकाशनं प्रभावना सा भव्वेनात्तीर्थकरनामकर्मणः आस्रवः १२ अर्हदित्यादिवंदननमस्कारपूजासत्कारादिः अर्हतः ते
षांश्रमणप्रदेशासमागमाध्यवसानेनगुणकीर्तनामार्गप्रविहितक्रियानुष्ठानं अनेकधा प्रतिलेखनादि स्वयमधितिष्ठतामिति प्रति
पादयति परमस्याकृत्यसंनिषेधति अधीतप्रवचनार्थोऽहि विहितोऽनर्थाविषादप्रपंचसंघातक्रियाप्रसन्नोऽत्यंतवालः कर्तृ
त्वकः कारणप्रव्राजितोजपन्यादि भेदः जातिकृतपर्यायस्थविरास्त्रय षष्टिवर्षप्रमाणधरो जातिस्थविरः कालविंशति वर्षाः यथा
कृतंबहुः तपोबाह्यमनशनाद्यांतरं च प्रायश्चित्तादि तदस्यास्तीति तपस्वी तिस्रपस्वी विविक्तं वा तपः अनशनादि भेदं यस्य सांप्रतं
तद्योगमपस्वी शिक्षितदृतिशिष्यः शिष्य एव शैक्षं स्वार्थसाध्वादिवत् शिक्षणशीलो वाचनादिपाठकः प्रथयज्ञैकः स्वार्थाधिगमे
शिक्षुकीयथाविहितकालमध्येतव्योऽध्येतव्योऽवाप्यतद्दस्थर्थः ग्लानो मंदपारदः समाधिफलाद्दक्ष पानाद्यन्वेषणप्रसंग आदिस्थ
णकुलगणस्य मर्यादा परिग्रहः वयः समुच्चयेकृतधराणां वालादीनां वयःप्रहादिकारित्वं तत्परिग्रहपरिग्रहणेनु पर्यपदानां वन
दर्वकं संयमानुष्ठानकृत्यात्ययनयोदनासतिवेदनार्थः उपग्रहेवस्त्रपात्रादनवक्नुपग्रहेौषधौ तिजद्वणः अनुग्रहनकृपानय
थायोग्यविकृतिप्रदानादि लक्षणएतीकरोति तज्जोलक्ष्यतभावः संग्रहोपग्रहानुग्रहकारित्वं तत्परिणामितेनियावत् प्रवक्तीति प्रवच
मेन एतत्कृधराद्योलगवद्भाषितार्थप्रतिपादनार्थप्रतिपादनपरिणतः प्रवचनवाद् वात्सल्यं वात्सल्यमुक्तं संग्रहोपग्रहानुग्रहे
कृतमिति वाद्दस्यायर्थः विंशतिः कारणानां सूत्रकारेणकिंचिन्सूत्रेकिंचिद्भाष्येकिंचिदादिग्रहणेन सिद्धपूजाक्षणलवध्यानभावना
ज्ञापनभूतपुरुषवक्तव्याथेयमितिनोपसंहरति एतेगुणद्दस्यादिना एते यथोद्दिष्टगुणदर्शनविशुद्ध्यादयः आत्मनः परिण
मास्समुदिताः प्रत्येकं वा तीर्थकरनामकर्मणः आस्रवा भवंतिनष्टुन निश्चयमोऽस्ति समस्ता एव व्यस्ता एव वा विकल्पार्थो वा शब्दः इ
ति शब्दस्तीर्थकरनामकर्मास्रवेयत्ताप्रतिपादनार्थ इति।।२३।। नामानंतरनिर्देशाद्गोत्रस्योपादाने किंनिबंधनमितिएतद्

द्विधा गोत्रं नीचैरुच्चैश्चतत्र तावन्नीचैर्गोत्रास्रवप्रसिद्ध्यर्थमिदमाह।।२४।। परात्मनिंदाप्रशंसे सदसद्गुणाच्छादनोद्भावने च नीचैर्गोत्रस्य प
रनिंदात्मादिनाद्यं परश्चात्मा च परात्मानौ निंदाप्रशंसे च यथाक्रममभिसंबंधः परात्मनिंदाप्रशंसे एषां तेषां सदसद्गुणाः विद्यमाना विद्य
मानाः ते च ते गुणाश्च सदसद्गुणाः आच्छादनोद्भावने आच्छादनोद्भावने यथासंख्येनाभिसंबंधः सदसद्गुणाच्छादनोद्भावने च शब्द
परात्मनिंदाप्रशंसे समुच्चीयते नीचैर्गोत्रस्य कर्मणः आस्रवा भवंति तत्रस्वात्मव्यतिरिक्तः परस्तस्यगुणवतोपिगुणपक्षप
हारेण निंदानिंदा वालोऽयं मनमूकानां मूकानां वदोषाणामुद्भावनं श्लाघनं प्रशंसनं तु निर्गुणोद्भावनं मनमूकानां मूकानां वगु
णाना मात्मैव प्रख्यापनं प्रशंसातो गुणविद्यमाना सतीषां आच्छादनं संवरणं स्थगनं द्वेषात्प्रद्वेषेण वा अनावरणेगुणस्तोपिप्रस्तुतत्वात्प
रस्यं वे धिगुणगणाच्छादनमेव संबंध्यमात्मा निसंबंधेन सनात्मना मेवगुणानुद्भावनं करोत्यसौ ः इदोषावा प्रख्यापयतीतियाः
वत् एतदेव वस्फुटतरं विक्तजते आत्मपरोभयस्थमिति आत्मस्थमसद्गुणोद्भावनं परस्थं सद्गुणाच्छादनमात्मपरावेतौ
यं तत्रस्थितं वर्तमानं नीचैरिति नीचं जघन्यं हीनं गोत्रमिति गीयते शब्द्यते वा नेनेति गोत्रं यत्कर्मोदयात्मनित्रिनीच
त्वाभिधा प्रवर्तते चंडालश्वपचमत्स्यवंधादि तन्नीचैर्गोत्रं कर्माभिसंबंधाद्वा तथापि कृत्यादेतुरेवसत्युज्यते एवमेवैतेपरनिं
दादयो जातिकुलरूपवलश्रुताज्ञैश्वर्यतपोमदपरावज्ञातोत्प्रासनकुत्सनाद्यश्च नीचैर्गोत्रस्यास्रवा भवंतीति।।२४।।
।।इदानीमुच्चैर्गोत्रस्यास्रवाभिधित्सयेदमाह।।२५।। तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य तदिति सर्वनामपूर्वप्रकृतापेक्षं
प्राक्प्रकृतानीचैर्गोत्रास्रवाः तेषां विपर्ययाद्यथाभिहितवैपरीत्यं परगुणप्रशंसा आत्मनिंदावद्गुणप्रकाशन
मसद्गुणाच्छादनं च।। परस्यात्मनिन्द्यसद्गुणाच्छादनमप्यात्मोत्कर्षपरिहारार्थं तथा नीचैर्वृत्तिर्नीचैर्वर्तनं विनयप्रव
णवाक्कायचित्तता अनुत्सेको गर्वः श्रुतजात्यादिजनितः नोत्सेकोऽनुत्सेको विजितगर्वता एतौ नीचैर्वृत्त्यनुत्सेकौ चशब्दा
द्यत्तद्विपर्ययश्चोत्तरस्येति सूत्रक्रमप्रमाणादुच्चैर्गोत्रस्याहेदमिति शब्दः।। शब्दपदार्थकः।। नीचैर्गोत्रमुक्त
वान् तस्यास्रवविपर्ययः परगुणप्रशंसादिरपरश्चास्रवद्वयं नीचैर्वृत्तिरनुत्सेकौ चोच्चैर्गोत्रस्यास्रवा भवं
ति उच्चैरित्यक्षयमुत्कृष्टमिक्ष्वाकुहरिभोगराजन्यादीनि।।२५।। उक्तंगोत्रमास्रवाधिकार एवा॰

तत्वार्थ॰टी॰ यमनु प्रवृत्तस्तत्र समस्तकर्मप्रबन्धस्थानविनिर्दिष्टस्यानुभावकस्य बन्धहेतवोऽन्तरायस्य कस्याश्रव इत्युच्यते

१९८ ॥ ७ ॥ विघ्नकरणमंतरायस्य विघ्नो विघातः प्रतिषेधः समाजो निर्माणस्य तत्करणमनुष्ठानं तस्य रिणमयोगि

नांतरायाभिधानस्य कर्मण आश्रवो भवत्येतदेव भाष्येण स्पष्टयति दानादीनां मीत्याविना मित्यादि दानमादिर्येषां ते दाना

दयादीनलाभभोगोपभोगवीर्याख्याः तत्र दानं विशिष्टपरिणामपूर्वकं स्वस्य परस्वत्वापादानं तदेव ग्रहणमाणं प्रति

तिग्रहीत्रादेर्यल्लभ्यते॥ ॥ भोगो मनोज्ञशब्दादिविषयानुभवनं उपभोगो भूषणवसनाद्यासेवनं

वीर्यमात्मपरिणामो विशिष्टचेष्टालक्षणः॥ ॥ एषां दानादीनां विघ्नकरणं येन येनोपायेन दत्ते न

तु पुपायमापादयति दातुः एवं येन येनोपायेन लभ्यं तल्लिप्सुस्तथा

भोगोपभोगानुभवनसमर्थो येन येनोपायेन भवति यथा च स्वे वीर्यमुत्साहः॥ पराक्रमो न भवति तथा त

थाऽनुतिष्ठतोऽन्तरायस्य कर्मण आश्रवो भवतीति शेषो विघ्नकरणविशेषप्रदर्शनार्थः आधनामकथाश्रव

प्रकरणपरामर्शद्वारेणोपसंहरन्नाह स्याप्यर्थमित्यादिना एते तत्प्रदोषनिह्नवादयः सांपरायिकस्य कारण

स्याष्टविधस्य ज्ञानावरणादेरन्तरायपर्यवसानस्य कर्मणः पृथक्पृथग्विवेकेन पुनरुक्ततया आश्रवा

विशेषाः सामान्यापेक्षया विशेषा भवंतीति श्राद्धाभिधानसितसंहितार्थपरिसमाप्ताविति भाष्या

नुसारिण्यां तत्वार्थटीकायां षष्ठोध्यायः समाप्तः ॥ ॥ ७ ॥ ॥

१९८

३२

॥ अत्राहोक्तं भवता तादिनासंबध्नाति चाप्यकारस्तेषु कं षष्ठाध्याये सद्वेदनीयकर्माश्रवेषु व्रतव्रत्यनुकम्पेति सकल

स्त्रोपलक्षणं अथवा यावत्संबंधोपयोगिना व्रतस्वरूपादानं व्रतीति । अत्र ते विधीयमानत्वे यांतस्तत्र किं व्रतं को वा व्रतीति प्रश्नेनोप

क्रमातेनतु व्रतस्य एवत्याप्यसत्त्वाबाधत्वपरिज्ञानात्तु तत्संबंधव्रती सुज्ञान एवेत्युच्यते विशिष्टसंबंधस्थापनार्थं व्रतिग्रहणं व्रतस्वरूपपरिज्ञाने ज्ञान्यो

व्रतीति प्राणातिपातादिविरतयो मायादिशल्यविविक्ता व्रतव्यपदेशमश्नुवते तथाविधव्रतसंबंधाद्व्रतीति अत्रोच्यते इति व्रतस्वरूपनिर्दे

२ शार्थमाह ॥ हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतं । व्रतिस्वरूपं त्विदमेव शास्त्रमध्ये परिष्टात्प्रतिपादयिष्यते । निःशल्यो व्रती

व्रतान्यार्थं व्रतीक इत्यत्रेति हिंसादयः कृतद्वंद्वाः पंचम्यंताः पंचमी चकुगुप्साविरामप्रमादार्थानामुपसंख्यानादपादानलक्षणेनां वत्र

तेकं हिंसादय इत्यादिना भाष्येण दर्शयति हिंसादयश्च वक्ष्यमाणलक्षणास्तत्र कषायादिप्रमादपरिणतस्यात्मनः कर्तुः काया

दिकरणव्यापाराद्व्यक्तावच्छेदेन प्राणव्यपरोपणं हिंसा प्रागभिहितसामान्यलक्षणयोगे सति सद्भूतनिह्नवासद्भूतोद्भा

वनविपरीतकसावद्यादिमृषावचनं परपरिगृहीतस्य स्वीकरणमाक्रांत्या चौर्येण शास्त्रप्रतिषिद्धस्य वास्तेयं स्त्रीपुंनपुंसक

णयोगमनोमोदाद येसति चेतनाचेतनस्त्रीतसोरासेवनमब्रह्म विद्याविज्ञमिश्रेषु द्व्यादिषु शास्त्राऽननुमतेषु मम

१ तं परिग्रहश्चेत्याह समुच्चयार्थः पंचभ्यो हिंसादिभ्यः कायवाङ्मनोभिर्निवृत्तिर्व्रतं विरतिर्निवृत्तिः ननु चास्तु विरतत्वाच्च हिंसादि त्रयम वि

नुपादेयं भाष्येनायं दोषः आत्मनादिविरतिं साध्याः सावद्यकरणमनवद्यं तया पेक्षते तत्त्वकायाद्येवयोग्यमथवा प्रमत्तयोग

दित्रयोगग्रहणं लक्षणस्त्वत्रेसर्वव्रतविशेषणार्थं यत्तच्चेत्तसिसत्रिविधं विटशंनाष्यकारेण आश्रवाध्यायवक्तव्यशेषम

ववाधिकृतस्सप्तमाध्यायमाह व्रतदाह विष्टसमावार्यन्तेष्ट शोषभक्तुडातस्तोके निवृत्तोव हिंसातो विरति निवृत्तिर्व्र

तं यस्मात्स्वपत्नात्संव्रतयति परिहरतं स्वपक्षात्रात्रिवर्त्तत इति ज्ञात्वा प्राणिनः प्राणातिपातादेर्निवृत्तो न कं व त्वम हिंसा

दिलक्षणं तु क्रियाकलापं नातुतिष्ठंतः तिद्दत्वान पत्त्तार्थं व्रतदाह पयो व्रतयतीति यथा पयोभक्षहार एव वर्त्तते

नान्यत्रेत्येवं हिंसादिभ्यो निवृत्तः शास्त्रवि हितक्रियानुष्ठान एव प्रवर्त्तते अतो निवृत्तिप्रवृत्तिक्रियासाध्यं कर्मक्षपणमि

ति प्रतिपादयति निवृत्तिप्रवृत्तवशास्त्रवोदितेतदनुष्ठानान्मोक्षावाप्तिः ननु चन प्रकारो निवृत्तिं च वचनमेव याचष्टे व्रतत्वं न प्रवृत्तिं च ति

तत्त्वार्थ·टी· नमपीतितदितत्का यं अयमत्रिआयोत्तार्थ्यकत्तः अन्यतरोपादानेन्यतरस्रवृत्तिसंबंधस्य स्वकवत्सेव पितापुत्रादिवत् यतउक्तं ज्ञानक्रिया
५३१ भ्यांमोक्ष इति प्राधान्यानुवृत्तिरेवसास्त्राणतिपाताद्भ्योदविरतितत्सर्वकावप्रवृत्तिर्गम्यमानाअन्यथानुपिद्धत्तिनिः फलैवस्यादिति वि
रतिशब्दस्यार्थंनिरूपयति विरतिर्मतादित्ता विरमणं विरतिर्न्नामसशब्दोवाक्यालंकारार्थः हिंसनं हिंसा प्राणवियोजनं प्राण
श्चेंद्रियादयस्तत्संबंधात्प्राणिनः एकद्वित्रिचतुःपंचेंद्रियाप्यास्ता विज्ञानानुसारात् अस्फुपेत्तानिश्रदाय्यव्रतिपद्यन्नावतोकरणंविर
तिः ज्ञानश्रद्धानपूर्वकंचारित्रमिति यावत् देवबाकरणंविहणेति पर्यायेरकरणं निवृत्तिरूपरमोविरतिरित्यनर्थान्तरमितिम्वर
एस्यै तत्पर्यायाः तत्राकरणमितिनिवृत्तिप्रवृत्तिक्रियाल्लक्षणं चारित्रं मनोवाक्कायकृतकारितानुमतिभिर्दोषत्रसशब्दचत्तारिंशदत
विकल्पत्नावतयापरिहारानुष्ठाने एवं त्रिविधस्यादयोपिज्ञावनायाः पर्यायशब्दाः देशव्याप्यानमसम्मोहार्थं अरेशातदेशेति तद
तदविशेषचोदितं पंचतयविषयव्रतान्विधानं विरत्या अयद्वयविवक्षावशेनासकलकस्त्रत्त्वावोऽन्यथावेदितव्यमित्याह देशा
देशसर्वतोणुमहतीदेशाश्चसर्वविदेशासर्वेतम्यां देशासर्वतः विरामार्थापेक्षापंचमीअणुचमहच्चाणुमहती कथं पुनर्विरतिसामा
ग न्येनैकसद्विधानिद्युतेविवक्षावशेनदेशासर्वधानाद्विकच्चादिविवक्षायामेकवचनादिवत् हिंसादिविरतिव्रतमुक्तावान्वयथा
क्रमममत्तिसंबंधःदेशासर्वग्रहणंविरत्यासहाभिसंबध्यते अणुमहद्ग्रहणं व्रतेन देशातोविरतिरणुव्रतं सर्वतो विरतिर्महाव्रतं एतमेवसू
त्रार्थंन्नाष्येणस्पष्टयति एभ्यइत्यादिना एभ्य इति प्रस्तुतातिपरामृतप्रहिंसादीनिसर्वतोव्यवच्छिदत्राह एकदेशविरतिरणुव्रतमितिस
कलघ्राणिगणविषयाहिंसातस्याश्चविरतिर्नसर्वस्याः किंतुदेशात इति एकदेशग्रहणेनेवस्पष्टयतिनसर्वस्मात्प्राणिव्यपरोपणाद्विरतिः
किंत्वेकदेशात्स्थूलादित्दत्तादानादितिद्रव्यहरणादिस्थूलंयात्रेहिकामुष्मिकाश्रीर्यदोषान्निहिणं सूक्ष्मंपरिहासतःपरकीयपरिलक्षच्दण
काष्ठादिग्रहणंवा स्थूलादन्नेधनादिरमामीतिस्थूलत्वान्नेकदेशनितमत्रवर्तीयतेस्वदारसंतोषःपरदारनिवृत्तिर्वाश्चिदारसंतुष्टः शेष
योषितोमातृवत्पश्यति परदारास्त्रिगमान्निवृत्तःपरपरिगृहीतयोषितःपरिहरतिअपरिगृहीतांववपामत्रिगच्छतितथाच्छापरिमाण
कृत्यतोविरमामीति केचिन्महाव्रतमनुयानात्स्वल्पं व्रतमणुव्रतमितिव्याचक्षते सवतिमहाव्रतव्याचिक्ष्यासर्वतोविरतिर्महाव्रतमिति ३११
ताह सर्वतइतिसर्वस्मात्सूक्ष्मात्स्थूलाच्चप्राणव्यपरोपणाद्विरमामीत्यादि एवं शेषाण्यपिसर्वतोवान्यानिमहाविषयत्वान्महाव्रतान्निरा

^ सर्थः स्थूल सूक्ष्म प्राणि भेदात् संकल्पजारंभजते भेदाद्वा स्थूलानृतस्य षावादादेः कूरमार्गिदानादिः स्थूलाः नर्मादिप्रयोगमाः
सूक्ष्मः स्थूलेदहना१

ति न महाव्रतानिन्नवंतिसमक्ककृत्स्नानिमूलगुणएवमन्यानिनुचन्यान्येवमूलादितिवृत्तिरहिंसाव्रतपालनार्थत्वान्मूलगुणएवं निशीथक्ते
नविरतिरपिमूलगुणःस्यादुच्यते अहिंसाव्रतपरिपालनार्थत्वादितिसमितिरितिनेकान्तोऽपिवमहाव्रतधारिणएवतन्मूलगुणस्ताद्विरहि
तस्ययस्मान्मूलगुणएवापरिवर्लसुरत्तीमूलगुणग्रहणेनच्छहाणमर्थाकिंश यथाचसर्वव्रतोपकारित्वात्रयोऽनंतथोपवासाद्युत्तस्तन्मूलगुणे
महाव्रतीनःशेषगुणतरगुणःअणुव्रतधारिणस्तत्तरगुणेनिशात्रोऽनविरतिराहारत्यागाऽपवासवत्परद्वयात्तदितिवृत्तीत्तंकेचनदोषारा
त्रिनोऽनइतिचेत् एवंमन्यतेऽत्रमादिदोषपरिहितस्यवासरपरिगृहीतस्यान्यवहारेणधर्मनरक्तंनकिल्लदोष इति एतदुक्तंकालातिक्रांत
स्य प्रतिषिद्धत्वात् गृहीतस्यानीताग्नौविनकरणविश्रांतिसमनंतरमेवचतुर्ऊरत्यनुज्ञानात् निवाहिडने वेयपिथविछदेरसंजवात्दा
यकगमनागमनसत्त्वेहपाणिजाऽनाद्यदर्शनात् आलोकितपानज्ञोऽनासंत्तवान् छोत्त्वाणिप्रदीपप्रकाशसाध्यमालोकनमितिचेत्
म तात्तदप्यसत् अग्निसमारंभनिमित्तत्वात्रस्तपरिग्रहाज्ञावात् छेत्तायाः कादविकत्वात् आगमेननिषिद्धत्वात् हिंसादिवदनासेवनं यमेव
क्तावलीनुक्तमितिःवउक्तंव्रतंसविधानमणुमहच्च तत्रमहाव्रतमधिकृत्यभावनासूत्रं तत्स्थैर्यार्थंभावनाःपंचपंच अणुव्रतस्यवो
परिबधवधादिकातिचारपरिहाररूपावक्ष्यमाणाः अपायावद्यदर्शनादिकाश्चसामान्यरूपाःमहाव्रतंचोपन्नोगव्रिलक्षणिनः प्राणिनि
ईत्तिसंदहनपरिहाणप्रमादचकान्वेर्यरक्रमतस्तुतिपातपरिहारार्थंन्नाव्यंत इतिभावना तदित्यनेनपंचविधस्येति सर्वनाम्ना
तरत्वामहाव्रतमन्निसंबध्यतेन्नाष्यकारपद्यसिमान्तेनव्रतस्येतिविहणेतितथापितच्छब्दोपादानसामर्थ्यान्महाव्रतान्निसंबंधः अन्येतु
भावव्रतेषयोरपिव्रतयोर्न्नाप्यसंबंधःसंन्नवतिदिश्रावकस्यापिकस्यचिद्यथोक्तंभावनामेवंऽन्तस्तेव्याप्तिःस्यात् व्यापित्वसुरतिनोत्ता
वना व्यं तेतस्यव्रतस्यपंचविधस्येति पंचप्रकारस्यसर्वप्राणातिपातविरत्यादेःस्थैर्यार्थंदार्ढ्यमापादनार्थंस्थिरत्वं प्रयोजनमुद्दिश्यपात्यसंते अनन्त्य
स्यमानास्तिर्नविनाभिर्मलीमसीन्नवंत्यनन्त्यस्यमानविद्यावत् महाव्रतानीतिएकैकस्यैतिव्रतस्यसामानाधिकरण्येनषष्ठी नसमुदितानांपंचाना
मपीति मनुचपंचपंचेतिवीप्सा विवक्षायेतस्मेएकैकस्येतिलभ्यते एवान्यथावीप्सानर्थक्यंस्यात् तदित्युच्यते सोमान्यविशेषान्यांव्याप्ताव्यावृ
त्तिपाद्यतेर्था पंचविधस्यव्रतस्येतिसामान्यनोपक्रम्यपुनर्विशेषेणएकैकस्येत्याह समुदायोमात्त्वदितिपंचपंचेतिवीप्सायांद्विर्वचनं अपरेतुस्व
त्रमधीयते तत्स्थैर्यार्थंन्नावनापंचपंचशइतिते वमन्निदधतिसंख्यावाचिनःप्रातिपदिकाद्वीप्सायां [illegible] द्योत्यायांकारकात्स्वस्त्यमी
वै

वा

ततस्तस्यातिक्रान्तो दोषो ददातीति द्विधो ददातीति वा स्पष्टं निश्चितं तदनुपपन्नं यतः शास्त्रतत्त्वं तं व्रतानि भावनैः संबध्येरन् यदि व्रतानि ततः षष्ठ्यंतेन संबं
धानि पंचानां पंचानामिति ततो कारकत्वात् षष्ठ्या शास्त्रस्य योजनान्यते अथवा भावनाभिः संबंधस्ततः पंच पंच भावना व्रतानां भवंतीति पंचपंच इति वीप्स
या द्वितीयं पंचग्रहणं न कर्त्तव्यं तस्य स्थैर्यार्थं भावनाः पंचपंच इति पठितव्यं एवमुक्ते सत्यपि न घटते शास्त्रतत्त्वं अ स्तस्य स्थैर्यार्थं भावनाः पंचपं
चेति न्याय्यं सूत्रं तद्व्येतेनैव प्रस्तुतभावनीयन्यासः अहिंसायास्तावदिति अहिंसा प्राणातिपातविरतिस्तावच्छब्दः क्रमद्योतकः अस्याः प्रथ
ममुच्यते पश्चान्मृषावादादिविरतेरभिधास्यते ईर्यासमितिर्मनं तत्र समितिः संगतिः श्रुतरूपेण मनः परिणामः तदुपयोगित्वात् पुरस्ताद्युग
मात्रया दृष्ट्या स्थावरजंगमानि भूतानि परिवर्जयन् अप्रमत्त इत्यादिको विधिरीर्यासमितिः मनसो गुप्तिर्मनोगुप्तिर्मनसो रक्षणं आर्त्तरौद्रध्या
नापवारः धर्मध्याने चोपयोगो मनोगुप्तिः एषणा गवेषणा ग्रहणा ग्रासैषणा भेदात् त्रिधा तत्र समितिः सम्यगेषणा मपिकायानामुपघातः स्यादिति तस्य
संरक्षणं धर्मेषणासमितिः समास्तेऽन्ये योपयोगरक्षणं आदानं ग्रहणं निक्षेपणं मोक्षणं पीठफलकोपधिकादेस्तस्य पूर्वेरादाननिक्षेपण
योस्समितिरागमानुसारेण प्रत्यवेक्षणप्रमार्जनं आलोकितपानभोजनमिति प्रतिगृहं पात्रमध्यपतितं पिंडं चक्षुषा प्रत्युक्तेन प्रत्य
वेक्षणीयस्तत्समुद्भागंतुकसत्वसंरक्षणं धर्मागत्य प्रतिश्रयं चक्षुषा प्रकाशवति प्रदेशे स्थित्वा सुप्रचोदितं पानभोजनं विधायप्र
काशप्रदेशे वस्थितेन भक्षणीयं इति करणं एवं विरतेर्भाविनेयस्य व्यवस्थापनार्थं एवमेताः पंच भावना मुक्तमुक्ताः भवयतो
संयतस्य कृत्स्नं कर्मक्षयकल्पमहिंसां पातुं प्रत्यलो भवतीति संप्रति सत्यवचनस्य भावनाः पंच प्रतिपादयन्नाह सत्यवचनस्येति सत्य
म वितथं सद्भूतार्थप्रतिपत्तिकारि अकर्कशं विपरीतार्थप्रतिपादनं प्राण्युपघातश्च अनुवीचीति देशीवचनमालोचनार्थे वर्त्तते
आलोच्य वचनस्य प्रवर्त्तनं अतो यत्प्रथमं समीक्ष्यालोच्य वचनं प्रवर्त्तयितव्यं मनागालोचितं भाषितं कदाचिन्मृषा भवति इत्यतश्चात्मनो
लाघवं परपीडा फलमात्मनो किं परस्योपघातश्च नियत इति तस्मात् समीक्ष्य वक्तव्यं सत्यं मृषावचनं दुनिति तेन सास्ते को प्रत्यूज्य ×
यो × धः कषायविशेषो मोहकर्मोदयनिष्पन्नो प्रीतात्मकः प्रद्वेषः आयस्तदुदयात् परवंचनकांक्षः परनिरपेक्षो यत्किंचनभाषी मृषापि भाषेत
अतः क्रोधस्य प्रत्याख्यानं निवृत्तिरनुतापो वा नित्यानं भावयेदेवं चक्रवासप्रसत्यवादिनां व्यभिचरति लोभः तृष्णा लक्षणः कूटसाक्षित्वादिदोषा २००
णमयत्नी समस्तव्यसनैकरज्जोर्जलनिधिरिव दुष्परिः कर्मादियाविर्भूतो रागपरिणामस्तदुदयादपि वित्तशाभाषी भवति अत्रस्य प्रत्याख्

नी

मनुभावयता तदाकारपरिणामः प्रत्याख्येय इति भावनीयं भयशीलो भीरुस्तद्वेहिकादिभिर्भयैः सप्रभयामोहनीयकर्मोदयकुनितमुदयाद्य तस्याद्भ्रात्मापरं
नी सुभाषवती त्य रुतं भावयेद नीरुत्वं भावनाकृत्वविचित्तिं बंधाश्रतेतस्करो यंपिशाचोवमयारकुर्यादत्र इति तस्मान्निर्भयवासना धातमानि निर्विषयमि
ति हास्यं हसनं मोहोद्भवः परिहासस्तत्परिणतो हास्यमात्मा परिहसन्परेण सार्द्धमलीकमपि ब्रूयात् ततः परिजिहीर्षयान्वहास्यप्रत्याख्यानमवश्यं पेयमेताः पंचा
पि भावयतश्चावना सत्यव्रतरक्षणं भवतीति तथाऽदत्तादानविरतेः पंचैव भावनास्तथाविसयाचास्तेयस्ते स्यस्पयेत्याद्युपन्यस्यति अनुवीच्यावग्रहोना
य यस्स्वामी तं च प्रकारः पवितो देवेंद्रराज गृहपति शय्यातर साधर्मिकभेदेन अत्र च पूर्वः पूर्वो बाध्य उत्तर उत्तरो बाधक इति संचिंत्य यो यत्र स्वामी स एव या
च्याश्च स्वामिना याचनेतु दोषा बा कुल्युक्तमार्ग एव अकांडकंडनाद्यो दिकमानुमिकमदत्तपरिभोगकृतं ततस्मादालोच्यावग्रहो याच्य इत्येवमाभीक्ष्णं चाव
ग्रहयाचनं याचनादत्तादाने प्रवर्त्तत इति सकृद्दत्तेपि परिग्रहस्वामिना ग्लान्योरन्तीक्ष्णावग्रहयाचनं कार्यमत्रादिकं निगुणं मुक्तः पूर्वलब्धपरिग्रहो
दत्ताद्य वस्त्रासुमुत्र पुरीषोत्सर्गपात्रकरचरणप्रक्षालनस्थाना निदानचित्तपीडापरिहारार्थं याचनीयात्स्वंवया भावयन्नादत्तादानकृतिति
नागसामृश्रयतीतथा एतावदिति अवग्रहावधारणं एतत्परिमाणमस्यैतावत्परिमितं सर्वतः मेवग्रहीतव्य इत्येतदेवधारणं सद्वृत्तिस्य परिमाणं तद
न्तरवर्तिनि मूत्रस्थाना दिक्रियामासेवमानो न दातुरुपरोधकारी भवति याच्याकाल एवाचानवधारणे विपरिणत्तिरपि देवस्य स्यादानस्येत्यात्मनो
पिवादत्तः परिभोगकृतनित कर्मसंबंध इति समानधार्मिके इत्यादिधर्मविरंतास्ते वं ते इति धार्मिकाः समानास्तुल्याः प्रतिपत्रे कदाचिन्नास मत्त्रादिमु
क्रिसाधनसमन्विताः साधवस्तेभ्यः पूर्वपरिगृहीतक्षेत्रेभ्योवग्रहो याच्यस्तदनुज्ञानात्सिति आसनमन्यथास्तेयं स्यात् तदनुज्ञानं नु प्रतिश्रयादि समस्तं पृ
च्छीयादित्येवमा भावनं भावयेत् तथानुज्ञापितपानभोजनमिति पंचमभावना अनुज्ञापितमनुज्ञापितमनुज्ञायास्वीकृतं पानभोजनं स्त्रीलेन विधि
नापंचमानकं पाश्च नुप्रविश्य पगता विकारः पिंडेषणेप्रयुक्तः अनुज्ञापितानुमतम तिस्पष्टं कल्पनीयमानीय गुरोर्वेद्यालोचनापूर्वकम
नुज्ञातो गुरुणा मंडल्यामेकेको वा भुंजीत चुक्तिरत्र पाठ्ये न व्यवहारे व्याख्येयः तत्र शय्यावर्तकं विद्यमर्मसाधनमुपकरणमौधिकोपग्रहिकमे
दं तत्सर्वमनुज्ञातं गुरुणा वंदनपुरस्सरं गुरुवचनविधिना परिभोक्तव्यमेवमाचानि बासनानादधानो नातिक्रमत्यस्तेयव्रतमिति अब्रह्मासेव
ननिवृत्तिः ब्रह्मचर्यं तस्यापि पंचभावना तद्यथा स्त्रीत्यादि स्त्रीपशुस्त्रियोः ब्राह्मणादेवमानुषभेदाद्द्विविधाः पशुग्रहणेन तिर्यग्जातिपरिग्रहः तत्र वडवा
ले योगोमहिष्यजा विकादिसंभवत्रिभिर्नमेवाश्चसविशः अविश्यस्त्रियुंसकनेप्यवित्रकर्मादिप्रवृत्तः प्रकाराः पण्डकास्तृतीयवेदोदयवर्त्तिनो
महामोहकर्माणः पोतास्यसेवनाभिरताः क्लीबा इति प्रसिद्धाः कृतवृद्धैरेभिः संसक्तमाक्रान्तं व्याप्तं यत्र स्पतेचतस्य यत्रासनं प्रतिश्रयसंस्तार
कासनादि तद्ब्रह्मचर्यस्य बाधनीयमित्येवमाभावनं भावयेत् तथा स्त्रीपशुपंडकानां सेमेसक्त्वाति पिरागसंयुक्त स्त्रीकथावर्जनं मोहोत्कवः
देशानंताः स्कंधा आहारकस्यानि योपितथा स्कंधा असंख्यगुणप्रदेशात एवं तेमः प्रवर्तितश्चैवानंता स्वस्ताः प्रदेशानंताः स्कंधाः क्रमसास्तैज
सभाषाप्राणापानमनः कर्मणां योग्या एतदेवानिनं भाष्येण प्रतिपादयति। अष्टविधेत्यादिना अष्टप्रकारे पुद्गलग्रहणे औदारिकवैक्रिया
हारकतैजसभाषाप्राणापानमनः कर्मभेदेन पुद्गलाः परमाणोर्बोद्धिप्रदेशोद्यश्च स्कंधयावदचित्तमहास्कंधा एतेषु ये योग्याः पुद्गला
स्तेषामष्टविधग्रहणेन सति विशिष्टं कर्मशरीरग्रहणे योग्यानिसर्गः। कर्मैवाष्टविधं शरीरमुक्तं। अतः स्वार्थकर्मणामिति प्रत्ययः कर्मै
व कारणं कर्मसंधानइत्यर्थः। तेषु नारादीयमाना पुद्गलाः कश्चात्मना किं नाम कर्मणा प्रत्यया भवंति। कारणतां प्रतिपद्यंते। कृता अव
स्थिताः कृतो वा योगविशेषादित्याकृष्य कर्मेदमुक्तं नामप्रत्यया सर्वतो योगादिशेषादिति। वदतेरवल्व्ययमर्थः सर्वकर्मणामत्व
र्थः संज्ञा नामसंज्ञित्वमन्वर्थन्तरं। तद्यथा ज्ञानावरणमित्यादि ज्ञानमाश्रियात्मीये च कर्मणा तज्ज्ञानावरणमेवं सर्वत्र नामान्वर्थवाच्यं।
तस्मान्वर्थनाम्नो ज्ञानावरणादेः प्रत्ययाः कारणं नीतिनहितान्पुद्गला ज्ञानावरणादिसंज्ञाः सिध्यंतीति। तथा सर्वास्त्रिदिक्षु व्यव
स्थिता। कायवाङ्मनोयोगानां चतीश्चादिपरिणामविशेषादित्यादि सर्वमिदं वाध्याये प्रदेशबंधनिरूपणे व्याख्यास्यत उपरिष्टादि
ति। एवं बंधहेतुत्वनिरूप्य अनाबंधस्वरूपनिरूपणायाह। स बंधः बंधनं बंधः परस्पराश्लेषः प्रदेशपुद्गलानां क्षीरोदकवत्स
कृत्यादिभेदः। बध्यते वा येनात्मा अस्वातंत्र्यमापाद्यते ज्ञानावरणादिना स बंधः पुद्गलः परिणामः सचानंतरसूत्रे आत्मप्रदेशेषु
रणाग्रुपजनेषु कर्मयोग्यपुद्गलानामादानमाचक्षते नोक्तस्य सहत्वेन परामर्शः क्रियते हेतुश्च त्रिविधः स्यकार्यहेतुरप
देशः प्रतिज्ञातेन तस्य च मिथ्यादर्शनादेरिदमेव निर्वर्त्त्यं कार्यं पौरुषेयसामर्थ्यं प्रतिबंधकारी जीवप्रदेशेषु ज्ञानावर्णादिपुद्ग
लजालावस्थानः साम छर्वपुसो ज्ञानदर्शनवीर्यसुखवतत्वं। तस्य प्रतिघातकमात्मप्रदेशप्रतिष्ठं पुद्गलजालमिति। प्रतिष्ठावता
स्य विशिष्टगुणयोगस्तथा दीपउष्मगुणयोगा वर्त्तसिरमादायो वी रूपेण परिणमति। तथा रागादिगुणयोगात्का यादियोगव
र्त्तिवीपः स्कंधानादाय कर्मतया परिणमनमापादयति। कायादिकरणयोगवानात्मा वीर्यपरिणति भवती योगशब्देनोच्यते
यथा मृत्स्नाघटस्यापि संयोगादक्रत्यादिपरिणति घटस्यैवं तथात्मनः कायादिकरणयोगे वीर्यपरिणतिरात्मन एव प्राक्स्ति
मङ्गमंतारस्येति। यथा वस्त्रेस्नेहाभ्यक्तेवपुषि जलार्द्रवाससि वा परागो लगति मलीभवति च। तथा रागादिस्नेहाभ्यंजनस्यात्मनः कार्मणशरीरप
रिणामो हर्द्रकर्मग्रहणे योग्यतामास्कंदत्यात्मदेहयोरेक्यानादिना भोगवीर्यतः कर्मबंधो। यथाह अपि चायं प्रायोगिकबंधस्तत्र

वतिकर्षसामर्थ्यात् इत्थमस्य योगो वा योगिकवीर्यं तस्यास्य वीर्येण वा योगिकेन परिपाच्यरसमुपादत्ते इति परिणमयति धातुतया स-
वतश्च वा योगवीर्येण घटिकादिना विनो मृदवयवा आविश्रंताय थापिंडे। तद्वत् ज्ञानावरणादि कर्मदेशा अपि ते या। आवेष्टितमविभक्तं
यद्यप्यष्टविधमित्यतेकर्म एवमपि जनेर्हेऽ नानात्वं प्रकृतिनस्तस्य पुद्गलता साम्येपि द्रव्याणां न तु विपाकस्तेभेदः। दृष्टः पित्तकफानि
परिणामवतां श्चयुगुणभेदात्। यस्य गुणो यादृक् तस्यानुताहृशं मेव भवति। न स्पृक्लेन हि आचवानि वफलनि नजं बुभुक्षानिस्वा
नि। कर्मतरवापि तद्वत्तानाश्रयपुत्समानफलनितास्नानुगुणविशेषात्। एतमेवार्थं भाष्यकारो विस्पष्टयति भाष्येण। स एवं
स्वादिना एकलोलीभूतश्चात्मप्रदेशैः कर्मपुद्गलपिंडस्तत्त्वेन परामृश्यते। एवं इति। नानास्सासे वानुसंधानमात्रं ष्टे आत्मप्रदे
शानां पुद्गलानां वान्योन्यानुगतिलक्षण एव बंधो भवति। कर्मशरीरमिति। कार्मणशरीरमात्मैकाभ्योगकषायपरिणतियुक्तम
पि च कर्मयोग्यपुद्गलग्रहणे आत्मसात्करणे एकत्वपरिणामापादने समर्थमेवं च कर्मशरीरेण पुद्गलानां यद्ग्रहणं ग्रहणीति स ह
तो बंध इति भावनीयं भवति। स पुनश्चतुर्विध इत्यनेनोत्तरसूत्रेसंबंधं कथयति। लक्षणविधानाभ्यां जीवादिपदार्थसमकथ्या
ख्यापकता। तत्र लक्षणतः प्रतिपादितो बंधः संप्रति लक्षितस्य विधानं वाच्यमतः। स एवं लक्षणलक्षणको बंधः एकरूपोपि कार्यभे
दात्प्रकृत्यादिविभागभाग् दयत्स्ववस्थाभेदात्। यथा पृथुजनः क्रीयतेनीविर्हनेनादिभेदात् नानातां प्रतिपद्यते। तद्वद् बंधोपीति पु
नः शास्त्रीबंधविज्ञानएव इदमुनाव भेदे सति भावबंध इति च तत्त्वो विधायस्य। स चतुर्विधः चतुःप्रकारस्तत्प्रकारनिरूपणायेदमाह
प्रकृतिस्थित्यनुभावप्रदेशास्तद्विधयः प्रकृत्यादयः कृतभवनविभक्ता निर्दिष्टा तत्र प्रकृतिर्मौलं कारणं मृदिव घटादिभेदानामे
करूपपुद्गलग्रहणमतः प्रकुर्वंति साशकाशात। इत्यकर्त्तरीस्य पुद्गलेरपादानसाधना प्रकृतिः स्वभाववचनो वा प्रकृतिशब्दः दुष्टप्रकृ
तिर्दुष्टस्वभाव इति प्रसिद्धज्ञानावरणं ज्ञानाच्छादनस्वभावं मोहनभेदेत एवं दर्शनावरणादावपि योज्यं स्वभाववचने त्वेव भावसाधन
प्रकृतिशब्दः स्थित्यनुभावशब्दावपि भावसाधनौ। इयत्तयावधारणं तु प्रदेशशब्दः कर्मसाधनः कर्मनियमस्सूत्रे प्रविकल्पप्रस्
ले रादौ प्रकृतिबंधः उपात्तस्यावस्थानकालपरिच्छेदात्ततः स्थितिबंधः सत्यां स्थितौ फलदानसमर्थत्वादनुभावबंधस्ततः कर्मपु
द्गलपरिमाणः प्रदेशबंधः। संबंध इत्यत्र बंधस्य प्रस्तुतत्वात्तद्वेदेन परामर्शः विधिर्विधानं भेदस्तस्य विधयस्तद्विधयो बंधभेदा इत्ये
तद्वाच्यकृता विकृतमेवप्रत्येकं संबध्यतां बंधशब्देन तत्रायथोक्तप्रत्ययसद्भावे सति पुद्गलानां प्रकृतिबंधः कर्मात्मनोरेका
लक्षणस्तत्स्वात्मनोध्यवसायविशेषाद्भागेग पूर्वकादाहारपरिणामवत्कर्मपरिणतिः स्थित्यादिलक्षणा। तथा चोक्तमेवक
र्मपुद्गलराशेः कर्त्ता परिगृहीतस्यात्मप्रदेशेष्ववस्थानस्थितिरध्यवसायनिर्वर्त्तितः कालविभागः। कालांतरस्थानेसति विपाक
वतानुभावबंधः समादितविपाकावस्थस्य बदरादेरिवोपभोग्यत्वात् सर्वदेशघात्येकद्वित्रिचतुःस्थानिशुभाशुभतीव्रमंदा
दिभेदेन वक्ष्यमाणस्ततस्तस्य कर्तुः स्वप्रदेशेषु कर्मपुद्गलद्रव्यपरिमाणनिरूपणं प्रदेशबंधोत्र चवारमर्थप्रवचनविदः कणिका

गुडघृतकटुकांडादिद्रव्यविकारं मोदकमाहरंति। प्रकृत्यादिबंधनिरूपणाय तथाहि चित्रपुद्गलपरिणामः कर्त्तुरध्यवसायानुगृही
त भवति भाव्यते। मोदको हि वातपित्तश्लेष्मबुद्धिवर्द्धनः। समोदकारी मारक इत्यनेकेनाकारेण परिणमते जीवसंयोगात्तथा कर्मवर्गणा
योग्यपुद्गलराशिरप्यात्मसंबंधात् कश्चिद् ज्ञानमावृणोत्यपरो दर्शनं स्थगयत्यन्यः सुखदुःखानुभवहेतुरित्यादि। यो जंभयस्तस्ये
वाविपन्नगंधरसादेरविनाशिवे नावस्थानं स्थितिरित्याह च। इति कर्मणः प्रकृतयो मूलाश्चोत्तराश्च निर्दिष्टाः तासां यः स्थिति
कालविभागः स्थितिबंधः उक्तः सतत् स्निग्धचतस्रिग्धमधुरादेकद्विगुणादिभावोनुभावः तथाह। तासामेव विपाकनिबंधो यो
मनिर्वचननिर्व्यः सरस्योनुभावसंज्ञस्तीव्रो मंदो मध्यमो वा। पुनस्तस्यैव कणिकादिद्रव्यपरिमाणो वेत्थं प्रदेशः कर्मणोपि पुद्ग
लपरिमाणनिरूपणं प्रदेशबंध इति। यथोक्तं। तेषां इवेकैकानां स्कंधानां सर्वतोपि जीवेन सर्वैर्देशैर्योगविशेषाद् ग्रहणं
प्रदेशाख्यं। प्रत्येकमात्मदेशाः कर्मवर्गणावेष्टितैर्बद्धाः कर्मणि बध्नाति पुंचतोंध्यासात्तत्त्वयोगेन। इति करणमोलवंधभेदयत्ता
प्रतिपादनार्थः। ज्ञानावरणादि कर्मणामष्टानामपि प्रकृत्यादि भेद एव मोल इति। उत्तरसूत्रसंबंधार्थस्तत्र शब्दः। तत्र तेषु च
तुर्षु प्रकृत्यादिलक्षणेषु बंधभेदेषु प्रथमो भेदस्तदुच्यते। सद्विधा मूलप्रकृतिबंध उत्तरप्रकृतिबंधश्च मूलप्रकृतिबंधप्र
तिपत्त्यर्थमिदं वचनं। आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुष्कनामगोत्रांतरायाः। आद्यो भवत्याद्यः अनंतरातीत
सूत्रविन्याससंश्रयणात् ज्ञानदर्शनयोरावरणशब्दः प्रत्येकमभिसंबध्यते। ज्ञानावरणं दर्शनावरणमिति ज्ञानमवबोधल
क्षणो विशेषविषयः पर्याय आत्मनः तथा दर्शनपर्यायः सामान्योपलंभलक्षणस्तयोरावरणमाच्छादनमावृतिरावरण
माव्रियते वानेनेति भावकरणयोर्व्युत्पत्तिः सुखदुःखरूपेणानुभवितव्यत्वाद्वेदनीयमिति। कर्मसाधनो मोहयति मोहनं वा मु
ह्यते नेनेति वा मोहनीयं एवमेव गत्यंतराणि। सायुराधुरेव वायुष्कं स्वार्थे कन् नामयतीति नाम। प्रकृत्यस्यात्मा न गत्यादिपु
षमिति नम्यते वा प्रह्वीक्रियते नेनेति नाम कर्त्तरि करणे वा गुत्यायते गोत्रं उच्चनीचभेदलक्षणं तत्स्मृतिः। प्राणिसात्मेति गो
त्रं अंतर्धीयते त्वनेनात्मनो वीर्यलाभादीन्यंतरायः। अंतर्द्धानं चात्मनो वीर्यादिपरिणामस्येत्यंतरायकृत पुद्गलमिति
लक्षणसद्भावात्सर्वत्र साधिमा प्रतिपत्तव्य तुल्यार्थत्वात् संकीर्यते संज्ञा इति। वस्तुप्रसिद्धतरत्वा सर्पादिसंज्ञावत्। एवमे
ते ज्ञानावरणादयः कृतद्वंद्वाः प्रथमया निर्दिष्टा क्रमस्त्वेषामर्थपेक्षः। तथा च ज्ञानदर्शनावरणोदयजनिता सर्वसत्त्वानां भ
वव्यथा। तावदेयमानोपि मोहाभिभूतत्वान्नविरज्यते। अविरक्तश्च देवमानुषतिर्यङ्नरकायुषि वर्त्तते। न वा नामैकं जन्मज
न्मवंन्मध्यानुस्मृताः स देवगोत्रेणं नेव संसारिणां सुखलेशानुभवः सांतराय सर्व इत्यंतरायनिर्देशः आद्य इति। सूत्रक्रमप्रा
माण्याद्दिव्यादिमाख्यं। आद्यप्रथमो मूलप्रकृतबंधः इति कर्णशब्दपदार्थकः सूत्रतात्सूत्रमनेकभेदं कर्मयतः सूचयति। क्रम

×सत्रकारयत एवं चनेत्यादिनोत्तरप्रकृतिबंधं वक्ष्यति। समूलप्रकृतिबंधमेव वक्ष्यति प्रतिपादयति ×पं॰४·२

तत्वार्थ·टी० २३

मन्निवेशस्य प्रमाणमप्रमाणं वा इति न्यायः तस्मादत्र क्रमसामान्यादिति। द्वितीयपंचमी प्रकृतिबंधमिति। सामान्याभिधाने
पि मूलप्रकृतिबंधमेव वक्ष्यति प्रतिपादयन्निकूरणेः शुभाशुभस्य कर्मण इयत्ता प्रतिपत्तये भाष्ययोजीति। किं वा आद्यादित्यादिनास्य सूत्रस्य संबं
धमाचष्टे न केवलं प्रकृतिबंधे मूलविशेषणे उत्तरोपपदविशेषणेऽपि तेन प्रतिपादयन्नाह। पंच नव द्व्यष्टाविंशति। चतुर्द्विचत्वा
रिंशद्द्विपंचभेदा यथाक्रमं। पंचादीनां कृतद्वंद्वानां भवनविभक्त्या निर्देशः। एते भेदा यथाक्रममित्यनंतरसूत्रक्रमं प्रत्यवमृशति। अनंत
रसूत्रक्रमप्रामाण्यात् ज्ञानावरणादिभिः संबंधः। तोऽयं पंचादिकाश्चैतान् भावतः प्रतिमूलप्रकृति वक्ष्यति ताएव मूलप्रकृतिरनि
संबंधन्याह। स एष प्रकृतिबंधोऽष्टविधोपीत्यादि। आत्मपुद्गलद्रव्ययोराश्लेषलक्षणो सत्त्वेनेन सामान्यमात्रपरामर्शः। एषः इत्यवधिनः
परिणामः। विशेषप्रतिपत्तिः प्रकृतिबंध इति। मूलप्रकृतिबंधोऽष्टप्रकारोपि पुनः एकैको ज्ञानावरणादिः पंचभेदोऽमनीये इति। क्रमेणा
प्यक्षदर्शयति। पंचभेद इतीत्यादिना भाष्येण समुदायार्थस्य भाष्यस्य प्रागश्चबोदेशो मूलप्रकृतिप्रदर्शनमेव केवलमिहत्तरा
भेदानां संख्याप्रदर्शनमिति। तत्र पंचभेदो ज्ञानावरणप्रकृतिबंधः क्रमेण यावत्पंचभेदोंतरायप्रकृतिबंध इत्येवमेतद्यथाक्रमं प्रत्ये
तव्यमिति: प्रस्तुत्तरकालं यदभिधास्यामहे इति। तत्र प्रत्येतनेन सूत्रेण संबध्नाति। पंचादिभेदा ज्ञानावरणादयो निर्दिष्टाः स यथा ते
व्यवस्थिता। येन क्रमेण स्वरूपेण पंचादिभेदोऽस्य भाष्यापि मूलप्रकृति सूत्ररप्रकृतयः प्रतिपदं प्रदर्शयितद्याह। मत्यादीनामतिरादि
शीनां श्रुतावधिमनःपर्यायकेवलज्ञानानामिति। तद्गुणसंविज्ञानो बहुव्रीहिः। तानि मत्यादीनि तेषां मत्यादीनामावरणं क्रियायाश्च
मिष्ठत्वात्कर्मणि षष्ठी मत्यादीनामावरणं मत्यादीन्याव्रियंते येनेति। अपरे तु प्रतिपदं पंचापि पठंति। मतिश्रुतावधिमनःपर्या
यकेवलानामिति। एवं वा पार्थकः पाठो लक्ष्यते। यतोऽनंतरसूत्रे पंचादिभेदा ज्ञानावरणादय इत्यवधृतमेव निर्ज्ञातमेव स्वरूपतः प्रश्न
भाष्यादेव आख्यातत्वात्। अतआदिशब्द एवं वक्तुं युक्तः। भाष्यकारोप्येवमेव सूत्रार्थमावेदयति ज्ञानावरणं पंचविधं भवति। मत्यादी
नां ज्ञानानामावरणानि पंचविकल्पानि चैकशः इत्येतावदेव भाष्यमस्य सूत्रस्य तत्र ज्ञानावरणं पंचविधं भवतीति। अनेनानंतरसूत्रोक्तसंख्या
वधारणं मन्यते। सूत्रार्थमाचष्टे मत्यादीनां ज्ञानानामावरणानि पंचेति। मत्यादयएव ज्ञानानीति। सामानाधिकरण्यमाविष्करोति
तेषां मत्यादीनां ज्ञानानां पंचानां पंचैवावरणानि भवंति। वाक्यं सूत्रगतस्य समानाधिकरणप्रतिपत्त्यर्थं निष्पर्याय ज्ञानि तु सत्समस्ते
न समासः पूर्वपदे तु मनःपर्याये ऋजुज्ञानं मनःपर्यायज्ञानं। अथवा कारणरूपाः पर्यायाः कार्यत्वेनोपरचिता इति समानाधिकरण
इवतानि तु प्रथितान्येवं तद्यथा। मतिज्ञानावरणं श्रुतज्ञानावरणमवधिज्ञानावरणं मनःपर्यायज्ञानावरणं केवलज्ञानावरण
मिति। तत्रात्मनोऽनुभवस्य प्रकाशरूपस्य ज्ञानावरणक्षयोपशमक्षयसमुद्भवाः प्रकाशविशेषा मतिज्ञानादिव्यपदेशाः पर्यायाव
कृविकल्पाः तत्र च ज्ञानावरणस्य सर्वस्यानेन आवर्तो विकल्पाः संभवे निमित्तं ज्ञानावरणस्य विकल्पभेदाः

ज्ञाना॰ ५
दर्शना॰ ९
वेदनी॰ २
मोहनी॰ २८
आयु॰ ४
नाम॰ ४२।९३
गोत्र॰ २
अंतराय॰ ५
उत्तरप्रकृतिः।१२

२४

दिशोपादानात् मत्यज्ञानादित्रितयं संगृह्यते बोधसामान्यात्मनिश्चक्षुरादिविशेषाद्वत् तद्यथा। इंद्रियानिंद्रियनिमित्तत्वादवग्रहाद
यो मतिज्ञानस्याष्टाविंशतिः अंगानंगविकल्पाः श्रुतज्ञानस्य भवप्रत्ययक्षयोपशमजप्रतिपात्यप्रतिपात्यादिविकल्पाश्चावधिज्ञानस्य। ऋजुविपुलमतिविक
मनःपर्यायज्ञानस्य सयोगायोगवस्थादिविकल्पाः केवलज्ञानस्येति। तत्रेंद्रियनिमित्तं श्रोत्रादिपंचकसमुद्भवं क्षयोपशमजं ज्ञानं यो
ग्यदेशावस्थितस्वविषयग्राहि। अनिंद्रियं तु मनो वृत्ति ओघज्ञानं च तदेतन्मतिज्ञानं चतुर्भेदं अष्टाविंशतिर्वा त्रिशतैः षट्त्रिंशदुत्तर- त्रिशत ×५४×
भेदमाव्रियते येन तन्मतिज्ञानावरणं देशघाति लोचनपटलवत् चंद्रप्रकाशोऽभ्रादिवद्वा। तथा श्रोत्रेंद्रियोपलब्धिः श्रुतं शेषेंद्रियमनो
विज्ञानं च श्रुतग्रंथानुसारि स्वार्थाभिधानप्रत्ययलक्षणं श्रुतज्ञानं तदनेकभेदमाचक्षते प्रवचनाभिज्ञा। यथाहुः यावंतो अक्खराक्खर
संयोगा जितिया लोए एवइया पगडीओ सुयनाणे हुंति नायव्वा॥ तस्याप्रवृत्ति। श्रुतज्ञानावरणमेतदपि देशघातीति। अधोगतबहुत
रपुद्गलद्रव्यावधानादवधिः पुद्गलद्रव्यमर्यादयैव वात्मनः क्षयोपशमजः प्रकाशाविर्भावो वधिरिंद्रियनिरपेक्षः साक्षात्तेय
ग्राही लोकाकाशप्रदेशमानप्रकृतिभेदः तदावरणमवधिज्ञानावरणमिदमपि देशघात्येव। तथात्मनो मनोद्रव्यपर्यायान्नि
मित्तीकृत्य प्रतिभासो मनुष्यक्षेत्राभ्यंतरवर्त्तिपल्योपमासंख्येयभागावच्छिन्नपश्चात्पुरः कृतपुद्गलसामान्यविशेषग्राही मनःप
र्यायज्ञानसंज्ञस्तस्यावरणं देशघाति मनःपर्यायज्ञानावरणं समस्तावरणक्षयाविर्भूतमात्मप्रकाशातत्वमशेषद्रव्यपर्यायग्राहि के
वलज्ञानं तदाच्छादनकृत केवलज्ञानावरणमेतच्च सर्वघातीति। सांप्रति दर्शनावरणोत्तरप्रकृतिप्रतिपिपादयिषयाह। चक्षुर
चक्षुरवधिकेवलानां निद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानर्द्धिवेदनीयानि च। चक्षुरादयः कृतद्वंद्वाः षष्ठ्या निर्दिष्टाः। प्रस्तुता
वरणसंबंधात् वेदनीयसंबंधनिराकरणप्रतिपत्तेस्तत् दर्शनावरणमूलप्रकृतमाप्रर्णचक्षुरादयो दर्शनशब्देन सहाभिसंबं
ध्यानि द्वयः। पंचस्वानुपूर्वेनाः कृतद्वंद्वा वेदनीयशब्दोत्तरनिर्दिष्टाः समानाधिकरणप्रतिपत्त्यर्थं प्रथमयैवेनात्तेति चक्षुः सर्वमेवेंद्रि
यमात्मनः सामान्यविशेषावबोधस्वभावस्य करणं द्वारं तद्वारकं च सामान्यमात्रोपलंभनमात्मपरिणतिरूपं चक्षुर्दर्शनं। तल्लब्धि
घाति चक्षुर्दर्शनावरणं। शेषेंद्रियमनोविषयमविशिष्टमचक्षुर्दर्शनं तल्लब्धिघात्यचक्षुर्दर्शनावरणं अवधावपि प्रथमसं
पातिसामान्यमात्रोपलंभनमवधिदर्शनं केवलदर्शनमपि सामान्योपयोगलक्षणं। एतयोरावरणमवधिदर्शनावरणं केवलद
र्शनावरणं च स्वापो निद्रासुखप्रतिबोधलक्षणविवेदनीयमनुभवनीयं निद्रावासौ वेदनीयं चेति। सर्वत्र समानाधिकरणः दर्शनाव
रणोत्तरप्रकृतिप्रस्तावे वेदनीयं प्रस्तावापास्तमुपन्यस्तमित्यसमीचीनमिवाभाति यतो वेदनीयं तृतीयमूलप्रकृतिरिति। अत्रोच्यते
दर्शनावरणभेदा दर्शनावरणजातीया एव निद्रादयो यतः समधिगतायाएव दर्शनलब्धेरुपयोगघातिप्रवर्तंते। चक्षुर्दर्श
नावरणादि चतुष्टयं तूद्गमोच्छेदित्वात्समूलघातं निहंति दर्शनलब्धिमित्यतो दर्शनावरणभेदाः वेदनीयशब्दस्तु सामान्ये

नमकलंकर्मत्रितयवचनेपिप्रवचने प्रसिद्धतरत्वात्तृतीयमूलप्रकृतोव्यवच्छियते। अनुभवनीयत्वं तु सर्वकर्मणां परमा
र्थतः समस्तीति न दोषः। दुःखशतिबोधलक्षणनिर्विभागकर्दमायनलक्षणप्रबलावकर्मणा माचरतः शेयनं प्रचलाप्रचलासा
यतीति। स्त्यानर्द्धिमिन्नचित्तेऽनातीव विकस्वरचेतनस्यात्मा बहुलैकान्तकर्तारित्युदः। स्त्यानस्य स्थापविशेषस निगृहि त्वको स्त्यानि
लोपो मांसमोदकदन्तादिप्रसिद्धा स्त्यानगृद्धिः स्त्यानर्द्धिरिति वा पाठः। तदुदयाद्धि महाबलो ईश्वरकर्द्धचक्रवर्तितुल्यबलप्रकर्षशालि
नवत्यथाजघन्यमध्यमावस्थासु जिपि संहननापेक्षया संनवस्येवेति। स्त्यानस्य रुद्धिः स्त्यानर्द्धिरिति वा शब्दः समुच्चये इतिः दर्शनाव
रणभेदाः चक्षुर्दर्शनावरणादयो निद्रावेदनीयादयश्चेति वा व्याख्येयाः। यथा तु गामि च नाम्यं चक्षुर्दर्शनावरणमित्यादि सर्वगतार्थ दर्श
नावरणं नवभेदं नवतीसंते निगमितं नवभेदमेवेति। ८। संप्रति यत्तदागमे प्रसिद्धं वेदनीयत्वेन तृतीयमूलप्रकृतिरूपं तदुत्त
रप्रकृतिविवक्षया सूत्रकार आह। सदसद्वेद्ये। उत्तरप्रकृतिभेदमात्रस्य विवक्षितत्वात्प्रथमैव सद्वेद्यमसद्वेद्यं चेति वेदनीयमूल
प्रकृतेरुत्तरप्रकृतिद्वयं नवति तत्राभिगतमिष्टमात्मनः कर्तृरूपभोक्तृमनुजदेवादिजन्मसु शारीरमनोद्वारेण सुखपरिणतिरूपमा
गन्तुकानेकमनोज्ञद्रव्यक्षेत्रकालभावभवसंबंधसमासादितपरिपाकवस्य मतिबन्धभेदं यदुदयान्नवति। तदा च कृते सद्वेदनीय
मभिहितविपरीतमसद्वेदनीयमेवं विधाय्या तु बाधिव साध्यं। सद्वेद्यमित्यादिसन्नवः शास्त्रे प्रसंसा चात्मनोभिमतविषयत्वं अ
सद्वेद्यं तद्विपरीतत्वं च राघवोत्तरप्रकृति समुच्चितो वेदनीयं वेद्यं द्विविधिप्रकारं नवति। ९। संप्रति च तुर्थमूलप्रकृतेर्मोहनीयनाम्नः उ
त्तरप्रकृतिसमुच्चितो वेदनीयं वेद्यं द्विभेदं द्विप्रकारं नवति। ९। संप्रति च तुर्थमूलप्रकृतेर्मोहनीयनाम्नः उत्तरप्रकृतिप्रपंचा
ख्यानायाह सूत्रं। दर्शनचारित्रमोहनीयं कषायनोकषायवेदनीयाख्या द्वित्रिषोडशनवभेदाः सम्यक्त्वमिथ्यात्वतदुभयानि कषाय
नोकषायौ अनंतानुबंध्यप्रत्याख्यानावरणसंज्वलनविकल्पाश्चैकशः क्रोधमानमायालोभाः हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपु
न्नपुंसकवेदाः। मोहनीयमूलप्रकृतेरष्टाविंशतिरुत्तरप्रकृतयः संग्रहभेदारूपाः सूत्रेणैव निर्दिष्टा मोहनीयशब्दः प्रत्येकमभिसंब
ध्यते दर्शनमोहनीयं चारित्रमोहनीयमिति। संग्रहेण निर्देशः पुनश्चारित्रमोहनीयमुत्तरभेदाः वेदनीयसंग्रहेणैव निर्दिष्टा तद्भेदा
ख्याने तु कषायवेदनीयमिति दर्शनमोहनीयमित्यादिकाख्यायासामुत्तरप्रकृतीनां नामानि निर्दिष्टाः तासां भेदप्रतिपादनार्थमा
ह। त्रिद्विषोडशनवभेदा इति। निर्देशक्रमेणैव आद्यो भेदायासां तास्तथोक्ता दर्शनमोहनीयोत्तरप्रकृतिस्त्रिभेदा चारित्रमोहनीयो
त्तरप्रकृतिर्द्विभेदा तावाद्यविकल्पो कषायवेदनीयं षोडशभेदं। नोकषायवेदनीयं नवभेदमिति। एवमेता उत्तरप्रकृतयोऽष्टाविंशतिः
। सूचिता मोहनीयप्रकृतेरक्रमानुपूर्व्या द्विभेदास्सूत्रेणैव प्रतिपादयति। सम्यक्त्वमिथ्यात्वतदुभयानीति। सम्यक्त्वं मिथ्यात्वमिति तदुभयमि
ति द्वंद्वनिर्देशः। तत्वार्थश्रद्धानलक्षणं सम्यक्त्वं तद्विपरीतं मिथ्यात्वं तदुभयमिति सम्यग्मिथ्यात्वमतत्वश्रद्धानलक्षणं। एवमेतत्त्रिविधं २३९
दर्शनमोहनीयं सूचितं। कषायाकषायावित्यनेन चारित्रमोहनीयभेदद्वयाख्यानं अनंतानुबंधिप्रकृतिकषायास्तु एव मोहनीयं

अकषाया हास्यादयः केवला कषायसंपर्कस्थायाः स्वकार्यासमर्थाः इत्यकषायाः सदैव हि कषायसंपर्काच्चारित्रमोहनीयमपदे
शः। अकषायकार्यत्वादकषाया इति। तत्र कषायमोहनीयभेदप्रदर्शनार्थमाह। सूत्रसकलमनंतानुक्रोधमानमायालोभा इति। अनंतः संसा
रस्तमनुबध्नंति तच्छीलाश्च तदनुबंधिनः क्रोधादयः अविद्यमानं प्रत्याख्यानं येषामुदये तत्र अप्रत्याख्यानाः क्रोधादयः अपरे पुनरावरणश
ब्दमत्रापि दर्शं बध्नंति अप्रत्याख्यानावरण इति। अल्पं प्रत्याख्यानमप्रत्याख्यानं देशविरतिः तदघ्नं तृणं वृंति किं पुनः सर्वप्रत्याख्यानमितिमू
लगुणप्रत्याख्यानविघातवर्तिनः प्रत्याख्यानावरणाः क्रोधादयस्तु स्थानिमित्त्या प्रभावपियुगपत्संज्वलनाः क्रोधादयः एषां चानंतानुबं
ध्यादीनामेकैकस्य क्रोधमानमायालोभाख्या विकल्पा भवंति अनंतानुबंधिक्रोधादयः एवमप्रत्याख्यानाः प्रत्याख्यानावरणाः संज्वलनाश्चे
ति। एवमेतत्षोडशभेदं कषायवेदनीयं सूचितं हास्यादिना सूत्रावयवेन नोकषायवेदनीयमाचष्टे नवभेदमेवमेतदष्टाविंशतिवि
धमावेदितं मोहनीयं कर्म सूत्रेणैवेत्यध्ना भाष्यमनुस्रियते। त्रिद्विषोडशनवभेदा यथाक्रममित्यादिना भाष्यं ग्रन्थार्थं विनष्टान्यं दर्श
नचारित्रकषायनोकषायमोहनीयप्रकृतयः क्रमेण त्रिद्विषोडशनवभेदाः अनेनाष्टाविंशतिविधता प्रतिपादिता मोहनीयस्य मोह
नीयबंध इत्यादियथोक्तकारिकप्रसिद्धो मोहशब्दो द्विप्रकारो दर्शनमोहनीयाख्यश्चारित्रमोहनीयाख्यश्च तत्रार्थश्रद्धानं दर्शनं तन्मोह
नाद्दर्शनमोहनीयं प्राणातिपातादिविरतिश्चारित्रं तन्मोहनाच्चारित्रमोहनीयं। तत्र दर्शनमोहनीयाख्यस्त्रिभेद इत्यादि तत्र तयो
दर्शनचारित्रमोहनीययोर्दर्शनमोहनीयाख्यस्त्रिभेदः प्रकृतिबंधस्तावदुच्यते। तद्यथेत्यादिना तमेव प्रदर्शयति मिथ्यात्ववेदनी
यमित्यादि। तत्र दर्शनमोहनीयस्त्रैविध्यसत्यपि बंधे जवस्यैकविधएव। तत्वार्थश्रद्धानलक्षणमिथ्यात्ववेदनीयस्य सम्यक्त्वमो
हनीयस्यापि सम्यग्मिथ्यात्वमोहनीयस्येति। यतो मिथ्यात्वपुद्गला एवैकरूपा बद्धाः संतः कत्रासनोऽध्यवसायविशेषात्सर्वथा शो
धिता मिथ्याभावपरिणामं त्याजिताः सम्यग्मिथ्यात्वपरिणतिं वा प्रापिताः सम्यक्त्वव्यपदेशं भाजो भवंतीति। नन्वेवं विधा एव विधं तद
र्धविशुद्धास्तु सम्यग्मिथ्यात्वव्यपदेशभाज इति। यथाह। मिथ्यात्वस्योदये जीवो विपरीतदर्शनो भवति। न च तस्मै सद्धर्मः स्वदते
पित्तोदये घृतवत्। यथा कर्कमेण मिथ्यात्वस्य त्रिधा भेद समनंतरं सम्यक्त्वावाप्तिस्तत्र सम्यक्त्वगुणेन ततो विशोधयति। कर्म तत्र
मिथ्यात्वं। यद्वच्छकृत्स्नमिति त्रिशोधंति कोद्रवा मदनाः यत्सर्वथापि तत्र विशुद्धं तद्भवति कर्म सम्यक्त्वं। मिश्रं तु दरविशुद्धं भवत्यशुद्धं
च मिथ्यात्वं। मदनकोद्रवास्तु अवस्था अविशुद्धविशुद्धदरविशुद्धाख्यैः दृष्टान्तीकृता मिथ्यात्वसम्यग्मिथ्यात्वेषु मिथ्यात्वोदयात्तात
त्वश्रद्धा भवति विपरीतदृष्टित्वात्। यथाह। न तु कोद्रवान्मदनकान्नभुक्त्वा नात्मवशं तं मरो याति। मुह्यति च मुह्यति मिश्रगुणस्थापि
मिश्रादौ। सह मिथ्यात्वाभावगुणगुणेनो रेकान्तदयात्तु गुणपरिणमवर्तित्वात्यीतमप्युद्भूतरलक्षणपित्तादयाश्याकुलीकृत।
करणपुरुषवद्यथावस्थितार्थरुचिप्रतिघातकारिणा मिथ्यात्वेनान्यथैव प्रतिपद्यते। यथाह। मिथ्यात्वतिमिरपटलाच्छादितदृष्टी रागद्वे
षसंयुतो धर्मं जिनप्रणीतं नाभिनंदति। मिथ्यादिट्ठी जीवो उवइट्ठं पवयणं न सद्दहइ। सद्दहइ असन्भावं उवइट्ठं वा अणुवइट्ठं।

पथमहृरंचरणकंपि जानंति एवं कल्पनादिकं संसारे यं नो विकं मिश्रदृष्टिगुणो यद्वा। सत्यं तु प्रतिविशिष्टपुरुषप्रणीतमेव श्रद्दधाति च
रइति। यथोक्तं। अर्हत्प्रोक्तं गणधरदृष्टं प्रत्येकबुद्धदृष्टं च। स्थविरग्रथितं च तथा प्रमाणभूतं त्रिधा सूत्रं। श्रुतकेवलीव तस्मादधिग
तदशपूर्वकं यतो स्थविरो। आप्तोक्तकारित्वात् सूत्रमितरस्थविरदृष्टं। अरवातम्मि भवत्वेजमसद्दहणे तह्यालजीणे जा वा णं संमद्य
मजियदिहि य एणजियदिप्पंचतेति विदंहि। संप्रति सम्यक्त्ववेदनीयं शुद्धपुद्गलप्रत्ययस्तत्त्वार्थश्रद्धानपरिणामश्चात्मनः स चौपशमि
कादिभेदेन पंचधाम्नायाता। औपशमिकसासादनवेदकक्षायोपशमिकक्षायिकाख्यः। तत्रोपशांतदर्शनमोहस्य सम्यक्त्वमेव
तौपशमिकं सादेव सम्यक्त्वं अंतर्मुहूर्तकालावच्छिन्नउपशमसम्यक्दर्शनकाले संयोजनाउदयभावं षण्मावलिकावशेषे तस्मिन्नलोक
स्वादियंते। उपसमसम्मत्ताहि विवसमिवोपदस्संते। नतानुबंधिनि। यथाह संयोजनादयश्चेत्। सा दास्वादनं नाम सम्यक्त्वं तस्य तु विशु
द्धतलं दनावात् सम्यक्त्वमस्य वरं क्षायोपशमिकसम्यक्त्वं पुद्गलचरमयासात्तु नकाले वेदकसम्यक्त्वं उदितमिथ्यात्वपुद्गलच
रमयासात्तु नवकाले वेदकसम्यक्त्वं उदितमिथ्यात्वपुद्गलक्षायअनुदितमिथ्यात्वोपशमिकं क्षायोपशमिकमुक्तं। क्षायिकं तु नि
रशेषदर्शनमोहक्षये भवति सम्यक्त्वं नवविशुद्धपुद्गलरूपं तत्त्वार्थश्रद्धानलक्षणपरिणामस्वाभावा यथाह। पक्षीणे तम्मि
मत्ते सम्मदिट्ठि: कथं मतरूपो द्रव्यस्य तत्रैव: परिणामस्य तत्रैव: परिणामस्य न रूप। सम्यग्मिथ्यात्ववेदनीयमधुनोच्यते प्रथ
मतः सम्यक्त्वपुंजमादयत्करणत्रयं विधायोपसम्यक्त्वं प्रतिपद्यते। ततो मिथ्यात्वादिकं त्रिपुंजीत्वेन परिणमयति शुद्धमिश्राशुद्धभे
दयथाह। सम्मत्तगुणेन ततो विशोधयति कर्मतं मिच्छत्तं वद्दकल्पनतिद्वि:। शोधयति कोद्रवामदनास सम्यग्मिथ्यात्ववेदनत्वेद
नीयं वेत्थं वंडर्वपोरपिदृष्टं। इति शुद्धाशुद्ध दर्शनमोहे यता प्रतिपत्तये दर्शनमोहनीयप्रकृतिबंधः। माध्यायसंप्रति चारित्रमोह
प्रकृतिबंधाविष्यासयजगाद चारित्रमोहनीयाख्या द्विविधइत्यादि द्विकल्पश्चारित्रमोहप्रकृतिबंधः कषायवेदनीयं नोकषाय
वेदनीयं चेति।॥ एतावदिदं सूत्रं तच्चारित्रमोहनीयं यथाक्रमं तत्स्वरूपाख्यानायाह। तत्रैतयोश्चारित्रमोहभेदयोः कषायवे
दनीयाख्यस्तावद्यं षोडशभेदः। तद्यथे। रनेन भेदा नावेदयति अनंतानुबंधीक्रोधइत्यादि। अनंतसंसारो नारकतिर्यङ्मनुष्यदेव
जन्मजरामरणपरंपरालक्षणः तदनुबंधादनंतानुबंधिनः संयोजिनाश्च क्रोधमानमायालोभाः तत्र क्रोधाजीतिलक्षणः मानो गर्वः
माया स्तेयं। लोभो गार्ध्यं तृष्णा स्वनर्थांतरमाद्य संयोजयंति। नत्रमनंतसंसारैर्भवैः कषाया इति संयोजनता अनंतानुबंधिना वाप्यत
स्तेषां। अनंतानुबंधिनो च तावत् पूर्वतराजिशैलस्तंभघनवंशमूलकृमिराजाहारागोदाहरणानि। एवमप्रत्याख्यानावरणक
षायश्चतुर्धा क्रोधादिभेदेनेत्यतिदिश्यते प्रत्याख्यानं द्विविधं देशसर्वविरतिलक्षणं च तत्र देशविरतिलक्षणमस्येत दावरणक २३६
षायो प्रत्याख्यानावरणकषायसामर्थ्यादपि शह: समुच्चयार्थो निश्यते। येस्त्वमाहुरेवं तेषां तो सावद्यानंत सर्वविरतिलक्षणो
द्दयवं तथैव तनास्ति विरतिं कषाय इति जातिविवक्षायामेकवचननिर्देशः आदवाश्चाहुरेवं ति। प्रत्याख्यानं स्वल्पमपि येन।

श्री

जीवस्य। तेन अप्रत्याख्यानावरणस्तेन अदिमो त्वार्थः। उपशमार्थो वा न अप्रत्याख्यानावरणवदप्रत्याख्यानावरण: यथोक्तं
नावरणसहसकात्। भवति सिद्धांतत्वात् लक्षणवचने तत्सदृशः पुरुषएव इह: एषामुदये सम्यक्त्वलाभः। सर्वदेशविरति ल
क्षणं प्रत्याख्यानं नास्ति प्रत्याख्यानावरणकषाय इति। तथैवातिदेशः प्रत्याख्यानशब्देनात्र सर्वविरतिपरिग्रहस्तदावरणाः प्र
तिशब्दः प्रतिषेधवचन शब्देनात्र सर्वविरति प्रतिषेधस्याख्यानं प्रकाशतः आचार्यादिसंनिधौ भावतः सर्वस्मात् प्राणिनो न हन्मि
यावज्जीवमित्यादि प्रत्याख्यानं तदेवं प्रकारं स्थगयंतीति प्रत्याख्यानावरणः यथाह: सर्वप्रत्याख्यानं येनाहृत्यं तितदमिलः
षतो पि तेन प्रत्याख्यानावरणास्ते निर्दिष्टो सर्वप्रत्याख्यानपरिणामजन्मविघातकारित्वात् प्रत्याख्यानावरणाः नतुस
तएव प्रत्याख्यानस्येति वाक्यार्थः। तथा चाहुः सत्वाः नासं तस्यावरणं सउ तत्वाइति रमणपसंगा पच्चक्खाणावरणतत्ता
संभवावरणा उदएविइ परइपणई नहोइजेसिंपयाइ होइ पच्चक्खाणावरणातेइज्जइज्जइकेवलावरणं। तदुदयव
र्तिनिश्चयादशविधस्य धर्मबाभिर्यथाह। श्रावकधर्मो द्वादशभेदः संजायते ततस्तस्य। पंचविचतुसंप्यव्रतउणशिष्याम
यः शुद्धासंज्वलनकषायस्वरूपाय्यात आह। संज्वलनायाह। संज्वलनकषाय इति। समस्तपापस्थानविरतिभाजमपि यति
ड: सह परीषहसंपाते युगपत् संज्वलयंतीति संज्वलनाः यथाह। संज्वलयंतियतिमसं विग्नं सर्वपापविरतिमपि। तस्मात्सं
ज्वलना इत्यप्रशमकरा निरुच्यंते इति शह: कषायवेदनीयस्येयत्नामाह। एकश इति। एकैकस्य अप्रत्याख्यानप्रत्याख्यान
वरणसंज्वलनकषायस्य क्रोधादयो भेदाश्चत्वार इति। तत्राप्रत्याख्यानक्रोधः पुरोहरणानि भूराजस्थिमेषशृंग कर्दमरागाः
प्रत्याख्यानावरणक्रोधादेः रेणुराजिका ष्टगोमूत्रमार्गपंजनरागाः संज्वलनक्रोधादेर्जलराजितिनिशलतावलेहहरिद्रारागा एव
मेते षोडश भेदाः कषायवेदनीयस्येति। प्रस्तावप्राप्तं नोकषायवेदनीयमुच्यते। नोकषायवेदनीयं नवभेदमिति। कषा
येकदेशत्वात्कषायविशेषत्वात् नोकषायाः तस्योदयः मिश्रार्थो वा नो शब्दः कषायसहवर्तन एतेश्च कार्यनिर्वर्तनसमर्था: यै
न्न समीषां पृथक्सामर्थ्यमस्ति यदोषश्चायः कषायस्तत्सहचारिणः एतेपि तत्तद्दोषा एव भवंति। एतदुक्तं भवत्यनेनानुबंधा
दिसहवर्तिनस्तत्स्वभावका एव जायंते तस्मादेतेपि वरणोपघातकारित्वात्तत्तुल्ये व्याख्याः तथान्ये नाप्यवाचि। कषा
यसहवर्तित्वात् कषायप्रेरणादपि हास्यादिनवकस्योक्ता नोकषायकषायता। तद्यथेत्यनेन नवापि नोकषायान् स्वरूपे
णाख्यातुमुपक्रमते। तत्र हास्यं नोकषायमोहोदयात्सनिमित्तमनिमित्तं वा हसति। स्मयते रंगवतीर्नर्तनटवत्। रतिमो
होदयाद्बाह्याभ्यंतरेषु वस्तुषु प्रीतिरासक्तिरिष्टशब्दादिविषयेषु। अरतिमोहोदयादेतेष्वेवाप्रीतिररतिः शोकमो
होदयात्परिदेवते ते वक्षस्तलमाचयवानिश्वसिति तिरोदिति स्तोनति लोठति। भुवः पीवरं तादि। भयमोहोदयात्त्रसमुद्वि

जनेवेपत इत्यादि । तुगुप्सामोहनीयोदयात् ज्ञानजद्रव्यविषयं व्यलीकस्वप्रजायत इत्यादि । पुरुषवेदमोहोदयात् इनेकाकारास्तु
स्त्रीष्वभिलाषः आम्रफलाभिलाषवदिवीर्दर्शनेषु आप्तेः तथा संकल्पजास्वपीत्यादि । स्त्रीवेदमोहोदयात् इतरकेषु पुरुषेष्वभिला
ष संकल्पजेषु चेत्यादि । नपुंसकवेदमोहोदयात् बहुरूपस्तदुदयात् कस्यचित् स्त्रीपुरुषद्वयविषयोभिलाषः किल आदुर्जवतिधा
तुद्वयोदये मार्जितादिवदभिलाषवत् । कस्यचित्तु पुरुषेष्वेवाभिलाषसंकल्पजविषये वा निकरूपः । इत्यादि । इतिकरणेनोक्त
बाधे यत्नाः प्रदर्शनार्थमुक्तं मवमेनन्नोकषायवेदनीयं नवप्रकारमेवं पुरुषादिवेदानां त्रयाणामपि तीव्रादि परिणामसंसिद्ध्य
र्थं दृष्टांतान् विधिवद्दर्शयितुं गुरु पुरुषवेदादीनामिति । क्रमनियममाचष्टे तृणदहनकं च दं ह्याः प्रत्येकमभिसंबध्यते अभिसंब
ध्यंते निदर्शनानि दर्शयंत इति । दृष्टान्ता भवं त्येतानि कृतमंनि वेशाः क्रमात् इति त्रिष्वनेकनिदर्शनप्रसिद्ध्यर्थः । तत्र पुरुष
वेदमोहाग्नेर्ज्वलनः समासादितः प्रतिक्रियस्याग्नेवत् शमो जायते । सपासादितरतृणधूलकस्येव नातीव बाह्यमुरनुबंधः
स्त्रीवेदजात वेदसः करीषवत् तरकालावस्थायिना । संमाशपरिस्पर्शनेधनाभिवर्धितस्य चिरायप्रशमो जायते । इतरथा दिकाष्ठप्र
दद्ध ज्वालाकलापज्वलनस्येव नपुंसकवेदनमहामोहसमार्चिषः सुसमासादितेन्य दहस्य महानगरदाहदहनतुल्यमकारी ।
ष करणीरिवां नविकं नमाणे ऽतिमनतरकरणनिकरस्य बहुतरकाले प्रशमो भवति । संप्रत्युपसंहरति । एवमित्यादि उक्तेन प्र
कारेण द्विविधो ऽत्रानेदलक्षणोनाष्टाविंशतिभेदं मोहनीयमुक्तं संप्रत्यनंतानुबंध्यादिकषायाणामुदये यमात्मसम्यक्त्वादि सा
मायिकानां कविलवते । किंवानल्पनत इति । प्रतिविपादयिषुराह अनंतानुबंधीत्यादि । अनंतानुबंधिकषायोदयः सम्यग्दर्शनमु
परंति । तद्विध परिणामोत्पादमेव निरुणद्धीत्यर्थः । एतदेवस्पष्टयति । तस्योदयात् हि सम्यग्दर्शनं नोत्पद्यते । आगवामपि प्रतिपन
ती । नि । अप्रत्याख्यानेत्यादि सर्वदेशलक्षणया विरतिरभाव । प्रत्याख्यानेत्यादि देशविरतिर्भवति उत्तमचारित्रं सर्वस्मात्प्राणाति
पातादेविरमामीति स्वरूपं तस्य लाभो न भवतीति । नुर्विशेष धारणार्थः न जातु विंदिव भवतीति । संज्वलनेत्यादि । संज्वलनकषा
योदयेन कषायचारित्रलाभो नास्ति सर्वोद्दिष्ट सामायिके सोनंतरमप्राप्यातः क्रियाविशेषो यथाख्यातचारित्रस्य साद्
नंतरकारणं मुक्तेरिति । यथाख्यातचारित्रं बाद्येन्वाप्रकारेण यथाख्यातमकषायं चारित्रं भवतीति । सर्वथा कषा
यासंसारिदिंडयंति । जीवमितिकाकाप्रतिपादयति । यतस्तेषामुदाय प्रतिविशिष्टज्ञानः । क्रियावाभिरेव न समस्तीति । उ
पशांतक्षीणकरोयस्यादि । यथाख्यातमिष्यते न त्वाण्युपशांतकषायस्य कदाचित्पातोपि विशुद्धिस्थानात् कृतश्चिन्निशांकते ॥
क्षीणकषायस्य तु नास्ति प्रतिपातः । इशस्त्रैपर्यायवादेरपि क्रोधादिकषायाणां व्यवहारोस्तीति सनत्प्रदर्शने क्रोध इत्यादि २३७
क्रोधः कोपो रोष इति । कोपनं कोपः पूर्वावस्थातो न्यथा परिणामः रोषणं रोषः तत्परिणामेनार्द्रचित्ततात् आत्मनः द्वेषणं द्वेषः तस्य

रिणमस्यवचनद्वारेण प्रकाशनात् तन्निर्देशनात् भंडनं कलहः नामइति क्रोधविशेष ईर्ष्यालक्षणः एवमादयः शब्दाः क्रोधार्थप्र
तिपादकत्वादेकार्था अभिधायित्वाद नर्थान्तरमिति । अथ मानानंतानुबंध्यादिभेदस्यैकैकस्य क्रोधादेः स्त्रीशादिभावदर्शनार्थमिद
र्शनार्थं निदर्शनमाह भाष्यकारः तद्यथेत्यादिना चतुर्णामपि क्रमेणानंतानुबंधप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनानां
क्रोधमानमायालोभानामेकैकस्य चातुर्विध्यं दर्शयति पर्वतराजिसदृश इत्यादि । पर्वतराज्या सदृशः पर्वतः पाषाणपुंजस्तदेक
देशोपचारात् शिलादिविभागः पर्वत तत्र राजिर्भिदा पर्वतराजिः । तया सदृशः । अभिजायां राजिरुत्पन्ना यावच्छिला रूपं तावदवति
ष्ठते । न चतस्याः संधानमस्ति एवमनंतानुबंधी क्रोधः उत्पन्नो भवापेक्षया यावत्तत्र भवजीवति तावदप्यनुवर्तते । न तस्यास्युपसं
हरणोपायानदनुमरणे वध्यय सा नरकमेतीति अप्रत्याख्यानस्तु भूमिराजिसदृशः संवत्सरात्कालानुबंधी भूमौ हि राजिः
कृताः मासं वर्षं त यासानिधनमाप्यातिक्रोधे वेतुत्पन्नो वर्षाभ्यंतरे व प्रशाम्यतीति प्रत्याख्यानावरणस्तु वालुकाराजि
सदृशः । वालुकायां हि राजिरुत्पन्ना प्रकर्षतश्चातुर्मास्यभ्यंतरे भूयः संधत्ते क्रोधोप्येवं प्रत्याख्यानावरणश्चातुर्मास्याभ्यंतरे नियमे
नोपशाम्यतीति । संज्वलनक्रोधाग्निः समुद्भूतः पाक्षिकप्रतिक्रमणकाले प्रकर्षतो विध्यायतीति । उदकराजिसदृश इति समा
ख्यायते । अस्यैवनु उदकराजिसदृश इति समाख्यायते । अस्य च उदकराजिसादृश्यात् स्वल्पमात्रकालसंस्पर्शं केवि ज्ञेयं तत्र पर्व
तराजिसदृशो नामेत्यादिना ग्रंथेनोदाहरणानि भावयति । प्रयोगः आधारः विप्रसाक्ष्य भावभावः मिश्रकरणानु यथा परि
गुरुब दृष्ट्वा पारस्वा नावास्मामिति एषां त्रयाणामन्यतमेन हेतुनेति । संबंधः संप्रति क्रोधोत्पत्तेर्निमित्तमाख्याति । इष्टार्थवियोज
नाद् अनिष्टार्थसंयोजनात् अभिलषितालाभादिभ्यो दीनाकारणानामन्यतमेन हेतुना यस्योत्पन्नः क्रोध इत्यादिना वातरम
प्यनुबध्नाति निरनुनय इत्यनुनयः परवाटुकरणादिक्रिया तदभावान्निरनुनयः अप्रत्यवमर्श इत्यव द्यमानपश्चात्ताप
परिणामः शेषंगतार्थं भूमिराजिसदृशो नामेत्यादि अप्रत्याख्यानकषाया मानाभिप्रेता मते । आनम्रेहायादिति गृहीतापीतस्य
शामावायुनावान्याहनाद्यनेककारणैर्भूमिराजेरा वेदयति । जघन्येनाष्टमासस्थितिरुत्कर्षेण वर्षस्थितिरुत्क
र्षेण वर्षस्थितिरिति । एवं यथोक्त इत्यादिना । दृष्टांतेन दार्ष्टांतिकमर्थमभीकरोतीति सुज्ञानं वालिकाराजिसदृशो नामेत्या
दि । सुज्ञानं जघन्येनाहोरात्रमुत्कर्षेण संवत्सरपरिणामोपीति शेषं गतार्थं । उदकराजिसदृशो नामेत्यादि प्राय सुज्ञानं
विद्यमइति । क्रोधपरिणामाभिज्ञस्य प्रत्यवमर्शः पश्चात्तापः । हाउ दुकम्मित्यादि कशेषं सुज्ञानं येषामित्यादि । अनंतानु
बंध्यादि चतुर्विधक्रोधरूपणानुमुक्ति प्राप्तिर वरूपं भावि नातीति संप्रति मानचातुर्विध्यप्रदर्शनायाह । मान इत्यादि सर्वा
दात्मप्रज्ञाकांक्षित्वाम्मानः स्तंभनात्स्तंभो अथवा नतेरभावात्गर्वो जात्यादि उत्सेको ज्ञानादिभिराधिकेनिमान आत्मनः अहं
कारो हमेवरूपसौभाग्यसंपन्न इति दर्पाव लक्षितः मदादिमदव इमालापदर्शनान्मदः परापसदृश प्राय त्यात्मयः प

तत्वार्थ·टी० वंऽनेमानविशेषादस्यं जोनर्थान्तरमिति। क्रोधस्यैवास्थापितीव्रादिभावप्रदर्शनायाह। तस्माच्चेत्यादि तस्येति पूर्वोद्दिष्टस्य चास्य
तिपर्याया नेदस्य निर्दिष्टस्य आदिग्रहणं मध्यमं रूपं च गतोऽनात्मनः परिणतिविशेषः। अनंतानुबंधादिषु क्रमेणैतेषु तस्य
२३८ नसदृशोऽस्यास्य दाहरणनियोग्यानि। एषामित्यादिना तिदिशति। उपसंहारउपनयः। यथा शैलस्तंभस्तथानंतानुबं
धीत्यादि क्रमेण तस्मात्कृतस्थितिनिमित्ताद्यस्तन्नोमानः आमरणान्नमयं गच्छति। जात्यंतरानुबंधी निरनुनयोऽप्रत्यवमर्शश्च भ
वति। सशैलस्तंभसदृशो मानः दृशोमानमनुस्मृत्य नरकेषूपपत्तिप्राप्नुवन्ती ति निगमनग्रंथः। शेषाः सम्यगुक्ता एवम् स्थितं
न सदृशाइत्यादि ह्यपि यथायोगमुपनय निगमनेन क्रमेमायाप्रणिधिरित्यादिमीयते नया जनो सियेग्योत्यादि जनतिमाया
प्रणिधिर्हतापरिणता वासक्तिः प्रणिधानं वाह्यचेष्टा घापधीयते वाद्यन्त इत्युपधिरन्यथापरिणमश्चित्तस्य निक्रियते नया
परिस्यतः इति निकृतिः आवर्यते निगम्यते नो हृतेवा परस्तयोपाय नृतये स्यावरणं तथा वक्रकमार्जारगृह्यकोकिला
दयप्रसिद्धः परो विप्रलंभ्यते। मयासा वंचना दंभनं दंभो वेषवचनाद्यनुमेयः कूटमिति दृश्यते अयुना परःपरिणामांतरेणेति
कूटं। सम्यग्दर्शनं पंत्रे वा कूटं तद्वत्परिणामः अविसंधीयते नेन परइति संधानं अतीवानुप्रविश्य संधानमंतरगता प्रदर्शनेन
तो विनाशः कुजो भावआर्जवं तद्विपरीतमनार्जवं कायमनोवकृता इतिशेषं एवार्थे। एवमेता मायाका थविधायीनि मायानीति
तस्याइत्यादि नागतार्थं वंशकुलेवं शमूलमतिकुटिलं कुजुकं तु मेषशृंगं तु पायशृते ना विशेषागतार्थाः आयः निर्लेखनं वर्ध
कयवलेखनीधारा छिद्रितं तत्कुटिलं तत्रापीत्यादि गत्यर्थो नोरागं इत्यादिषु स्पृतेनेन जीनं इति लोभः आत्मरंजनाद्रागः
प्राप्तेषु वस्तुषु गाढमभिरक्षणादिकार्यं गृद्धिः कृत्णं इत्यनिलाषक्रुलोकविषयः। मूर्छाप्रकर्षप्राप्ता मोहदृद्धिः स्नेहः तस्यैनेनेति
स्नेहः पिरस्नेहः पिशुन्यादिषु प्रीतिविशेषः न विषयकालोपादानविषयकांक्षा अनिष्टंगो बाह्याभ्यंतरोपकरणविषयामुष्य सं
गः सक्तिः शेषं पूर्ववत्। लाक्षारागसदृश इत्यादि। अनंतानुबंध्यादयः क्रमेण योज्याः। शेषं गतार्थं एषां क्रोधादीनामित्यादि
प्रकृतानुपयोगित्वादसंबद्धइव योऽयं ग्रंथः मोहनीयोत्तरप्रकृतिस्वरूपाख्यानमारब्धं तत्र क्रोधादिप्रत्यनीकाः क्षमा
दयइतिकः प्रस्तावइत्यतो मोहनीयप्रधानानि हि कर्माणि सर्वदेशोपघातद्वारेण जंतोर्नरकादिभवप्रपंचप्रापणे विजृंभि
तेमोहतंत्रत्वाद् कषायजनिता कषायवशाद्बंधस्थितिविशेषः सर्वदुःखवाप्तिश्चयदुक्तं। जंअज्जियं चरितं देसूणाए य पुव्वकोडीए। तं पि कसाइयमेत्तो
हारेइ नरो मुहुत्तेणं। इत्यादि। तन्नेतदुक्तं एकसाययाल्पबुद्धिरुन्मत्तवस्तुसंबद्धं तत्र तत्र संवरणोपाय प्रदर्शनाय चाह। अनंतानुबंधिनां सम्यग्दर्शनोपघातिनां
ततामतेस्य सनीयाः कर्मलक्षणावधव मि क्रतास्युरूणा नाव्यं गतार्थप्रायः प्रत्यनीकाः शास्त्रवक्ष्यते। अनंतानुबंधीनामुदयात्सम्यग्दर्शनं नोत्पद्यते
मानार्थः। शास्त्रवद्बद्धे दत्साधर्म्यात्। एतदेवस्पष्टयति। प्रतिघातहेतवो भवंतीति। अच मिथ्यादर्शनमोहकषायाष्ट
कादशसर्वघातिन्यः प्रकृतयः संज्वलनकषायादेशघातिमनतुबद्धस्वनामत्वत्रपिति। नपुंविधवंसस्त्रेतद्वैवं नवति २३८
दर्शनचारित्रमोहनीयकषायनोकषायवेदनीयाख्या द्विषोडशनवभेदाइत्येवविहितार्थसंग्रहस्योत्तमं त्रिदसुक्तं

सांप्रतं गोत्रादीनांसुखोद्देशेन वर्तितव्यंधन नतत्रत्याघवादीन् सूत्रकारः एवदेवमिति। संप्रतिक्रमप्राप्तस्यायुष्ककर्मणउत्तरप्र
कृतिस्वरूपाभिधित्सुराह। नारकतैर्यग्योनमानुषदैवानि नारकादीनि कृतद्वंद्वानि प्रथमा बहुवचनेन तद्दिष्टानि। यस्माद
यात्म्ययोग्य प्रकृतिविशेषानुसहायीभूत आत्मा नारकादिभावेन जीवति यस्य चक्षयात् मृतउच्यते तदायुः। आहवस्थानुरू
पाश्रयो मानं योऽसौ प्रयमाम्नता। जीवनं यत्तदायुष्कमुक्ता दास्या जीवति। आयुषश्चान्नादयउपग्राहकाः प्रथमवन्दसेतित
स्यैवंभूतस्य कर्मण उत्तरप्रकृतिचतुष्टयं वर्ण्यते। आयुष्कं चतुर्भेदमित्यादिना थं आनीयते शेषप्रकृतयस्तस्मिन्नुपभोग्या
यजीवेनेत्यायुः शाल्योदनादिवंजनविकल्पा इवकांस्यपात्राधारा भोक्तुपरिभोग्य यकल्प्यंते। आनीयते वा तेनतद्भवांतरजीवे प्रकृ
तगणइत्यायुरजुबंधकुयष्टि नारकवत्। आयतते वा शरीरधारणे प्रतिबंध इत्यायुर्निगडादिवत्। आयुरिवायुष्कं चतुर्ग
तिकत्वात् संसारस्य चतुर्भेदं प्रदर्शनार्थमाह। नारकमित्यादि तत्र नारकाउत्पत्तिर्यातनास्थानानि पृथिवीपरिणतिविशेषास्ता
त्संबंधिनः सत्त्वं बधिनः सत्वा अपिताच्छानरकास्तेषामिदमायुर्नारकं तिर्यग्योनयः एकद्वित्रिचतुःपंचेंद्रियास्तेषामिदं तैर्यग्यो
नं मनुष्याः संमूर्छनगर्भजास्तेषामिदमानुषं देवानां भवनवास्यादिभेदानामिदं दैवं शेषं आयुःप्रकृतीयत्ताप्रतिपत्तये च सं
प्रतिनामकर्मोत्तरप्रकृतिभेदाख्यानायाह। गतिजा तीत्यादि प्रायुद्दिष्टद्वाचत्वारिंशत्पिंडभेदा नामकर्मणस्तत्प्रतिपादनार्थं सूत्रं।
नमयति प्रापयति। नारकादिभवांतराणि जीवमिति नाम अथवा जीवमिति। नाम अथवा जीवमिति। नाम अथवा जीवप्रदेशसंबं
धिपुद्गलद्रव्यविपाकसामर्थ्याद्दृष्यार्थसंज्ञां प्रकयति। नमयतीति नाम यथाशुक्लादिगुणोपेतद्रव्येषु चित्रपटादिव्यपदेशप्र
तिनियतसंज्ञाहेतुरिति। तत्र गतिनाम चतुर्विधं जातिनाम पंचविधं शरीरनाम पंचविधं अंगोपांगनाम त्रिविधं। निर्माणना
मैकधा। संस्थाननाम षोढा संहनननाम षोढा। स्पर्शरसगंधवर्णनामैकैकविधं आनुपूर्वीनाम चतुर्धा। अगुरुलघुनामैकधा
उपघातपराघातातपउद्योतउच्छ्वासनामान्येकैकविधानि विहायोगतिनाम द्विधा। प्रत्येकशरीरसाधारणशरीरत्रसस्था
वरसुभगदुर्भगसुस्वरदुःस्वरशुभअशुभसूक्ष्मबादरपर्याप्तपर्याप्तस्थिरअस्थिरआदेयअनादेययशःअयशःतीर्थकर
नामान्येकैकप्रकाराण्येव। एवमेताउत्तरप्रकृतयो नामकर्मणः समवसेयाः। अत्र च बंधनसंघातननाम्नी शरीरनामांतर्भूते एवा
तः शरीरविशेषत्वादेव नोत्तरप्रकृती पृथक् स्तेयत्वपादानं पार्थक्येन तत्रायोस्वरूपप्ररूपणार्थमिति गतिनामेत्यादिना थं
तत्र गतिनामेत्येवमादिना भाष्येण इत्येतद्द्विचत्वारिंशद्विधं सूत्रेण नोनाम कर्मभवतीत्येवमेते नपिंडप्रकृतिमात्रमाख्याते
गतिरेव नाम गतिनाम। नामशब्दः सर्वत्र जातिनामादिष्वपि समानाधिकरणः आनुपूर्वीनामत्वमिति पदं स्यात् अनुपूर्वी नामततन
श्च प्रथमपादिस्तत्रमेवं आनुपूर्व्यगुरुलघुपघात इति प्रत्येकशरीरादीनां दशानामेतराणामिति सप्रतिपक्षाणां साधारणश
रीरादीनां दशानां नामानि अभिधानानि वेदयमानानि विज्ञेयानि। अथवा प्रत्येकसरीरादीनां द्वंद्वपदानां समानाधिकरण

विवक्षा यानामानीति अस्ति विवक्षितो नामग्राह उत्तरग्रंथवर्तीति तद्यथेत्यादिनो निर्दिशः सामानाधिकरण्येन प्रत्येकशा-
रीरनामादिकं च तीर्थकरनामप्रकृष्टत्वात् गतिशब्दः पिंडप्रकृतीयत्ताप्रदर्शनार्थः एते हि नाम यथोक्तं द्विचत्वारिंशद्भेदं भ-
वति सह बंधनसंघातनामभ्यां आसां पिंडप्रकृतीनां संप्रति भेदाः संप्रतिपत्तये। वक्ष्यते उत्तरनामानेकविधमिति उत्तरप्रकृति-
नामेत्यर्थः। पिंडप्रकृतिभेद इत्याह। तद्यथेत्यादिना निर्दिशति गतिनाम्नः पिंडप्रकृतेश्चत्वारो भेदाः। नरकगतिनामोदयः त-
त्रायस्य कर्मणः उदयान्नारक इति व्यपदिश्यते तन्नरकगतिनाम एवं तिर्यग्योनिनामादि त्रितयमपि वक्तव्यं जातिनाम्न इत्यादि
नाम जातिनाम्नि पिंडप्रकृतिरेकेंद्रियादिजातिपंचकापेक्षया एते च मूलभेदाः पंच तद्यथेत्यादिना निर्दिशति। एकेंद्रियजाति
नामेत्यादि एकं प्रथममिंद्रियं जातिः सामान्यं तदेवानामेवं। द्वींद्रियजातिनामादि चतुष्टयमपि वाच्यं। एकेंद्रियजातिनामकर्मो-
दयादेकेंद्रिय इति व्यपदिश्यते। एकेंद्रियसंज्ञाव्यपदेशनिमित्तं एकेंद्रियजातिनामाजातिरिति सामान्यं पृथिव्यादिभेदप्र-
त्वित्वात्। एकेंद्रियजातिनामकर्मोदयादेकेंद्रिय इति व्यपदिश्यते। एकेंद्रियसंज्ञाव्यपदेशनिमित्तं। एकेंद्रियजातिनामाजा-
तिसामान्यं पृथिव्यादिभेदप्रमितत्वात्। एकेंद्रियजातिनामांतरेणैकेंद्रियसंज्ञाया अभावप्रसंगात्। एकेंद्रियजाति
नामानेकविधमित्यादि। एकेंद्रियादिजातयो पिंडप्रकृतयः एवं पृथिवीकायिकादिभेदापेक्षया तद्यथेत्यादिना निर्दिशति।
पृथिवीकायिकजातिनाम पृथिव्येव कायः पृथिवीकायः स एषामस्तीति पृथिवीकायिकाः तेषां जातिः तदेव नाम पृथिवीकायिक-
जातिनाम पृथिवीकायिकजातिनामोदयात् पृथिवीकायिकव्यपदेशः। एवं शेषाणि। तत्र पृथिवीकायिकजातिनामानेकविधं भे-
दपुनरपि पृथिवीकायिकजातिनाम्नः पिंडप्रकृतित्वं दर्शयति। तद्यथेत्यादिना निर्दिशति। शुद्धपृथिव्यादयो भेदाः आगमाख्याता नाना-
नाकुलपरिणामाः पृथिवीकायव्यपदेशभाजः इति। अप्कायिकजातिनामानेकविधमित्यादि। तद्यथेत्यादिना निर्दिशति। उप-
क्लेदोहरतनुकः भूमिनिर्गमिरणप्रभृतिः। शेषागतार्थभेदाः तेजःकायिकादिगतार्थो द्वित्रिचतुःपंचेंद्रियजातिनाम्नामिति शेष-
खद्रिका कृष्णपदिका पिपीलिका भ्रमर सरघादि तिर्यग्मनुष्यादि भेदेन व्याख्यानि शरीरनामोत्तरप्रकृतयः पंच तत्प्रतिपाद-
नायाह। शरीरनामेत्यादि। असारस्थूलद्रव्यवर्गणानिर्मापितमौदारिकशरीरं तत्प्रायोग्यपुद्गलग्रहणकारणं यत्कर्म तदौदारि-
कशरीरनामोच्यते। विचित्रशक्तिकद्रव्यनिर्मापितं वैक्रियं तद्योग्यपुद्गलादानकारणं यत्कर्म तद्वैक्रियशरीरनामाभिधीय-
ते कारणे कार्योपचारात्। प्रयोजनप्रसाधनायाक्रियत इत्याहारकशरीरं शेषं पूर्ववत्। तेजोगुणद्रव्यारब्धमुष्णगुणमाहार-
परिपाचनक्षमं तैजसं शरीरं शेषं पूर्ववत्। कुंडमिव बदरादीनाम शेषकर्माधारभूतं समस्तकर्मप्रसवनसमर्थमंकुरादी- २३९
नां बीजमिव कार्मणं शरीरं इत्येवं चोत्तरप्रकृतिः शरीरनामकर्मणः पृथगेव कर्माष्टकात् समुदायभूतादिति। अंगोपांगेत्या-
दि। अंगान्युपांगानि च यस्य कर्मण उदयान्निर्वर्त्यते तदंगोपांगनाम त्रिविधमौदारिकवैक्रियाहारकभेदात् तत्रांगान्यष्टावुरःशि-

रः पृष्ठमुदरं करौ पादौ च उपांगानि स्पर्शनमस्तिष्कादीनि अष्टानामंगानामेकैकस्योपांगमनेकप्रकारं शिरोद्रव्यमधिकृत्योपांगा-
नि शंखकृत्यपालमस्तिष्कं भ्रुकुटिलिंग शिरोगस्थारं तु कोवयवः। तथा कपालललाटादयः सर्वानादयश्च। ननु च धातुमध्ये धीतं मस्तिष्कं
नांगं न चोपांगमिति। कपालादि च दारं च कत्वान्मस्तिष्कमप्युपांगं शिरसो वसेयमेव स्कर: प्रस्तसंगानामयेकैकस्य वाच्यान्युपांग
नामानि। ज्वलनजलानिलवसुधावनस्पतिवर्जा जीवेषु संभवंति। जातिलिंगाकृतिव्यवस्थानियामकं निर्माणनाम जातिरेकेंद्रि-
यादिलक्षणा पंचधोक्ता। तस्यां जातौ लिंगव्यवस्थामाकृतिव्यवस्थां च नियमयति। यल्लिंगं त्रिधा पुंस्त्रीनपुंसकस्यवयवदसा-
धारणं। आकारः आकृतिः अवयवरचना। तं च निर्मापयति निर्माणनामोच्यते। एतदुक्तं भवति। सर्वजीवानामात्मीयात्मी-
यशरीरावयवविन्यासनियमकारणं निर्माणनाम प्रसादादिनिर्माणकल्पा। कौशलेपनवर्द्धकिवत् स संधार्मे विन्यासादि
शरीरनामकर्मोदयात् गृहीतेषु गृह्यमाणेषु च तद्योग्यपुद्गलेष्वात्मप्रदेशावस्थितेषु शरीराकारेण परिणमत्सु पिपिपि परस्परमवियोग
लक्षणं यदि बंधननाम काष्ठजतुवत् तस्यान्ततो वा लुकापुरुषवदिवि घटेरन् शरीराणीति देतेन भाष्येण प्रतिपादितं। औदारिकादिभेदा-
त्पंचधा बंधनभेदं प्रकृतं शरीरनामकर्मणः संघातप्रकृतिस्वरूपनिरूपणायेदमाह। बंधनामेत्यादि बंधनामपि च पुद्गलानां
परस्परं जतुकाष्ठन्यायेन पुद्गलरचनाविशेषः संघातः संयोगे बात्मना गृहीतानां पुद्गलानां यस्य कर्मण उदयादौदारिकतनुविशे-
षरचना भवति तत्संघातनामकर्म पुद्गलरचनाकारेणविपच्यत इति पुद्गलविपाक्युच्यते। तदौदारिकादिभेदात् पंचधा परस्परविभि-
न्नलेप्यकरचनाविशेषवच्छरीरपरिणामः एव फलं स्पते। नन्वेवं बंधः कर्मभेदो यदि न स्यात्ततः प्रत्यक्षप्रमाणविनिश्चितः पुरुषयोषि-
तद्वदिलक्षणानानाशरीरभेदो नैव संभाव्येतासंघातककर्मविशेषाभावात् कारिणस्तु विधायी च कार्यलोके प्रतीतं संघातवि-
शेषादेव हि पुरुषस्यादि शरीरलक्षणो विभागेन व्यपदेशः अपि चाह संज्ञावनार्थः चशब्दो वधारणार्थः सत्येव बंधननाम्नि-
न स्याद्विशेषः। यतः संघातविशेषजनकं च यविशेषास्तं प्रति नाम संघातविशेषस्य जनकमिति। शेषलक्षणपष्टीति। ना-
स्तिसमासप्रतिषेधः सतु प्रतिपदविहिता याः षष्ठ्याः प्रतिषेधः प्रत्ययविशेषादिति प्रत्ययविशेषाद्वेनोः पुद्गलानां विन्यासपुरु-
षस्त्रीशरीरादिकः चशब्दो वधारणार्थः। यन्निमित्तश्च स विन्यासौ स तत्संघातनाम नत्रसिद्धोदाहरणेन भावयन्नाह। दारुमृत्पिंडा-
यः पिंडसंघातवदिति। तद्बंधनाद् लोमादिः पिंडग्रहणं कृतं दारुमृदयस्पिंडवदिति द्रुतत्वरस्यात्। अयो दारुमृत्पिंडवदि-
ति। किं च कृतं अप्रतिबचनाः पल्वाचार्याः स कृदविधाय नानिवर्तने। दारुपिंडवन्मृत्पिंडवदयःपिंडवदिति दृष्टांतत्रयं
पुद्गलमत्वात्प्रतिपत्तुप्राप्तिशायिकप्रबोधहेतुत्वात्। दार्ववयवसंघातो दारुपिंडः एवं मृदवसंघातो मृत्पिंडः तथायोवयवानां सं-
घातो अयःपिंडः स एव मौदारिकादिशरीरयोग्यपुद्गलाश्चतनेनात्मसात्मसात्कृतसंघातनामकर्मोदयात् परस्परं संहताः संति
इति संस्थाननामस्वरूपाख्यानायाह। संस्थाननाम षड्विधमित्यादि संस्थितिः संस्थानमाकारविशेषस्तेष्वेव च बध्यमानेषु पुद्ग-

लेषु संस्थानविशेषो यस्य कर्मणः उदयाद्भवति तत्संस्थाननाम षडाकारं तद्बध्यति। अनेन षड्विधनामग्रहणमाचष्टे समचतुरस्रनामे
त्यादि। समं च तच्चतुरस्रं चेति समचतुरस्रं। यत्तस्य मानोन्मानप्रमाणमन्यूनमधिकमंगोपांगानि चाविकलानि ऊर्ध्वं तिर्यक् च क
लेन वा समं चतुरस्रं वा विकलावयवत्वात् स्वांगुलाष्टशतोच्छ्रायांगोपांगयुक्तं युक्तिनिर्मितलेप्यकवत्। न्यग्रोधपरिमंडलनाम
कनाभेरुपरि सर्वावयवाः समचतुरस्रसंस्थानलक्षणविसंवादिनो धस्तान्न तदुपरितनभागानुरूपास्तस्य नावयवा इति य
त एव न्यग्रोधपरिमंडलं तदुच्यते न्यग्रोधाकृतित्वात्। न्यग्रोधपरिमंडलमुपरि विशालत्वाधत्वादिति। सादिनामस्वरूपं तु नाभेरधस्स
र्वावयवाः समचतुरस्रलक्षणाविसंवादिन उपरि तु न तदनुरूपाः साचीति शाल्मलीतरुमाचक्षते प्रवचनवेदिनः तस्य हि स्कंधो
द्राघीयानुपरि तु न तदनुरूपा विशालतेति। कुब्जनामस्वरूपं तु नस्कंधराया उपरि हस्तपादं च समचतुरस्रलक्षणयुक्तं संक्षिप्त
विकृतमध्यं कोष्ठं च कुब्जं। वामननाम तु लक्षणयुक्तं कोष्ठं ग्रीवा ऊर्ध्वं हस्तपादयोश्च न्यूनलक्षणं वामनं। हुंडसंस्थानं तु यत्र पाद
द्यवयवा यथोक्तप्रमाणविसंवादिनः आयतं हुंडसंस्थानमिति। तथा चोक्तं तुल्लं वित्थरबहुलं उस्सेहबहुलं च मडहकोट्ठं च
हेट्ठिल्लकायमडहं सव्वत्थासंठियं हुंडं। संहनननाम षड्विधमित्यादि। अत्र पूर्ववदाख्यातत्वोत्यादिना षण्णामपि स्वरूपमा
विर्भावयति। वज्रर्षभनाराचं यत्र संहनने तद्वज्रर्षभनाराचः पट्टः वज्रं कीलिका मर्कटबंधविशेष इति। अर्द्धवज्रर्षभ
नाराचनाम तु वज्रर्षभनाराचानामर्द्धं किल सर्वेषां वज्रस्यार्द्धं ऋषभस्यार्द्धमिति भाष्यकरमिति कर्मप्रकृतिग्रंथेषु वज्रना
राचनाम्ने पट्टहीनं पट्टहीनं पठितं किमत्र तत्त्वमिति संपूर्णानुयोगधारिणः संविदते। अर्द्धग्रहणादा ऋषभहीनं आधेयं
नाराचनाम्नि तु मर्कटबंध एव केवलो न कीलिका न पट्टः अर्द्धनाराचनाम्नि त्वेकपार्श्वे मर्कटकबंधः। द्वितीयपार्श्वे तु कीलि
केव मर्कटबंधः। अत्रापि कर्मप्रकृतौ नैवास्ति कीलिका नाम विना मर्कटकबंधेनास्थिमध्ये कीलिमात्रं स्फाटिकानाम
कोटिद्वयं संगते ये अस्थिनी चर्मस्नायुमांसावबद्धे तत्स्फाटिकामकीर्सते स्फाटिका फलसंपुटकं यथा तत्र फलकानि
परस्परस्पर्शमात्रवृत्त्या वर्तंते। एवमस्थीन्यत्र संहनने तदेवमेतान्येवंविधास्थिसंघातलक्षणानि संहनननामान्यौदारिकशरीर
एव संहन्यंते। लोहपट्टनाराचकीलिकाप्रतिबद्धकपाटदिति। स्पर्शनामाष्टविधमित्यादि। औदारिकादिषु शरीरेषु यस्य कर्म
ण उदयात्कठिनादिः स्पर्शविशेषः समुपजायते तत्स्पर्शनाम। अष्टविधं नामष्टभेदतो प्रतिपादयन्नाह। कठिननामा
दीनि कर्कशमृदुगुरुलघुस्निग्धरूक्षशीतोष्णनामानि। स्वस्थाने त्वनेकभेदत्वमेषां प्रकर्षापकर्षजनितं रसनामानेकवि
धं तिक्तनामादि रसनामानेकभेदं तिक्तकटुकषायाम्लमधुरलवणरसा। लवणो मधुरांतर्गतः संसर्गे चानेकविधग्रहणं २४०
तिक्तादीनां भेदप्रतिपादनार्थं। एवमन्यत्रानंतरं द्वावाच्याः गंधनामेकविधं सुरभिगंधनामादि शारीरविषयं सौरभ्यं दुर्गंधि
त्वं च यस्य कर्मणो विपाकान्निर्वर्तते तद्गंधनाम। अपरे साधारणं गंधमाहुः स्तत् सतसुरभिगंधदुर्गंधिना चाभिहितं। न साधारणः कश्चि

दस्तीति। वर्णनामानेकविधं कालकनामादि यस्योदयात् शरीरेषु कृष्णादिः पंचविधवर्णनिष्पत्तिर्भवति। तद्वर्णनाम कृष्णनीललोहि
तपीतशुक्लभेदं संसर्गादिभेदानि स्पर्शनामादीनि। वर्णतामाता विसरीरवर्तिषु पुद्गलेषु विपच्यंते इति। आनुपूर्वीनामस्वरूपनि
रूपणायाह। गतावुत्पत्तुकामस्येत्यादि। गम्यते सा विति गतिर्नारकादिरूपपत्तिस्थानं। तद्गतिनामकर्मोदयात् प्राप्यते तस्यां गता
वुत्पत्तुमिच्छतः कर्मसामर्थ्याद् आत्मनः अंतर्गतौ वर्तमानस्येति। मनुष्यतिर्यग्जातिर्वा मनुष्यादिरुत्पत्तिस्थानं न प्राप्नोति तावदंतर्गतिः
तत्र वर्तमानस्य कस्यचिज्जंतोस्तस्यानुपूर्वीनामकर्मोदयो भवति। आनुपूर्वी च देहसन्निवेशक्रमः। अनुश्रेणि गतिर्जीवानां पुद्गला
नां चेति वचनात्। तत्र पुलक्रमेण स्वतिशयेन तत्र गमनानुपूर्व्या तस्यानुपूर्वीशब्दवाच्यं भवति। न वात्मनो गसंतरं गच्छत उपश्लेष
तो ऋषभस्वेव पत्यः सा चांतरगतिर्द्विविधा ऋज्वी वक्रा च। तत्र यदा ऋज्व्या गच्छति समयप्रमाणया तदा पूर्वकमेवायुरनुभवन्नानु
पूर्वीनामकर्मोदयो स्वस्तित्वात् प्राप्तः पुरस्कृतमायुः साद्यति। वक्रगत्या पुनः प्रवृत्तरूर्परलांगलगोमूत्रिकालक्षणया द्वित्रिचतुः
समयमानया वक्रकारं कालेषु पुरस्कृतमायुरुदेति तदैवानुपूर्वीनामोदेति। ननु च यथैव गता ऋज्व्या विनानुपूर्वीनामकर्मणो
त्पत्तिस्थानं प्रियते तद्वक्रगत्यामपि कस्मान्नेति उच्यते। ऋज्व्यां पूर्वकायुर्भावे लेवगच्छति यत्र तत्पूर्वकमायुः क्षीणं तत्र तस्यो
दयः इत्यध्यग्राहिस्थानीयस्यानुपूर्वीनामकर्मणस्तदभिमुखमानुपूर्वी आहितदित्यनेनाविवक्षितगतिरसिसंबध्यते यस्मा
न्न उत्पत्स्यते। तस्यामिमुखमनुकूलमानुपूर्व्या प्रतिविशिष्टदेशाक्रमेण तत्प्रापणसमर्थमिति च स्यात्। तदभिमुखमित्यनेना
भिमुख्यमात्रं प्रतिपादितं न्यूनस्य तत्प्रापणसमर्थमित्यनेनानुपूर्वीनामकर्मणः कार्यमादर्शयतीति फलितं। न ऋतिप्रापणेम
मर्थं प्रत्यलमानुपूर्वीनामकर्माऽसरं नरकगत्यानुपूर्वीनामादि चतुर्विधं भवति। नामांतरप्रदर्शनायाह। निर्माणनिर्मितिनाम
त्यादि। निर्माणनामकर्माख्यातं। प्राक् जातिलिंगाकृतिव्यवस्थानियामकं निर्माणनामेति निर्माणकर्मणा निर्मापितानां घटि
ता शरीरावयवानामंगानां बाहूदरादीनां उपांगानां चांगुलिकर्णनासिकादीनां निवेशक्रमनियामकं रचनाविनिवेशस्त
स्य क्रमः परिपाटीत जयपार्श्वतो बाहू कटेरधो जानुनी आपर्वरूपमन्यमात्रापि वा अयः क्रमस्तन्नियामकं नियकारि। अ
नेनांगेन वा नेवस्थाने विनिविष्टव्यमित्येवमानुपूर्वीनामापरे प्रवचनवृद्धाः कथयंतीति। अगुरुलघुप्रकृतिनिर्धारणायाह
अगुरुलघ्वित्यादि। परिणामत्रयस्यात्र निषेधो विवक्षितो गुरुत्वलघुत्वाभ्यस्तायस्य कर्मणः उदयात् सर्वजीवानामिह कुं
थ्वादीनामात्मीयशरीराणि न गुरूणि न लघूनि न गुरुलघूनि स्वतः किंत्वगुरुलघुपरिणाममेवाबध्नंति। तत्कर्मागुरु
लघुशब्देनोच्यते। सर्वद्रव्याण्येव परिणमंते स्थित्यादिमानि केवलं भावेनेति जैनः सिद्धांतः। तत्रागुरुलघुनामायं परिणा
मः तस्य नियामकं तमेव तत्रोक्तेर शक्तिकं निधत्त इति इत्यगुरुलघुनाम सर्वशरीराणि च निश्चयनयदृष्ट्यागुरु
कादिव्यपदेशो जातिव्यवहारनयो सम्मोन्यापेक्षयात्रेति। अमनुरुधंतेवयथोक्तं निश्चयतः सव्वं गुरुसंसव्वलहुं वा विनच्छ

एवं। व्यवहार। उत्तुङ्गः स्थायरअंधेसु नन्नेसु। उपघातनामस्वरूपव्याख्यानायाह। शरीरांगोपांगोपघातकमिति। शरीरांगनामु
पांगानां च यथोक्तानां यस्य कर्मण उदयात्परैरनेकधोपघातः क्रियते तदुपघातनामस्वरूपाख्यानायाह। शरीरांगोपांगोपघात
कमिति शरीरांगनामुपांगनां च यथोक्तानां यस्य कर्मण उदयात्परैरनेकधोपघातः क्रियते तदुपघातनाममतांतरं वा शष्टे
न प्रतिपादयति स्वपराक्रमविजयाद्युपघातजनकं वा किंचिदेवमुपघातजनकं वा किंचिदेवमुपघातनाम व्याचष्टे। स्वप
पराक्रमः शक्तिवीर्यं स्वो निजा पराक्रमः स्वपराक्रमः तस्योपघातं जनयति समर्थवपुषोऽपि निर्बीयतामापादयति स्वविजयं वो
पहंति विजिनेप्यन्यस्मिन्नो न वधिर्जितइति यथादेवदत्तो प्रतियद्धेनइति। आदिग्रहणाद्दन्तदपि यदद्भुतं कर्मतत्तस्माद्येनोप
हन्यत इति। पराघातस्वरूपं निरूपयति। परत्रासेत्यादि। यस्य कर्मण उदयात्कश्चिद्दर्शनमात्रेणैवौजस्वी वाक्सौष्ठवेनान्यान्सभा
मध्यगतः सभ्यानामपि त्रासमापादयति। परप्रतिभाप्रतिघातं वा करोति तत्पराघातनाम। आदिग्रहणात्संक्षोभस्तंभ
परिग्रहः। आतपनाम निरूपणायाह। आतपसामर्थ्यजनकमिति आतपतीत्यातपः कर्तर्यच् आतप्यते वाऽनेनेति आतपः पुंसं
ज्ञायां घः तस्यातपस्य सामर्थ्यं शक्तिः रतिशायो येन कर्मणोदितेन जन्यते तदातपनाम। आङो मर्यादावचनत्वात्सूर्यमंडलपृथि
वीकायपरिणाम एव तद्विपच्यते नान्यत्रेति उद्योतनामस्वरूपप्रतिपादनायाह। प्रकाशसामर्थ्यजनक उद्योतनामेति उद्योतन्नुद्यो
तः प्रकाशोऽनुष्णः खद्योतकादिप्रभावनः समार्चिः सवितृमण्डलसंभवियस्मान्निमेहात् स्पर्शो लोहितं रूपमतः प्रकाशस्य सामर्थ्य
मतिशायं जनयति यत्तदुद्योतनेनाम उच्छ्वासनामस्वरूपप्रतिपादनायाह प्राणापानेत्यादि ऊर्ध्वगामी समीरणः प्राणः अधोगतिरपानः तौ
च द्वौ पुद्गलात्मकाविति तदाह पुद्गलग्रहणसामर्थ्यजनकमिति। प्राणापानावनंतप्रदेशस्कंधपुद्गलपरिणामजन्मानौ तयो
श्च पुद्गलानां ग्रहणमादानं तस्य सामर्थ्यमतिशयं जनयति यत्तदुच्छ्वासनाम। यस्योदयादुच्छ्वासनिश्वासौ भवतः। विहायोगति
स्वरूपप्रतिपादनायाह। लब्धिशिक्षर्द्धीत्यादि विहायस आकाशं तत्र गतिर्विहायोगतिः सा द्विधा शुभाशुभा च। तत्र प्रशस्ता
हंसगजवृषभादीनां अप्रशस्ता तु उष्ट्रखरशृगालादीनां तत्र लब्धिर्देवादीनां देवत्वं स्वसाविना जातिनी शिक्षयात ऋद्धि। शिक्षर्द्धि
स्तपस्विनां प्रवचनमधीयानानां विहायसा वर्तनिप्रभावात् आकाशगमनस्य लब्धिशिक्षर्द्धिहेतोर्जनकं विहायोगतिनामेति प्रत्येक
शरीरनामनिर्धारणार्थमाह। पृथक्शरीरनिर्वर्तकमित्यादि यस्य कर्मण उदयादेकैको जीवः प्रतिपत्त्येकैकं शरीरं निर्वर्तय
ति तत्प्रत्येकनामेकद्वित्रिचतुःपंचेंद्रियविषयं। यथा प्रत्येकवनस्पतिजीवो मूलस्कंधशाखाप्रशाखात्वक्पुष्पफलादिषु
पृथक्शरीरं निवर्तयति। न चाऽऽद्येद्रियादयोऽपीति साधारणशरीरनामाऽऽह बादरनामपर्यायो वक्ष्यति एकोऽस्मात्प्रकृतीक्रमेणाह
अनेकजीवेत्यादि। अनेकशब्दोऽनंतरसंख्याग्रहणं अनंतानां जीवानामेकं शरीरं साधारणं किसलयनिगोदवज्रप्रभृतिषु एको
चैकजीवस्य परिभोगस्तथानेकस्यापि तदभिन्नं सदस्य कर्मण उदयान्निवर्तते तत्साधारणशरीरनाम तथा त्रसभावनिवर्ति २४१
कं त्रसनाम त्रसंतीति त्रसा द्वित्रिचतुःपंचेंद्रियलक्षणाः प्राणिनः यस्मात्तस्य कर्मण उदयात्तेषु परिस्पंदि जसा लभंति। एतादृशोग

मनादिक्रियाविशेषो यस्य कर्मण उदयाद्भवति। तत्त्रसत्वनिर्वर्तकं त्रसनाम। तदुदय एव गत्यादिक्रिया भवतीति नावधार्यते गा
मनं तु तदुदयात् स्वभावाच्च तदुदयाद्वींद्रियादीनां स्वभावात्परमाणुतेजोवाय्वादीनामिति कर्मजिनीयंत्रदेशांतरगमन श्रवण
व्यभिचार इति चेन्न। अभिसंधिमत्तरानुभावात्प्राग्यदादितिस्थावरभावनिवर्तकं। स्थावरनाम स्थानशीलं स्थावरं तद्भावस्थावर
त्वं निर्वर्तयति यत्पृथिव्यंबुवनस्पत्यादिलक्षणं। तत्स्थावरनामकर्म स्थानशीलत्वं तु स्थावरनामकर्मोदयाद्वेष्ट पृथिव्यंबुवन
स्पतीनां परमार्थतस्तत्र स्थावरनामकर्मोदयात्स्थावरत्वं परसंदेशमनु भीवायुदेवं चतेजोवाय्वोरपि स्थावरत्वसिद्धिः कर्मोदया
देवेति। सौभाग्यनिवर्तकं सुभगनाम कमवीयः श्रव्यगोमनसः प्रियः तद्भावः सौभाग्यं। तस्य निवर्तकं सुभगनामादौर्भाग्यनिव
र्तकं दुर्भगनाम सौभाग्यविपरीतलक्षणं दुर्भगो नामानिष्टो मनसो योऽप्रियः तद्भावो दौर्भाग्यं कस्य कर्मण उदयादिति सौस्वर्य
निवर्तकं सुस्वरनाम येन शब्देनोच्चरितेनाकर्णितेन च भूयसी प्रतिरुत्पद्यते। तत्सुस्वरनाम। तद्विपरीतं दुःस्वरनाम यत्तच्छ्रूय
माणमसुखमावहति। तद्दुःस्वरनामिति। शुभभावः शोभामांगल्यनिर्वर्तकं शुभनाम शुभो भावः शुभ इति उत्तमांगादिस्तत्तु नितं
शोभा ह्रजापुरस्कारः शिरसा पादादिस्पर्शनं मंगल्यमिति पवित्रं तन्निर्वर्तकं शुभनामेति। तद्विपरीतनिर्वर्तकमशुभनामाप्र
शस्तावयवानां नाभेरधस्तादशुभनामोदयात्। यथा पादेन स्पृष्टः क्रुध्यतीति सूक्ष्मशरीरनिर्वर्तकं सूक्ष्मनाम। सूक्ष्मत्वं अदर्श
नियतमेव यस्य कर्मण उदयाद्भवति शरीरं पृथिव्यादीनां केषांचिदेव तत्सूक्ष्मशरीरनाम। बादरशरीरनामनिवर्तकं बादर
रनाम। बादरं स्थूलं केषांचिज्जीवानां यस्य कर्मण उदयात्स्थूलशरीरता भवति तद्बादरनामेति। ननु च कर्मयाहितं प्रतीत्यापेक्ष्य
सूक्ष्मबादरेति पर्याप्तस्थिरादेयसर्शसां प्रतिपक्षाणां स्वरूपनिरूपणाय प्रक्रम्यते। पर्याप्तिः पंचविधेत्यादि पर्याप्तिः पुद्गल
रूपात्मनः कर्तुः करणविशेषः येन करणविशेषेणाहारादिग्रहणसामर्थ्यमात्मनो निष्पद्यते। तच्च करणं यैः पुद्गलैर्निर्वर्त्यते
ते पुद्गला आत्मना त्तास्तथाविधपरिणतिभाजः पर्याप्तिशब्देनोच्यते। सामान्येनोद्दिष्टं पर्याप्तिनामधाय विशेषेणनिर्देष्टु
माह। तद्यथेत्यादि आहारग्रहणसमर्थकरणपरिनिष्पत्तिराहारपर्याप्तिः शरीरकर्मणि निष्पत्तिः शरीरपर्याप्तिः इंद्रियकर
णनिष्पत्तिरियपर्याप्तिः। प्राणापानपुद्गलग्रहणसनिश्वासोत्सर्गयोग्यकरणनिष्पत्तिः प्राणापानपर्याप्तिर्भाषायोग्यपुद्गलग्रहणविसर्गस
मर्थकरणपरिनिष्पत्तिर्भाषापर्याप्तिः यथोक्तं आहारसरीरिंदियऊसासवउमणोऽहिनिव्वित्ती। होइजओ दलियाउकरण
पइसाउपजती इति शब्दइयत्ता प्रतिपादनार्थः। ननु च षट्पर्याप्तयः पारमर्षवचनप्रसिद्धाः कथं पंचसंख्या इति उच्यते इंद्रि
यपर्याप्तिग्रहणे गृहीतं मनः पर्याप्तेरपि ग्रहणमवसेयः मनः पंचेवेति निश्चयः ननु च शास्त्रकारेणानिंद्रियमुक्तं मनः कर्मेद्रि
यग्रहणाद्ग्रहीष्यते तदिति। उच्यते। यथा शब्दादिविषयग्राहीति साक्षाच्चक्षुरादीनि न तथा मनः सुखादीनां पुनः साक्षाद्
दृकं मनोऽनसंस्पर्शमिंद्रियमिस्य निंद्रियमुक्तं पिंडि लिंगत्वाच्च न त्वानुभवत्वेनेंद्रियमिति। तथा केचिदाचार्याः षष्ठ्यमनःप
र्याप्तिग्रहणमधीयते इत्युपरिष्टादभिधास्यति। यत्तावधारणं पंचैवेति। तच्चाल्पकरणपेक्षया मनः पुनरंतःकरणमतः ए

थक्यं वेतीति न कश्चिद्दोषः उभयथापि न पर्याप्तिसंभवः ननु पर्याप्तिः परिनिष्पत्तिर्विवक्षितक्रियापरिसमाप्तिरात्मनस्तैजसकार्म
णशरीरभाज एवौदारिकादिशरीरमेलायां प्रथमत एवोत्पन्नावेवाभिधीयंते। जन्मांतरग्रहणकाल इत्यर्थो युगपच्चारब्धाः षडपि क्रमे
ण निष्पद्यंते। न सम्यक् पूर्वोत्तरोत्तरपर्याप्तीनां बहुतरकालत्वात् क्रमश्चायमाहारशरीरेंद्रियप्राणापानभाषामनोलक्षणः। तत्राहा
रपर्याप्तिस्वरूपनिरूपणायाह। शरीरेत्यादि। शरीरस्येंद्रियाणां वाचो मनसः प्राणापानयोश्चागमप्रसिद्धवर्गणाक्रमेण यानि योग्या
नि दलिकद्रव्याणि तेषामाहरणक्रियायां ग्रहणमादानं। तस्याः परिसमाप्तिराहारपर्याप्तिः करणविशेषः अत्र च माग्रहणस्त्रिस्कं टर्मि
द्रव्यग्रहणेन मनसा पुद्गलादानमिति। सामान्येन गृहीतस्य योग्यपुद्गलसंघातस्य शारीरांगोपांगतया संस्थापनक्रिया विरचनक्रि
या तस्याः पर्याप्तिः शरीरपर्याप्तिः। संस्थापनशब्दार्थं प्रकाशनं पर्यायशब्देनाविष्करोति। संस्थापनं रचना घटनमित्यर्थः। शरीरव
र्गणायोग्यपुद्गलानां प्रतिनियतावयवरचनेत्यर्थः। स्पर्शादींद्रियनिर्वर्त्तनक्रियापरिसमाप्तिरिंद्रियपर्याप्तिश्च गतिस्पर्शनेंद्रियं
तदादींद्रियस्पर्शनरसनघ्राणचक्षुःश्रोत्रं मननलक्षणं। तत्स्वरूपनिर्वर्त्तनक्रियापरिसमाप्तिरिंद्रियपर्याप्तिः। प्राणापानक्रि
यायोग्यद्रव्यग्रहणनिसर्गशक्तिनिर्वर्त्तनक्रियापरिसमाप्तिरिंद्रियपर्याप्तिः प्राणापानावुच्छ्वासनिश्वासक्रियालक्षणौ तयोर्व
र्गणाक्रमेण योग्यद्रव्यग्रहणशक्तिः सामर्थ्यं तन्निर्वर्त्तनक्रियापरिसमाप्तिः प्राणापानपर्याप्तिर्भाषायोग्यग्रहणनिसर्गशक्तिनि
र्वर्त्तनक्रियापरिसमाप्तिर्भाषापर्याप्तिः। अत्रापि वर्गणाक्रमेणैव भाषायोग्यद्रव्याणां ग्रहणनिसर्गौ तद्विषया शक्तिः सामर्थ्यं
तन्निर्वर्त्तनक्रियापरिसमाप्तिर्भाषापर्याप्तिरिति मनस्त्वयोग्यद्रव्यग्रहणनिसर्गशक्तिनिर्वर्त्तनक्रियापरिसमाप्तिर्मनःपर्याप्ति
रित्येके मनस्त्वयोग्यानि मनोवर्गणायोग्यानि मनःपरिणामः चत्वलानि यानि द्रव्याणि तेषां ग्रहणनिसर्गसामर्थ्यस्य निर्वर्त्तनक्रि
यासमाप्तिर्मनःपर्याप्तिरिति केचनाचार्या मन्यन्ते मनःपर्याप्तिमुपादर्शिते इंद्रियपर्याप्तिसर्गग्रहणेन गृहीते। इंद्रियपर्याप्ति
व्यतिरेकेण पठंतीत्यर्थः ननु पर्याप्तिं केचिद्दृष्टांतिकेचिन्नेति। आसामित्यादिना षडपि पर्याप्तयः समकमारब्धाः क्रमे
ण परिसमाप्तिमासादयंतीति दर्शयति किं पुनः कारणं वैषम्येण परिनिष्ठासामित्याह। उत्तरोत्तरसूक्ष्मतरत्वादिति आहारपर्याप्तिः
शरीरपर्याप्तिः सूक्ष्मतरबहुतरसूक्ष्मद्रव्यनिचयघटिता तो पीद्रियपर्याप्तिः सूक्ष्मतरा तस्या अपि प्राणापानपर्याप्तिः ततोपि
भाषापर्याप्तिः ततश्च मनःपर्याप्तिः सूक्ष्मेति। नचोत्तरोत्तरसूक्ष्मत्वं दृष्टांतेन नभावयति सूत्रदार्वादिकर्त्तनघटनवदिति। स्थूल
सूत्रकर्तिका सूक्ष्मसूत्रकर्तिका वनकर्त्तनं पुण्यदारवेति। तत्र स्थूलसूत्रकर्त्तिका चिरात्कुक्कुटकं पूरयतीतरा त्वाशु परि
समापयति दारुघटनेप्येवमेव क्रमः स्तंभादीनां स्थूलरूपनिर्वर्त्तनं समचतुरस्रादि स्वल्पेन कालेन क्रियते स एव स्तंभः कृमि
पत्रच्छेद्यपत्रिका संघाटिकपुष्करिण्याभिर्बहुतिथेन तुल्यकालेपि प्रारंभे आदिकाश्यापि चित्रपुस्तलेप्यकादिपरिग्रहः यथासंख्यं
च निदर्शनानीति। अनेन घणमपि पर्याप्तीनां क्रमेण मध्विरिवदृष्टांते स्वरूपमुपक्रमते। अतो दृष्टांतस्वरूपप्रतिपादनायाह
गृहदलिकग्रहणेस्यादि तत्र गृहदलिकग्रहणेनाहारपर्याप्तिं साधयति गृहं कर्त्तुमिति सामान्येन दलिमादत्ते शाकादिकाष्ठं

ततः सामान्योपात्ते दलिके त्रसं नः स्तूणावान विष्यातीति निरूप्यते एवमनेकपुद्गलग्रहणे सत्यत्रापि शरीरवर्गणायोग्याः पुद्गलाः शरी
रनिष्पादनक्षमा इति शरीरपर्याप्तिः निश्चय कुड्यरूपगृहादौ नवनान्यामधिसंस्कृतिद्वारमिदं वा सुखमुखं वा प्रवेशनिर्गमा
र्थमालोच्यतीतद्वेंद्रियपर्याप्तिरथात्मनः उपयोगकृत्वा प्रवेशनिर्गमनद्वारस्थानीयेति। एवं प्राणापानभाषापर्याप्तीरपि लेने
च निदर्शनेन साक्षे दार्ष्टांतिक भेदस्तु दृष्टांतभेदः ततः सद्वारकेपि निष्पत्ते सम्यक् स्नानमत्रशयनायमत्र भुजिनृत्तिरिति स्थानस्य
यनादिक्रिया निवर्त्तनमालोचयंति गोलिन तद्दन्मनःपर्याप्तिरपि हिताहितप्राप्तिपरिहारोपेक्षालक्षणेति। एवमेताः षट् पर्याप्ती
निर्वर्त्तयति तत्कर्मपर्याप्तिनाम अपाक शब्दिमनिर्हृत्तघटवत्। अपर्याप्तिनाम तु अनिष्पन्नध्वंसनिष्पन्नघटवदिति। एतदुक्तं
भवति। यस्योदये पर्याप्तयो नासादयंति परिशरिमपर्याप्त एव म्रियते कदाचिदवि नापि भवति यथा संमूर्छिनज मनुष्या इति
ति। स्थिरत्वनिर्वर्त्तकं स्थिरनाम यस्योदयाच्छरीरावयवानां स्थिरता भवति। शिरोस्थिदंतादीनां तत् स्थिरनाम अस्थिरनामाभिश
रीरावयवानामेव यदुदयादस्थिरता चलता मृदुता भवति कर्णत्वगादीनां तदस्थिरनामेति। तदेतद्विपरीतमस्थिरनामेत्यनेन
प्रतिपादितं। आदेयभावनिवर्त्तकमादेयनाम गृहीतवाक्यत्वादादरोपजनहेतुत्वं प्रतिपद्यते उदयाद्बलिका प्रविष्टसत्वेन
युक्तं भवति। यस्यादेयनामकर्मोदयस्तेनोक्तं प्रमीक्रियते। यत्किंचिदपि दर्शनदर्शमानं तरमेव चाभ्युत्थानादि लोकः समाचर
तीत्येवंविधविपाकमादेयनाम विपरीतमनादेयनाम युक्तियुक्तमपि वने भवदयानप्रमाणयंति लोका न चाभ्युत्थानाद्यर्हे।
लाईस्यापि कुर्वंति न दनादेयनाम। अथवा आदेयता श्रद्धेयता दर्शनादेव यस्य भवतीस च शरीरगुणो यस्य विपाकाद्भवति तदा
देयनाम तद्विपरीतमनादेयनामेति यशोनिवर्त्तकं यशोनाम यशः प्रख्यातिः कीर्त्तिर्लोके गुणोत्कीर्त्तना प्रसंसा यदुदयात्तद्य
शोनाम तद्विपरीतमयशोनामेति विषया प्रख्यातिर्यशोनामेति तीर्थकरनामेति यस्य कर्मणउदयात्तीर्थं दर्शनज्ञानावरणल
क्षणं प्रवर्त्तयति। यति गृहस्थधर्मं च कथयति आक्षेपसंक्षेपसंवेगनिर्वेदद्वारेण भव्यजनसिद्धये सुरासुरमनुजपतिपूजि
तश्च भवति। तीर्थकरनामेति। नामकर्मसैरानाख्यायनामशब्दनिर्वचनमाचष्टे शब्दार्थप्रतीतायतां तांस्तान् भावान्नामयतीति
ति नाम तांस्तान्नातिजात्यादीन्नामयति अभिमुखी करोति संसारिणं प्रापयतीति नामोच्यते एवमित्यादिनोपसंहरति। नामकर्म
प्रकृति वक्तव्यश्लोकेन प्रकारेण सोत्तरभेद इति। गतिश्चतुर्जातिः पंचप्रकारेत्यादिरुत्तरप्रकृतिभेदः सह तेन नामकर्मभेदो
नेकविधो वसेयः इति। संप्रति प्रकृतिबंधं गोत्रस्याभ्यनुपक्रमते। उच्चैर्नीचैश्च यदुदयाद्भावोगत्रस्तुच्चैर्नीचैश्चजातीरू
पचारूतोत्रं द्विविधं मुच्चैर्नीचैश्चेति उच्चैर्गोत्रं नीचैर्गोत्रं च शाश्वधारणार्थः द्विप्रकारमेवेति तत्रोच्चैर्गोत्रमित्यादिना गोत्र
कर्मणः कार्यमादयति। कार्यलिंगं हि कारणं। तयोर्द्वयोः प्रकृत्योर्यदुच्चैर्गोत्रं तस्येदं कार्यमिति दर्शयति। आर्यदेशमगधांगवंग
कलिंगादिके संभवः जातिः पितुरन्वयो हरिवंशाद्यक्ष प्रभृतिः कुलं मातुरन्वयः सोप्येवं प्रकार एवोग्रभोजादिलक्षणः स्थानानि

१३

तथा सकृद्भुज्यते यः स उपभोगः भक्तं माल्यचंदनागुरुप्रभृति तद्भ्रमं नवदपि यस्य कर्मोदयाद्यो न भुंक्ते तस्य भोगांतरायकर्मोदयः ॥ पो.८९

तत्त्वार्थ टी. निर्ग्रंथः मयी वचस्यास च तु विवेकितं यात्ः पूजास्य दर्शनेन तांबूलप्रदानादिः सत्कारो मुख्यानां संज्ञालिपृष्ठादियं सक्रियते तस्यापाद
२४२ वैगोत्रस्य ऐश्वर्य मिमाष्वर्यप्रदातिःश्रेतेषामुत्कृष्टापकर्षमात्कादनेक विधमेषां ज्ञानादिसंभवानां निर्वर्तक मुच्चैर्गोत्रं वि
परीतं नीचैर्गोत्रमिति। चंडालाः प्रसिद्धाः एवमातंगाः। चंडालग्रहणं च प्रदर्शनं बरूडकमुरूडकादीनां मौष्टिकाः शौरिका
दयः। व्याधा मृगयवो लुब्धकाः मत्स्यबंधाः प्राणतिपातहेतुमिरम्मायादिभिर्जीवंति। येदीसभावो दास्यं तन्निर्वर्तकं नीचैर्गोत्र
मिति। आदिशब्दाद्वरूडदासदासकादिपरिग्रह इति। अथ षष्ठस्य बंधस्वरूपनिरूपणायाह। दानादीनामिति। एतावत्स्
त्रं तत्र दानादीनामिति। षष्ठी प्रतिविशिष्टसंबंधापेक्षा प्रस्ताव्यांतरायो मूलप्रकृतिबंधिना निःसंबंधमाह अंतरायः पंच
विधि इति यद्यथोक्तानेन पंचविधतां दर्शयति। दानांतरायं द्रव्ये प्रति प्रतिग्राह्ये केवल सन्निहितेष्वस्मे दत्तं महाफलमिति जाना
नोपि दातव्यं न ददाति एवं लाभभोगवीर्यांतरायेष्वपि योज्यं तथा कश्चिद्दानः सर्वदानादिकरः समस्तार्थिप्सोयथाप्रा
र्थनस्य ज्ञात्वा निर्विशेषपूजितवेतायस्मै यावन्नेपि नो विसृजति प्रदेयमल्पमपि तस्य लाभांतरायकर्मोदयः। स्त्री वस्त्रशय्या
सनभाजनादिरूपो भोगः पुनः पुनरुपभुज्यते इति यो नापुनं चोपभाक्ष्यार्थः समर्थं वंनापि यस्य कर्मणउदयान्न परिभुंक्ते
तत्कर्मोपभोगांतरायं वीर्यमुत्साहः चेष्टा शक्तिरिति पर्यायाः तत्र कस्यचित्कल्पस्योपचितवपुषोपि यूनोप्यल्पप्राणता
यस्य कर्मण उदयात्स वीर्यांतराय इति। उक्तलक्षण सर्वीर्यांतरायस्य साधास्तेनोदयः। पृथिव्यप्तेजोवायुवनस्पतिषु क्र
योपशमजनितता रतम्यात्दीन्द्रियादेषु वृद्धिवीर्यस्यावरमसमयच्छद्मस्थ इति प्रकर्षापकर्षविशेषोपलक्षः उत्पन्नकेव
लेतुभवति सर्ववीर्यांतरायक्षयें तत्र तु निरतिशयं वीर्यमिति। अत्र बाह्यानामपि कर्मणामुत्तरप्रकृतीनां विंशत्युत्तरं प्रकृति
शतं नवति। बंधं प्रतीत्यैतावत्सः प्रकृतयो बध्यंते। सम्यक्त्वं सम्यक्मिथ्यात्वयोर्बंधो नास्ति मिथ्यादर्शनपुद्गलानामिवतथा
परिणतः। नाम्नां सप्तषष्टिर्विंशत्युत्तरं प्रकृतिशतं तत्राक्षमाज्ञानावरणं पंचनेदमंतरायं च। दर्शनावरणं नवधा वेदं द्विधा गोत्र
च मोहनीयं षड्विंशति नेदा आयुश्चतुर्धा। नामकर्म गतिश्चतुर्विधा आनुपूर्वी च जातिनामपंचविधं शरीरनाम च बंधनसंघा
तनाम्नोः शरीरनाम्नोन्तर्गतत्वात् प्रकृतिगणना संस्थाननाम षोढा संहननं अंगोपांगं त्रिधा विहायोगतिर्द्विविधा वर्णगंधरसस्प
र्शाः अगुरुलघुउपघातपराघातउच्छ्वासआतपउद्योत त्रसस्थावर बादरसूक्ष्मं पर्याप्त अपर्याप्त प्रत्येकशरीर साधारणश
रीर स्थिर अस्थिर शुभ अशुभ सुभग दुर्भग सुस्वर दुःस्वर आदेय अनादेय यशोनाम अयशोनाम निर्माणनाम तीर्थकरनाम
मेकमेवानि नवंति। ॥ इत्थं प्रकृतिबंधनिरूपणमभिधाय स्थितिबंधप्रतिपित्सयोपक्रममाणत्र आह उक्तः प्रकृतिबं
धः स्थितिबंधं वक्ष्याम इति प्रकृतिबंधो यथावद्व्याख्यातः प्रकृतिस्थितिस्थितिबंधमभिधास्याम इति। प्रतिज्ञानीते भाष्यकारः २४३
तदभिधित्सयाचेदमाह। आदितस्तिसृणामित्यादि सूत्रं आदावादिना अपसंख्यानिकस्तसिः आद्यादिभ्यस्तसिर्वाच्यः इति सवचनमस्य

मूलप्रकृतिमुद्दिश्य सार्थं तत्राद्याः प्रकृतयस्तिस्रः भेद्यानरायवचनमंतरस्थितिविलंबनार्थं समानस्थितिकत्वमित्यर्थः वत्त्वरयांतराय
स्य समनुवृत्तयः मनारकादीनां कोट्यः परिति प्रकृष्टा मध्यमजघन्यस्थितिनिरासः। स्थितवचनं प्रतिज्ञातोपसंहारार्थं आदितस्तिसृ
णामित्यादि शास्त्रेणस्तु सम्यक् प्रतिपादयति ज्ञानदर्शनावरणवेद्यानामंतरायकर्मणश्चेयस्थितिरबध्यानं बंधकालादारभ्य नियाव
द्धो धनिर्जीर्णमिति व स्थितिकालः एवमेतासां चतसृणां मूलप्रकृतीनामुत्कृष्टस्थितिर्बंधउत्कः वर्षसहस्रत्रितयं वा बाधाकाल
बाधाकालस्तु यत्र न तिज्ञानावरणादिकर्मोदयावलिकाप्रविष्टं यावद्धि निःशेषमनुपक्षीणं तावद्भवति। तयोदयावलिकां प्र
विशति बंधकालादारभ्य त्रिषु वर्षसहस्रेषु तीतेषु सत्वे बाधाकालो यत्र तत्कर्म नानुदयते। तावंतं कालमिति। ॥ अथ
मोहनीयकर्मप्रकृतेः किया न स्थितिर्बंध इति तदभिधानायाह। सप्ततिर्मोहनीयस्येति। सागरोपमकोटिकोट्यः इत्यनुवर्तने
ना सप्ततिसंख्याः कोटि संबध्यंते। मोहनीयस्येत्यादिना एतावदस्य प्रस्तरं विवरणेनाभिप्रतिपादितार्थं चेतनाध्यमिति। अस्यास्तवा
धाकालः सप्तवर्षसहस्राणि ततः परं बंधाकालो यावद्द्वेशं षष्ठीणमिति। नामगोत्रमूलप्रकृतेः स्थितिप्रतिपादनायाह नाम
गोत्रयोर्विंशतिः सागरोपमकोटिकोट्यः परा स्थितिरिति। नामगोत्रयोरित्यादिना भाष्येणास्य पदीकृत एवार्थः। अस्याप्यबाधाका
लो वर्षसहस्रद्वयमिति। ॥ आयुष्कोत्कृष्टस्थितिप्रतिपादनायाह। त्रयस्त्रिंशत्सागरोपमानि पूर्वकोटित्रिभागाभ्यधिकानि त्रयस्त्रिं
शच्च वचनात्कोटिकोट्य इति निरस्तं। पूर्वकोटित्रिभागश्चाबाधाकाल आयुष्कप्रकृतेरित्यादिना भाष्ये सुज्ञानमेवार्थ। मूलप्रकृतीनामु
त्कृष्टा साम्येन स्थितिर्बंधउत्कृष्टः संप्रत्युत्तरप्रकृतीनां प्रत्येकमुत्कृष्टा जघन्या च्यते तत्र क्रमान्वयणेन तत्रासद्वेद्यप्रकृतेस्त्रिं
शत्सागरोपमकोटीकोट्यः स्थितिः परा जघन्या सागरोपमस्य सप्तभागाः त्रयः पल्योपमस्यासंख्येयभागेनान्यूनाः सद्वेद्यस्य पंचद
शसागरोपमकोटीकोट्य उत्कृष्टा स्थितिः पंचदशवर्षशतानि बाधः जघन्या द्वादशमुहूर्ता अबाधांतर्मुहूर्तं अत्रैतत्सूत्रमाह
अपरा द्वादशमुहूर्ता वेदनीयस्य वेदनीयप्रकृतेरित्यादिना अपरे स्वकृष्टापेक्ष्या जघन्योच्यते। अपरा जघन्येत्यर्थः कथम
बध्यमानेति चेत्। साप्यविशेषप्रदानाश्च अधरेति वास्तवपाठः अपरेति स्पष्टमेव सूत्रमधीयते जघन्या द्वादश मुहूर्तेति ॥ संप्रति
नामगोत्रयोरुत्तरप्रकृतीनां स्थितिरुच्यते। तत्र नामप्रकृतीनां तावत्समनुष्यगतिमनुष्यगत्यानुपूर्व्यांत्कृष्टा स्थितिर्बंधः पंचदश
सागरोपमकोटीकोट्यः पंचदशवर्षशतान्यबाधा नरकगतिस्तिर्यगकेंद्रियजातिः औदारिकवैक्रियतैजसकार्मणशरीराणि
हुंडसंस्थानं औदारिकांगोपांगवैक्रियांगोपांगं च वर्णसंहननं वर्णगंधरसस्पर्शनरकानुपूर्वी तिर्यगानुपूर्वी अगुरुलघु
उपघातपराघातउच्छ्वासआतपउद्योताः अप्रशस्तविहायोगतिः त्रसस्थावरबादरपर्याप्तप्रत्येकशरीर अस्थिर अशुभ दुर्भ
ग दुःस्वर अनादेय अयशःकीर्तिनिर्माणनाम्नामुत्कृष्टा स्थितिर्बाधा विंशतिसागरोपमकोटीकोट्यः वर्षसहस्रद्वयबाधा
देवगतिर्देवगत्यानुपूर्वी समचतुरस्रसंस्थानं वज्रऋषभनाराचसंहननं प्रशस्तविहायोगतिः स्थिरशुभसुभगसुस्वरआ
देययशःकीर्तीनां दशसागरोपमकोटीकोट्य उत्कृष्टा स्थितिर्दशवर्षशतान्यबाधा न्यग्रोधसंस्थानवज्रनाराचसंहननयो

१ १९

तत्त्वार्थ·टी·
२४४

र्द्दश सागरोपमकोटीकोट्यः परा स्थितिः द्वादशवर्षशतान्यबाधा स्वातिसंस्थाननाराचसंहननयोश्चतुर्द्दश सागरोपमकोटी
कोट्य उत्कृष्टा स्थितिः चतुर्द्दशवर्षशतान्यबाधा कुब्जसंस्थानार्द्धनाराचसंहननयोरुत्कृष्टा स्थितिः षोडशसागरोपमकोटीकोट्यः
षोडशवर्षशतान्यबाधा वामनसंस्थानकीलिकासंहननद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातीनां सूक्ष्मापर्याप्तसाधारणनाम्ना
मुत्कृष्टा स्थितिरष्टादश सागरोपमकोटीकोट्यः अष्टादशवर्षशतान्यबाधा आहारशरीरतदंगोपांगतीर्थकरनाम्नामुत्कृष्टा
स्थितिः सागरोपमकोटीकोट्यंतः अबाधांतर्मुहूर्त्तं एवमेता नामकर्मणः सप्तषष्टिरुत्तरप्रकृतयः शेषकर्मणां त्रिपंचाशदेवं चविं
शत्युत्तरं प्रकृतिशतं भवति। संप्रति नामप्रकृतीनामेव जघन्या स्थितिरुच्यते। मनुष्यतिर्यग्गती पंचेंद्रियजातिरौदारिकतैजसका
र्मणशरीरे संस्थानषट्कं औदारिकांगोपांगं संहननषट्कं। वर्णगंधरसस्पर्शाः तिर्यग्मनुष्यानुपूर्व्ये अगुरुलघूपघातपराघातो
च्छ्वासातपोद्योताः प्रशस्ताप्रशस्ते विहायोगती त्रसस्थावरशुभाशुभसुभगदुर्भगसुस्वरदुःस्वरसूक्ष्मबादरपर्याप्तापर्याप्तप्रत्येकसा
धारणशरीरस्थिरास्थिरादेयानादेयनिर्माणयशसं। सागरोपमस्य द्वौ सप्तभागौ जघन्या स्थितिः पल्योपमासंख्येयभागेन न्यूना। अ
बाधांतर्मुहूर्त्तकालः। देवनरकगती आद्यं जातिचतुष्कं वैक्रियशरीरमेतदंगोपांगं नरकदेवानुपूर्व्यौ एंजघन्या स्थितिः।
सागरोपमसहस्रस्य द्वौ सप्तभागौ पल्योपमासंख्येयभागेन न्यूनौ अबाधाकालोंतर्मुहूर्त्तः आहारशरीरतदंगोपांगतीर्थकर
नाम्नां जघन्या स्थितिः। सागरोपमकोट्यंतः अबाधांतर्मुहूर्त्तकालः यशःकीर्त्तिर्जघन्या स्थितिरष्टौ मुहूर्त्ताः। अबाधांतर्मुहू
र्त्तकाल इति अत्रत्योपरिबंधः कृतो वाचकेनेति। इतरा तु मध्यमा वक्तव्या। ताश्च पिंडनामगोत्रप्रकृत्योरित्यादिग्रंथ
गतार्थमेवेति। एवमेतासां नामप्रकृतीनां सप्तषष्टेरुत्कृष्टजघन्यस्थितिरुक्तेतिः। सांप्रतं गोत्रकर्मण उत्तरप्रकृत्योर्जघ
न्या स्थितिरिति धीयते। नीचैर्गोत्रस्य जघन्या सागरोपमस्य द्वौ सप्तभागौ पल्योपमसंख्येयभागेन न्यूनौ अबाधांतर्मुहूर्त्तकालः उच्चै
र्गोत्रस्थितिर्जघन्येनाष्टौ मुहूर्त्ताः कालः इत्यादिसूत्रानुप्रवेशः। पंचानां ज्ञानावरणप्रकृतीनां चक्षुरादिदर्शनावरणप्रकृतिचतुष्टयस्य पं
चानां चांतरायप्रकृतीनां जघन्या स्थितिरंतर्मुहूर्त्तकालः। अबाधापि अंतर्मुहूर्त्तकालः। अबाधापि अंतर्मुहूर्त्त एव दर्शनावरणे निद्रा
पंचकस्य जघन्या स्थितिः पल्योपमासंख्येयभागन्यूना। अनंतानुबंध्यप्रत्याख्यानावरणकषायाणां द्वादशानां जघन्या स्थितिः पल्यो
पमासंख्येयभागन्यूना। संज्वलनक्रोधस्य जघन्या स्थितिर्मासद्वयमंतर्मुहूर्त्तमबाधा। संज्वलनमानस्य जघन्या स्थितिर्मासोंतर्मुहू
र्त्तमबाधा। संज्वलनमायाप्रकृतेर्जघन्यार्द्धमासमबाधांतर्मुहूर्त्तकालः। संज्वलनलोभस्यांतर्मुहूर्त्तकाला स्थितिर्जघन्या अबाधां
तर्मुहूर्त्तमेव। पुंवेदस्य जघन्या स्थितिरष्टौ वर्षाणि अबाधांतर्मुहूर्त्तकालः। हास्यरति अरति भयशोकजुगुप्सा स्त्रीनपुंसकवेदानां
जघन्या स्थितिः सागरोपमभागौ द्वौ पल्योपमासंख्येयभागन्यूनावंतर्मुहूर्त्तमबाधा। देवनारकायुषो जघन्या स्थितिः दशवर्षसहस्रा
ण्यबाधांतर्मुहूर्त्तकालः। तिर्यङ्मनुष्यायुषो जघन्या स्थितिः क्षुल्लकभवग्रहणमबाधांतर्मुहूर्त्तमिति। एवमेतेषां ज्ञानदर्शनावरणमो
हायुषां कर्मणां यत्रांतर्मुहूर्त्तकाला स्थितिः सूत्रे इदं सूत्रमुपतिष्ठते शेषाणामंतर्मुहूर्त्तमिति वेदनीयेत्यादि भाष्यं सुगममिति। ब्रासप्र २४४
सागरोपमस्य त्रयः सप्तभागाः पल्योपमासंख्येयभागेन न्यूनाः मोहनीयप्रकृतिः मिथ्यात्वसप्तभागाः सागरोपमस्य जघन्या स्थितिः। (प्रो॰ उ॰ ली॰)

(७

[illegible]
ष्टानुभावबंधविवक्षयाह उक्तः स्थितिबंधः अनुभावबंधं वक्तुमिति प्रतिज्ञा। तन्निरूपणायाह। विपाकोनुभाव इति। विपचनं विपाकः
उदयावलिकाप्रवेशः कर्मणां विशिष्टो नानाप्रकारो वा पाको विपाकः प्रशस्तपरिणामानां तीव्रः अशुभपरिणामानां मंदः यथोक्तकर्मवि
शेषानुभवनं अनुभावः कृत्यल्युटो बहुलमिति वचनात् अथवात्मनानुभूयते येन करणभूतेन बंधेन सोनुभावबंधः करणाधिकर
णयोश्चेति घञ्। अनुभवस्य समुदायार्थप्रदर्शनं अनुगतो वा भावोनुभाव इति प्रादिसमासः क्रियाजो वा सर्वासां हि प्रकृतीनां फल
विपाकोदयानुभावबंधाध्यवसायानुसमयं कर्मानुभवनं हि ज्ञानावरणस्य फलं ज्ञानाभावः दर्शनावरणस्यापि
फलं दर्शनशक्त्युपरोधः इत्येवं सर्वकर्मणां स्वकार्यं बंधोदयस्थितिरिति सर्वासां प्रकृतीनां इत्यादि भाष्यं सर्वासामिति कार्मणग्रहणं कर्मबंधस्य
फलं विपाकः तस्य उदयो भाव इति पर्यायकथनेन व्याख्या भवति विद्यते अवश्यंभावी विपाकः सर्वस्य कर्मणो विशेषार्थमाह चेष्टविवि
धानात्प्रकाराः पाको विपाक उच्यते। तद्धि विधं निरूपयति तथा वान्यथा चेत्यर्थः। यथा येनाध्यवसायप्रकारेण यादृग्भावं बंधक
मानितं तेनैव प्रकारेण विपच्यते अन्यथा च प्रकारांतरेणापीत्यर्थः अनुभावो विपाको रस इति पर्यायाः स च तीव्रमंदमध्यमाव
स्थाभेदः शुभाशुभात्मकः तत्र कदाचित् शुभमप्यशुभरसतयानुभूयते। अशुभं च शुभरसतयेति वैविध्यार्थः तथा चाह तासा
मिव विपाकनिबंधो यो नाम निर्वचनविनः सरसोनुभावसंज्ञः स तीव्रो मंदो मध्यमो वा। तत्रवाष्टप्रकारे कर्मणि किंचित्कर्म पुद्गले
ष्वेव विपच्यते तत्पुद्गलान्परिणमयति नानाकारेण किंचिद्भवविपाकि प्राप्तजन्मनः आत्मनः आत्मनः शरीरवतो विपच्यते। अपरं तु
क्षेत्रविपाकि क्षेत्रांतरे विपच्यते इत्यर्थः अन्यजीवविपाकीति जीव एव विपच्यते इति। एवं चतुर्द्धा विपच्यते। तथा वा संहननं संस्थानं
वर्णस्पर्शरसगंधनामानि अंगोपांगानि तथा शरीरनामानि सर्वाण्यगुरुलघुपराघातोपघातनामातपोद्योतनामानि प्रत्येकशरीर
स्थिरशुभनामानीतरे। साद्य प्रकृतय एताः पुद्गलविपाका भवपाकमुक्तमायुष्कं क्षेत्रफलमानुपूर्वी जीवविपाकाः प्रकृतयोन्याः कथं
पुनरन्यथा बंधो अन्यथा विपाक रूपोरस इति प्रतिपादनायाह। जीवः जीवकर्मविपाकमनुभवन्नित्यादि। स्थितिफलमध्यवसायपरिणाम्या
त्मा कर्मणो ज्ञानावरणादिकस्य विपाकं भुंजानो रसमनुभवन् वेदयमानः प्रकृतीनां संक्रमं करोति स च संक्रमः कर्मप्रत्ययः कर्महे
तुक एव निर्निमित्तो यं स्यादिना योगेदि ज्ञानावरणोदयः अनाभोगवीर्यपूर्वकर्मसंक्रमो निसंबध्नतो करोतीति क्रियते। अनुजतो ध्य
वस्यत चेष्टात्मनो। यानदा योगवीर्यमनोनुजतोन व्यवस्यतः सामर्थ्यविशिष्टक्रियापरिणामः अनाभोगवीर्यं तत्पूर्वकं तद्द्वारकं
कर्मसंक्रमं विधत्ते स पुनः संक्रमः काम प्रकृतिषु कासां वा प्रकृतीनामित्याह। उत्तरप्रकृतिष्वित्यादि मूलप्रकृत्यपेक्षया उत्तरप्रकृत
निश्चितं अष्टौ मूलप्रकृतयो ज्ञानावरणादिकाः उत्तरप्रकृतयस्तत्पंचनवद्वादिज्ञानावरणमित्यादिकाः तत्रोत्तरप्रकृतीनामेवोत्तरप्रकृति
षु संक्रमः सर्वासु विसर्गः कासांचिन्न भवत्यपीत्यर्थः अपवदिष्यते वोपरिष्टात्। पंचप्रकारं ज्ञानावरणं चक्षुर्दर्शनावरणादि
प्रकृतिषु विशेषणं सर्वासु संक्रामतीति आह मूलप्रकृतिभिन्नास्थिति मूलप्रकृतिष्वा। अभिन्ना स्वप्रकृतौ तु प्रत्युत्तरगुरु
लप्रकृतौ जघन्याः सुयश्च मूलप्रकृतिरेका ज्ञानावरणमिति। उत्तरप्रकृतयः पंच तत्रैताः पंचाप्यन्योन्यमेव संक्रामंति नान्य

स्त्वप्रकृतिउत्तरप्रकृतिषु एनमेवार्थमावसाधरकं दर्शयति। ननु मूलप्रकृतिषु संक्रमो विद्यत इति तु शाष्टावधारणार्थः नैव मूल
प्रकृतिषु संक्रमोस्ति न हि ज्ञानावरणं दर्शनावरणे संक्रामति नापि दर्शनावरणं ज्ञानावरण इत्येवमन्यत्रापि योज्यं। अस्यैवार्थस्योपपा-
तिपादयन्नाह बंधविपाकनिमित्तान्यजातीयानि विजातीयानीत्यर्थः अन्यद्बंधनिमित्तं ज्ञानावरणस्य तत्प्रदोषनिह्नवादि अन्य
द्दर्शनीयादेः पश्चात्कादिज्ञानदर्शनावरणयोर्बंधनिमित्तमन्यदेव विपाकनिमित्तमेवमादायेति न तासु मूलप्रकृतिषु संक्रमो नास्तिर्षं स
वासित्युक्तं यत्तत्प्रत्ययोपत इत उत्तरप्रकृतिषि स्यादि। कासांचिदुत्तरप्रकृतीनामपि कासुचित्प्रकृतिषु संक्रमो नास्ती। तद्दर्शयति
तत्र दर्शनमोहस्यापवादेनैतनानुबंधिनः क्रोधादयो मिथ्यात्वसम्यग्मिथ्यात्वं सम्यक्त्वमिति शेषश्चारित्रमोहोप्रत्याख्यानादिः। तत्र द-
र्शनमोहोनसंक्रामति चारित्रमोहे नापि चारित्रमोहो दर्शनमोह इति। सम्यग्मिथ्यात्वस्य सत्यपि बंधे सम्यक्त्वसंक्रमः। सम्यक्त्वं तु
सम्यक्त्वमिथ्यात्वेन संक्रामति चारित्रमोहेनापि। तथा सम्यक्त्वसम्यग्मिथ्यात्वयोर्मिथ्यात्वं संक्रमयति। आयुष्कस्य च नारकतिर्य
ग्मनुष्यदेवभेदस्य परस्परं नास्ति संक्रम इत्युक्तं चात्र। मूलप्रकृत्यभिन्नाः संक्रम इति। गुणतउत्तराः प्रकृती। न त्वात्मामूर्त्तत्वाद
ध्यवसानप्रयोगेन शिथिलयति दृढं बंधं शिथिलं दृढयति च कर्म ननु जीवः उत्कृष्टाच्च जघन्याः स्थिती विपर्यासयति वापि संक्रमस्त्वि
त्युदीरणा उपसद्दृष्टांतः त्रयोपप्रदर्शनामाह तारीकरणं ताम्रस्य शोधनस्तेमने मृदः क्रमशः आम्रपरिपावनं वा कालेन स्वपदृष्टांताः
यथासंख्यमपि संबंधः कार्यः अनुभावांश्च विपर्यासयति। तथैव प्रयोगतो जीवः तीव्रानुभावं मंदं दत्वा स्वासु प्रकृतिषु निन्नासु यदहा
मंदं सद्धारीक्रियते हरिद्रया चूर्णेन वा तानयादि निश्चकारं मंदीक्रियते तन्मधाती भोनुभावयोगेन भवति हि। मिथ्यात्ववेदनीयस्य
सम्यक्त्वेनातिमंदो मिश्रोमिश्रोनुभावश्च। अत्र प्रतिज्ञातेर्थे युक्तिमाह। जात्यंतरानुबंधविपाकनिमित्तान्यजातीयकत्वादेव संक्र
मो न विद्यते इति। जात्यंतरस्यानुबंधनमनुवर्त्तनं यत्करोति। पाकस्तस्य यन्निमित्तं तदन्यजातीयकं भिन्नं तथा च दर्शनमोहनी
यादीनामाश्रयाभिन्ना एव पठिताः प्रवचन इति। अपवर्त्तनं विस्यादि सर्वासामेव प्रकृतीनां संभवत्यपवर्त्तनं दीर्घायस्याः कर्म
स्थितेर्ह्स्वीकरणमपवर्त्तनं सर्वासामेव प्रकृतीनां तत्संभवत्यध्यवसायविशेषात्तद्वशाद्व्याख्यातमेवेति तत्प्रतिपादनायाह तत्
दायुष्केण व्याख्यानमिति। तदपवर्त्तनं तदपवर्त्तनमायुष्ककर्मणो द्वितीयेध्याये व्याख्यानमिति। २१। विपाकोनुभाव इति स्वरूपम
भ्यात्संप्रति तु यथा विपच्यते कर्म तथा तत्प्रतिपादयन्नाह। स यथानाम सविपाक उक्तः तत्कृते यथानाम भवति। यथाशब्दे
न वीप्सावाविनामयीभावः यद्यस्य नाम संज्ञितरं कर्मणस्तत्तथा नामानुरूपमेव विपच्यते। यस्मात् ज्ञानावरणीयादीनां सा
विकल्पानां प्रत्येकमन्वर्थनिर्देशः ज्ञानमावियतेयेन तत् ज्ञानावरणं यद्विपच्यमानं ज्ञानाभावे विवर्त्तत इति। इत्थं दर्शनावर-
णमपि सामान्योपयोगोपरोध इति यावत्। सुखानुभवसद्वेद्यं दुःखानुभवोसद्वेद्यं तथा दर्शनमोहश्चारित्रमोहश्च दर्शने तत्त्वा
र्थश्रद्धानलक्षणं चारित्रे सत्तेनोत्तरगुणे नेदं तन्मोहयतीति आयुर्जीवनं प्राणधारणं यदुदयाद्भवति। तदायुस्तत्तान्यागत्यादीन
नामयत्यात्मानं नमयति। प्रापयतीति नाम यदुदयाज्जातिनामयुनुभवतीत्यर्थः तथा गतिनेद्रमपि गतिं नामयतीति गतिनाम २४९
एवं जातिनामापीति गोत्रमिति केगोशब्देगोत्रसंज्ञाशब्दनं गीयते यस्योदयात् उच्चैरवंशजस्तथा नीचगइक्ष्वाकुरिति तद्वै गोत्रं

यथायदुदयाद्धरिद्रा अप्रज्ञातो न्यगर्हितः चंडालादिरत्नलीशैगोत्रं दानादीनां विघ्नमुदयाद्यस्य सोन्तरायः इति। एवमेवार्थं नाधिलेष्टति
पादयति सोनुभावो गतिनामादीनां अनंतरप्रस्तुतस्य विपाकस तत्वर्हेन परामर्शः अनुभावकर्मणां सामर्थ्यं गतिनामादीनां मि
तियच्च इत्येतं तद्देशकमाधारतया प्रदर्शनार्थं ज्ञानावरणप्रदयो भवति गतिजातिशरीरादिवृत्तेर्जीवस्य अन्यथात्वसंभवत
वेति। समग्रमर्थं वक्ष्यतीति नामादीनां वा सर्वकर्मणां सविपाकानुभवः यथानाम विपच्यते विपाकमुदयमासादयतीति यावत्।
यदि विपाकोनुभावः प्रतिज्ञायते ततस्तत्कर्मानुभूतं सत्किमावरणवद्भवति उतोते निःसारं सत्तत्प्रच्यवते उच्यते पीडानुग्रहा
वात्मनः प्रदायाभ्यवहृतो राजादिविकारवन्निवर्त्तते। अवस्थाहेत्वभावात्। अस्यार्थस्य प्रतिपादनाय सूत्रं। ततश्च निर्जरा। त
स्येति विरामार्थत्वात्संचमी ततो विपाकात्कर्मणो विरमणं परिसटनं भवति निर्जरा शब्दार्थमाचष्टे निर्जरा क्षयो वेदनेति निर्जर
णं निर्जरा शातिरित्यर्थः क्षयो विनाशः कर्मपरिणतेर्विगमः। वेदनारसानुचर्वणं कर्मपरिणामफलोपभोगपरिसमाप्तेः इति धार
णा शाटपकाम्यपावप्रत्यकस्यादयो निर्जराशब्दार्थाः परिज्ञेयाः सा च निर्जरा द्विविधा विपाकजा वा विपाकजा वा विपाकउदय
उदीरणा च विपाकः तत्राद्या संसारोदधौ परिप्लवमानस्यात्मनः शुभाशुभस्य कर्मणो विपाककालप्राप्तस्य यथा यथा तदुदयावलिका
स्रोतसि पतितस्य फलोपभोगाद्युपजातस्थितिक्षये या निवृत्तिः सा विपाकजा निर्जरा यत्पुनः कर्माप्राप्तविपाककालमौपक्रमिक
क्रियाविशेषसामर्थ्यादनुदीर्णं बलाद्दीर्घोदयावलिकामनुप्रवेश्यते। पनसतिन्दुकाम्रफलपाकवत्सा त्वविपाकजा निर्जरा श्राद्
च। तारीकरणं ताम्रस्य शोधनस्तेमने मृदः क्रमशः आम्रपरिपावनं वा कालेनेति स्वपदृष्टांताः। यथासंख्यमेते संक्रमस्त्विसुदीरणा
श्लोकाः। अत्र सूत्रे च शब्दः हेत्वंतरमपेक्षते विपाकहेतुका निर्जरैकको हेतुः अस्मादन्योहेतुर्हेत्वंतरं तत्प्रदर्शनायाह। त
पसानिर्जरा वेति वक्ष्यते नवमेध्याये निर्जरास्ते संवराधिकारे। तपसा द्वादशप्रकारेण संवरश्च भवति निर्जरा वेति। तपोपि नि
र्जराहेतुरतोनिमित्तांतरसमुच्चयार्थः। चशब्द इह वा ग्रहे कर्मनिरामणार्थं निर्जरायहणं नवमे संवरार्थमिति। २३। उक्तोनु
भावो बंधः प्रदेशबंधवक्ष्याम इति। उत्तरसूत्रसंबंधयंथः। बंधचतुष्टयी प्रकृतान्तत्तृतीयोनुभावबंधतः प्रपंचेन संप्रति
प्रदेशबंधं वक्ष्याम इति प्रतिजानीतानंत्यतिपादनायाह। नामप्रत्ययाः इति सूत्रं। अत्राष्टौ प्रश्नाः कस्य प्रत्ययाः कारणभूताः किंप्र
त्यया। वा पुद्गला बध्यंते। एकप्रकारं जीवोपि तान् बध्नाति पुद्गलान् किमनेकदिक्प्रदेशेन बध्नाति उत सर्वदिक्प्रदेशैरिति अ
हणमात्रविवक्षितं रसो पि बंधः किं सर्वजीवानां तुल्यः अथोस्वित्कुतश्चिन्निमित्तादतुल्यः। ३। किंगुणः केवलापुद्गलाबंधास्पदं
भवंति ४ यत्र वाकाशदेशेव्यवस्थितापुद्गलास्तानेवावगाढायेजीवप्रदेशाः किं ते प्राप्तवमेव पुद्गलानां तत्र बंधः आहोस्विद्
वप्रदेशावगाढगगनदेशातिरिक्तप्रदेशवर्त्तिनोपि बध्यंते ५ किंवा स्थितिपरिणतान् बध्नाति अथवा गतिपरिणतानिति वा
किमात्मनो सर्वप्रदेशो पृथ्वेकदेशो वध्यंते ७ स्कंधा वा किं संख्येयासंख्येयानंतानंतप्रदेशा बध्यंते उतानंतप्रदेशा इति ८
एषाम प्टानां प्रश्नानां क्रमेणैवाष्टाभिः सूत्रावयवैर्निराकारीकरणं नामप्रत्ययाः सर्वतः योगविशेषात् सूक्ष्मा एकक्षेत्रा

वगाढाः स्थिताः सर्वात्मप्रदेशेष्वनंतानंतप्रदेशा इति। नामप्रत्यया इत्यादिना यं संज्ञानामा(र्थ)सर्वकर्मणामुक्तं ज्ञानावरणा
द्यंतरायपर्यवसानं तस्य प्रत्ययाकार (?)णीति। षष्ठीसमासो तद्दिनामंत रेणतदाष्ठोदयादिसंज्ञबोमुक्तस्येवात्मनः संसारिणः प्र
थमप्रश्ने एव द्वितीयविकल्पः किंप्रत्यया चेति द्वितीयभेदाप्रश्नेय(?)णा(ष्ठ)। नामप्रत्यय एषां त इति मे नामप्रत्यया इति। बहुव्रीहिः अन्य
पदार्थस्य गतिज्ञातादि भेदं नाम अदारिक शरीरादयो योगः कर्मणो निमित्तं प्रतिपद्यते पारंपर्येण तादृयोपीति। अतो नामक
र्मकारणत्वाद्बध्यंतेन इति। प्रत्ययशब्दस्य पर्यायशब्दव्याख्यानायाह। नामनिमित्ता इत्यादिना मनिमित्तं हेतुः कारणमेषां त इमे नाम
निमित्ता हेतवः इति। शब्द प्रकार वाची अपरे नाम प्रत्यया बंधननाममाचक्षते। नामकर्मणउत्तरप्रकृति शरीरानामा तर्गताबंध
ननामांते स्वप्रत्यया कि त्पुद्गला इति। तत्र गृहीतग्रहस्य माणपुद्गलानाम शरीरपुद्गले वा संबंधो यस्य कर्मण उदयाद्भवति कालदय
भेदेकं स्वकरणे तु वदिति। अथवा यमर्थः प्रत्यायनीति प्रत्ययः नामप्रत्ययाद्धमेषामिति नामप्रत्यया नाम्नेव प्रत्याय्यंते। नादृशा
पुद्गलाः प्रदेशबंधस्य कारणीभवंति। ज्ञानावरणं दर्शनावरणमित्यादि। नामतेन नाम्ना स्वरूपमाख्यायते इति याः ज्ञानावरणसमर्थाः
पुद्गला यते बध्यंते दर्शनावरणसमर्था श्चन्येवमन्यत्रापि योज्यं। न तु चैकाकारा एव पुद्गला समादीयंते न तु ज्ञानावरणादि वि
शिष्टाः केचिद्वर्गेणा तीतुच्यते। सत्यमेव द्वयं त्विदमपि द्रष्टव्यं। ज्ञानावरणादिकानां सर्वासां मूलप्रकृतीनां कर्मत्रेदानां सामान्ये
योग्यानां कर्मवर्गणानां ग्रहणमाख्यायते। ततः सामान्यगृहीतानां मध्यवसायविशेषात्पृथक्पृथग्ज्ञानावरणादिभेदत्वेनपरिण
मयत्यात्मेति सर्वत इति सर्वासु दिक्षुसात्मावगाढकाशव्यवस्थितान्पुद्गलाना दत्ते। समंतान्नासिः एतस्य तिपादनायाह। तिर्यगू
र्ध्वमधश्च बध्यंते इति तिर्यग् दिशाकाष्ठः ऊर्ध्वमधश्चेकेति। अतः सर्वासु दिक्षु स्थितान्स्कंधान् जातिनैकदिग्व्यवस्थितान् सर्वजीवप्रदेशैः
सर्वजीवप्रदेशास्थानिति यावत्। अपरे व्याचक्षते। सर्वत इति सर्वैरात्मप्रदेशैः कर्मपुद्गला गृह्णातिं इतीवांतासिएते चात्म
प्रदेशाः शरीरिणे जीवस्य केचिद्दीकविद्या धस्ता इति। न चास्ति पुनरुक्तता दोषः। सर्वात्मप्रदेशेष्विति शानंतानंतप्रदेशोनि
संबंधादिति नापि। सर्वेषां बंधकानां संबंधस्तत्त्वः कुतः योगविशेषादित्याह। आत्मना युज्यत इति योगकायादि चेष्टा योगानां
विशेषो भेदस्तीव्रमंदादिकः। तस्माद्योगविशेषाद्धत्वं बंधनमेतदेवाह। कायवाङ्मनः कर्मयोगाश्च बध्यंत इति। कायस्य वा
चो मनसश्च क्रिया कर्म अनुष्ठानं गमनचिंतनादिका। नयात्मनो योगः संबंधः क्रियाक्रियावानाः कथंचिद्‍नन्यत्वात्तस्य क्रिया
योगस्य विशेषतीव्रतम इत्येवं बंधोपि प्रकृष्टादि भेदो मंतव्यः। किंगुणकेवेत्यत्राह। सूक्ष्मा बध्यंते न बादरा इति सूक्ष्मशब्दोयापेक्षि
कत्वात् कडेषः परमाणोराराश्च यावदनंतप्रदेशः स्कंधास्ताव दृष्टपतिसूक्ष्मत्वान्नवेध्या भवंति। अनंतानंतप्रदेशवर्गणायाम
पि ये नंतराशिप्रक्षेपात्केचिद्ग्रहणयोग्याः केचिन्नेत्यतः सूक्ष्मग्रहणं एवं क्रमेणौदारिकवैक्रियाहारकतैजसभाषाप्राणापानम
नोवर्गणास्तु केषां कर्मवर्गणायोग्याः सूक्ष्मपरिणतिरूपा इव बध्यंते। न बादरपरिणतिभाज इति एवं क्रमेण सूक्ष्मपरिणतिभाजं के
चिद्ग्रहणयोग्याः केचिद्ग्रहणयोग्याः पुनरपि केचिद्ग्रहणयोग्या इति। पंचमप्रश्नप्रतिवचनार्थमाह एकक्षेत्रावगाढा इत्यादि एक २४६

स्मिन्नभिन्नेक्षेत्रे जीवप्रदेशैः सह एकावगाढा आश्रिता स्ते बध्यंते। यत्राकाशेजीवो वगाढस्तत्रैव ये कर्मयोग्याः पुद्गलास्तेएव बध्यंते न क्षे
त्रांतरावगाढास्तत्र च वर्तमाना सूक्ष्मारागादिस्नेहगुणयोगादात्मनि लगंति न क्षेत्रांतरावगाढास्तत्र च परिणामाभावात्। आश्रितानामि
मिति च एतस्यो त्तरमाह स्थिता इत्यादिना। एवं बध्यंते च शब्दस्यावधारणार्थत्वात् न्यागमार्थकस्य पर्यवसानं दर्शयति। न गतिसमापन्ना इति
समापन्ना गति परिणाम इत्यर्थः। गतिसमापन्नास्तेवा परिणामविशेषात्मात्मनि श्लेषंते न गतित्वादिति। सप्तमप्रश्नप्रतिने
दायाह सर्वात्मप्रदेशेष्वित्यादि। सर्वे च ते आत्मप्रदेशाश्च सर्वात्मप्रदेशाः आत्मप्रदेशाश्चासंख्येया स्तेषु सर्वप्रकृति पुद्गलाः सर्वा
त्मप्रदेशेषु बध्यंते इति। सर्वाश्च ताः प्रकृतयश्च सर्वप्रकृतयो ज्ञानावरणादिकास्तत्स्वरूपाः पुद्गलाः सर्वप्रकृतिपुद्गलाः सर्वात्मप्रदे
शेषु बध्यंते इति। पुनरेकैकस्य कर्मणो ज्ञानावरणादेर्योग्याः पुद्गलाः कियंतः एकैकस्मिन्नात्मप्रदेशे बध्यंत इति। स्पष्टं विवृणोति।
एकैकोहिं त्यादि। असंख्येयप्रदेशात्मनो जीवस्य एकैकः प्रदेशो अनंतैर्ज्ञानावरणकर्मस्कंधैर्बद्धः एवं दर्शनावरणादिकर्मप्रदेशैरि
ति प्रदेशाः स्कंधवचना प्रकृष्टा देशा बहवो यत्र स्कंधे इति निर्वचनात्। अष्टमप्रश्नविभेदायाह। अनंतानंतप्रदेशा इति अ
नंत राशो भूयोनंतपुद्गलप्रक्षेपादनंतानंत इति यप्रदेशाः ते बात्मन एकैकस्मिन्प्रदेशे ज्ञानावरणपुद्गलाः अनंतानंतप्रदेशाः स्कं
धाः कर्मवर्गणायोग्या बध्यंते इति यमुपयंती त्यर्थः आयाग्याः पुनर्बध्यंत इति। तत्प्रतिपादनायाह। न तु संख्येयासंख्येयानंतप्रदे
शा इति नैव संख्येयादिप्रदेशा बध्यंते इति। कुत एतदित्याह। अग्रहणयोग्यत्वात्। प्रदेशानामिति प्रदेशानां स्कंधानामेवं विधाना
मग्रहणयोग्यत्वात् इति संप्रति उपसंहरति। एष प्रदेशबंधो भवतीति। एतत्प्रदेशबंधस्वरूपमित्यर्थः। सर्वं चैतदित्यादि संबंधः
ग्रंथः सर्वमिति। सोत्तरप्रकृतिकमष्टप्रकारं ज्ञानावरणाद्यंतरायपर्यवसानः योऽनेकं कर्म द्विधा भज्यते। पुण्यं पापं च। अनेक कर्मपु
ण्यमन्यत्कर्मपापमिति। तत्र द्विप्रकारे कर्मणि प्रशस्तानुभेयावाभिधीयते। तत्र विरूपणेन यच्चेष्टं तस्यापमित्यर्थोऽनन्यते। तः सूत्रं
शुभा: सद्वेद्यसम्यक्त्वहास्यरतिपुरुषवेदशुभायुर्नामगोत्राणि पुण्यमिति। तत्र सद्वेद्यं सुखरूपेण तु भवनीयं तदुपादानहेतवः प्रागुक्ताः का
रणानुरूपं कार्यं भवतीति स्मरयति। भूतव्रत्यनुकंपादानं सरागसंयमादियोगः क्षांतिः शौचमिति। सद्वेद्यस्य सम्यक्त्वं च दर्शनीयं
तत्त्वार्थश्रद्धानाकारेण तु भवनीयं तदपि केवलिश्रुतसंघधर्मदेवावर्णवादहेतुकं वर्णः कीर्तिर्यशः समुद्भूतगुणोद्भावनं भक्ति
पूजापर्युपासनं आदियहणात् तद्हेतवो यस्य तद्धेतुकं हास्यवेदनीयं हास्याकारेण वा भवनीयं। एवं रतिवेदनीयं चरत्याकारेण पु
रुषवेदनीयं पुरुषाकारेण शुभमायुर्नामगोत्राणीति शुभशब्दः प्रत्येकमभिसंबध्यते। तत्र शुभमायुष्कं मानुषं देवं च नाप्यकारणि
प्राप्तेः कर्मप्रकृतिग्रंथानुसारिणस्तु तिर्यगायुरपि शुभमाचक्षते। यदि चैतत्तथा च शब्देनानुकृष्यतिशुभनामगतिनामादीनामध्या
ह्रियते समस्तशुभकारं सम्यक्त्वमाचष्टे उच्चैर्गोत्रमित्यर्थ एवमेतदुच्चैर्गोत्रं तु सद्वेद्यादिकर्माष्टविधं पुण्यसंज्ञितं। अथ शुभनाम
कं दर्शनीयं नाप्यमिति। कर्मप्रकृतिग्रंथानुसारिणस्तु द्वाचत्वारिंशत्प्रकृतीः पुण्यः कथयंति। सद्वेद्यं तिर्यग्मनुष्यदेवायूंषि म
नुष्यदेवगति पंचेंद्रियजातीः शरीराणि पंच समचतुरस्रसंस्थानं वज्रर्षभनाराचसंहननं अंगोपांगानि त्रयं प्रशस्तवर्णगंध

रसस्पर्शाः मनुष्यदेवानुपूर्व्यौ। अगुरुलघुपराघात। उच्छ्वास। आतप। उद्योत प्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येक। स्थिरशु
भशुभः शुभगा। सुस्वर आदेयशःकीर्तिर्विर्यवसाधेगाः शुभाः निर्माणतीर्थकर उच्चैर्गोत्रैः सहेति आसां च मध्ये सम्यक्त्वहास्यरतिपुरुषवे
दान्संत्येवेति। कोभिप्रायो भाष्यकृतः कोवा कर्मप्रकृतिग्रंथ बहुश्रुतायि नामिति भिन्नसंप्रदायविच्छेदात्मया तावन्न व्यज्ञायाति। चतुर्द
शपूर्वधरादयस्तु संविद्रते यथावदिति निर्दिष्टव्याख्यानं हि शीतिरशुभप्रकृतीनां तद्यथा पंचज्ञानावरणानि असद्वेद्यं मिथ्या
त्वं षोडशकषायाः नवनोकषायाः नारकायुः नरकतिर्यग्गती एकद्वित्रिचतुरिंद्रियजातयः। आद्यवर्जानि संस्थानानि पंचसंह
ननानि पंचैव अप्रशस्तवर्णगंधरसस्पर्शाः नरकतिर्यगानुपूर्व्यौ उपघातनामा अप्रशस्तविहायोगतिः स्थावरसूक्ष्मापर्याप्तक
साधारणास्थिराशुभदुर्भगदुःस्वरानादेयायशोकीर्तय इति। तथा नीचैर्गोत्रं पंचविधमंतरायमिति। सम्यक्त्वादिशुभ यथादर्श
नात्संसेतिमनः सोनं तिर्यग्सुरायूंषि शरीराणि पंच मनुजगतिः देवगतिः पंचेंद्रियता अंगोपांगानि सर्वाणि वज्रऋषभनाराचं सम
चतुरस्रं च तीर्थकरनाम। स्पर्शरसगंधवर्णविहायोगतयः प्रशस्ताः अगुरुलघुपराघातोच्छ्वासोद्योतातपाश्च सनिर्माणं उच्चै
र्गोत्रं नरदेवायोग्यानुपूर्व्यौ च प्रत्येकदेहबादरपर्याप्तादेय सुस्वर त्रसताः स्थिरशुभसुभगयशांसि च शुभसंज्ञाः प्रकृतयः सो
कः सम्यक्त्वहास्यरतिभववेदानां पुण्यतामुपसंत्येके न तथा तु नसादिष्टं मोहत्वादेशघातित्वात् केवलवर्ज्ञानादिघ्नत्वे कषा
यसंज्वलनाः अवधिदर्शनादिनेत्रावरणानि च देशघातीनि दृश्यन्ते नारमोहनांशोयं सर्वघातिकर्मास्तु। घातिप्रतिघातमतौ किंचि
दात्मगुणे पदिष्टं अपरस्त्वाह इति सम्यक्त्वहास्यानां पुंवेदस्य च पुण्यतां मोहनीयमिति वितांना केचिन्नेछंति तत्त्वतः। सर्वमष्टवि
धं कर्म पुण्यं पापं च निर्दिष्टं। किं कर्मव्यतिरिक्तं स्याद्यस्य पुण्यत्वमिष्यतां। शुभायुर्नामगोत्राणि सद्वेद्यं चेति वर्त्मता। सम्यक्त्वादि तथे
व पुण्यप्रसादनमिदात्मनः पुण्यं प्रीतिकरं सा च सम्यक्त्वादिषु पुष्कला मोहत्वं तु भवाबंधकारणं उपदर्शितं मोहो रागः स च स्नेहो मोहे
रागः स चार्हति। रागस्यास्य प्रशस्तत्वान्मोहत्वेपि न मोहनेति। ८। भाष्यानुसारिण्यामष्टमोध्यायः॥ ८॥ ॥ उक्तो बंधः संवरं वक्तुमा
मध्ये नेनाध्यायसंबंधमाह भाष्यकारः। उक्तं च पंचेन प्रतिपादिते। अनादिसंततिरष्टविधनिदान पौरुषेयः कर्मबंधः स च पौरुषे
यत्वादेव कदाचित्केनचिद्रसंततमुच्छिद्यंते पिपुत्र समासमासादितत्तदुच्छेदसाधने नास्तं निक्कं रूयमापद्यत इति। तत्र पूर्वोपि विमकर्म
जालविच्छेदक तपसा निर्जरा वेतिकार्न्नोर्मभिच्छेदं वस्तीति अपूर्वकर्मावयवप्रदेशनिवारणार्थं तु संवरमेव तावद्रचाह। आश्रव
निरोधः संवरः आस्त्रवतेसमादीयते येकर्माष्टविधमाश्रवास्तेकर्मणां प्रवेशवीथयः शुभाशुभलक्षणाः कायादयस्त्रयः इंद्रिय
कषायाव्रतक्रियाश्च पंचचतुःपंचपंचविंशतिसंख्यास्तेषां निरोधो निवारणं स्थगनं संवरः पर्यायकथनेन भाष्य। यथोक्तमा
त्मादिभाष्यं। अष्टाधायिकायादिराश्रवो निरुक्तो नेकप्रकारस्तस्य काययोगादेराश्रवस्य प्राधिकचत्वारिंशद्दृश्यं निरोधो यः स
संवरः आत्मनः कर्मोपादानहेतुभूतपरिणामाभावः संवर इत्यभिप्रायः। अतो यावत् किंचित्कर्मागमनिमित्तं तस्याभावः संवरः स २४८
च सर्वदेशभेदाद्द्विधा। बादरसूक्ष्मयोगनिरोधकाले सर्वसंवरः शेषकाले वरणः प्रतिपत्तारस्य देशसंवरपरिणतिमाणा भवति

अनाशयद्विसकलाश्रवद्वारस्थगनलक्षणः संवरस्ततः सर्वकर्मनिमित्ताश्रवविच्छिन्नसंवृद्धो भ्रष्टकितिपयपुद्गलवशा एव प्रसजस्तौ
र्बस्य परिस्पंदस्य निराविकीर्षितत्वादतः समचतुरस्रसंस्थानवज्रऋषभनाराचसंहननादिभाजो महातपः पराक्रमालंकर्मणिनि
र्जिगीर्षितापरिपूर्णशक्तिकानां परिस्पंदस्वभावयोगत्रयनिग्रहः क्रमते वा पुष्पवितकर्मनिवृत्तिश्चनपुनरेदं पुण्णीतपुरुषार्थाय
थोक्तसंवराभावादिति। उच्यते। संवरादेविध्ये सति सर्वसंवराभावः संप्रातिकानां मितं पुनर्भवदेशसंवरस्तु सामायिकादिचारित्रव
तां सम्यपि परिस्पंदवत्त्वे विदितस्याना संसारजलधेस्तरीभूतमनिवांछतः प्रधानसंवराभावे पिन्यस्त समस्त प्रमादस्थानानां देशसं
वरः समस्त्येवेति। तत्प्रतिपादनायाह। स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैः अथवा आश्रवनिरोधलक्षणः संवर उक्तः
स पुनः केनोपायेन वक्तव्य इत्युपायप्रदर्शनार्थमिदं सूत्रं स गुप्यात्मादिभिरुपत्वेतेन सर्वनामप्रक्रांतसंवरं परामृशति। गुप्यतेनयेति
गुप्तः संरक्ष्यतेनयेति गुप्तिः संरक्ष्यते न येस्मात्संवृतः एवं तोद्रिगुप्त्यादयः करणी भवंति बहुत्वाप्यायप्रदर्शनान्निसंप्रयुक्तिहेतुत्वात्स
मितयोगतिरिति सकलक्रियोपलक्षणं सर्वज्ञप्रणीतज्ञानानुसारिण्यः चेष्टाः संवरमादधति। नरकादिकुगतिप्रपातधारणाद्धर्मः
क्षमादिदशलक्षणकः चानुप्रेक्षणमनुचिंतनमनुप्रेक्ष्यंते भाव्यंत इति वानुप्रेक्षाः। तादृशानुचिंतनेनानादरशी निर्वासनाभिः संवरः सुग
मो भवति। समंतादुपतिता क्षुत्पिपासादयः सत्संतहति परीषहाः शीतिकः ज्ञानः संस्कारः न तावत्प्रभावायत्तकर्मारिविविहितत्वात्नकर्मसा
धनोपघाति प्रसंगात्तु पुंसं ज्ञातायां घटतिचेत्तत्रस्य करणाधिकरणाविधानात्। उच्यते तृष्णारोभजलमिति वचनात्कर्मलेपप्र
प्रत्ययः उपसर्गस्य त्रमनुप्रेक्षक्कलवचनात्यत्रिबाधत्रवदीप्रत्वं शिष्टप्रयोगानुसरणात्। परीषहाणां जयो न करणमभिभवः
परीषहजयः चर्यतेनेन वृत्तिचारित्रं यदोदराद्दिना अष्टविधकर्मचयपरिक्षीकरणाच्चारित्रं सामायिकादिपंचभेदं गुप्त्यादी
नां चारित्रांतानां द्वंद्वः गुप्त्यादिभिः करणभूतैः संवरो दाष्टतइतिप्रतिभाष्यमनुस्रियते। स एष संवरः एभिर्गुप्त्यादिभिरभ्युपा
यैर्भवति प्रकृतसंवरः संबंधनार्थसत्त्वेष्टः। स संवरः आश्रवनिरोधलक्षण एवमुक्तेनेन मनसि व्यवस्थापितः। एभिर्गुप्त्यादि
भिः करणभूतैरभ्युपायैर्भवति आत्मनि स्वरूपं प्रतिलभत इतियावत्। कथं पुनः करणरूपं गुप्त्यादयः प्रपद्यंते तत्र रागद्वेषप
रिणतेरार्त्तरौद्रध्यवसायान्मनोनिवर्त्य निराकृतेहिकामुष्मिकविषयाभिलाषस्य मनोगुप्तत्वादेवनगरादिप्रत्ययं कर्माश्रो
ष्यतिय वचाविकमसंवृतस्यासत्यला पिनोभिष्वचनादिहेतुकं कर्मापिधीयते। न तद्वाग्व्यापारविरतस्य यथा भिहितवाग्गु
प्तेर्वाचापि गुप्तत्वादेव। तथा कायिकमतिभूतस्यधावनवल्गनादप्रत्युपेक्षिताप्रमार्जितावनिप्रदेशचंक्रमणदव्यंतरादानी
क्षेपणादिनिमित्तमात्मनि नाश्लिष्यते कायोत्सर्गभाजः परिसंकुहिंसादिदोषविषयक्रियाक्रमस्य वासमयविहितक्रियानुष्ठा
यिनः कायगुप्तत्वात्। एवं सम्यग्योगत्रयनिग्रहीति लक्षणास्तिस्रो गुप्तयः संवरस्य कारणीभवंति समितयोपि गुप्तिरूपा एव प्राय
वेष्टालक्षणत्वात्। चेष्टा च कायवाङ्मनोव्यापारः। तत्रेर्यादाननिक्षेपोत्सर्गादिलागसमितयस्तिस्रः कायव्यापारांतर्भूताः मनोव्याप

राउया। यिवजीविषणोर्संप्रतिवर्ग्याण्यापारलक्षणा भाषासमितिः यत्तु पार्थक्येनोपादानं तन्मंदधियां विवेकेन सुखप्रतिपत्त्यर्थं॥ प्रथमव्रत
पणाबादाद्रिष्टं चबत। तथा क्रोधमानमायालोभानां क्षमामार्दवार्जवशौचैर्निग्रहीतत्वात् संवरा चाप्तिः सत्यत्यागाकिंचन्यब्रह्मचर्याणि चा
रित्रानुरोधीनि। संयमोपि सप्तदशप्रकारः कश्चित्प्रथमव्रतांतःपाती कश्चिदुत्तरगुणांतर्भूतः। तपो द्वादशविध उत्तरगुणांतःपात्येव। आ
नित्याशरणादि द्विविनं नेमपि संवृणवतो हेतुभूतमुत्तरगुणानुयायि च। परीषहा अपि यथास्वमापतिताः सम्यगधिसहनेन जीयमानाः सं
वरभावि कुर्वति। तथा हिंसानृतवचनपरस्वहरणाब्रह्मचर्यपरिग्रहव्यामिनी भोजनानि संक्लेशविशेषाहितकलुषस्य कर्मास्रवनिमि
त्तानि तिरोधे सति विरमणा नाजोनगत्तु विद्यापतति। तन्निमित्तकं कर्मेति। आधाय कर्मादिपरिभोग निमित्तं च कर्मास्रवणं तत्परि
हाने सति नैवास्ति सर्वं चैतदरिकादिदोषजं बालमिमुक्तसम्यग्दर्शनधीवप्रतिबंधगुप्त्यादि चारित्रांतमनः सति तत्त्वार्थश्रद्धानल
क्षणे सम्यक्त्वे न भवति मिथ्यादर्शनप्रत्ययश्चैर्मास्रवइत्येवमेते गुप्त्यादयः संवरस्य हेतवो उपायाः संपद्यंत इति॥२॥ अथ किमेभिरेव
गुप्त्यादिभिरेव संवरो निपाद्यते। उता परेणापि केनचिदिस्याह। किं वान्यदिति। अनेन कारणंतरमपि संव भाति न गुप्त्यादय एव के
वलाः संवरणसमर्थाः किंचान्यद्पि तपोलक्षणं संहृतेः कारणमस्तीति प्रदर्शनार्थ। तपसा निर्जरा च ३॥ योगकरणमुभयहेतुत्वा
त्तपसो भिनवकर्मप्रवेशाभावः। पूर्वोपचितकर्मपरिक्षयश्च तप्यत इति तपः। सेव्यत इति यावत्। तपति वा कर्माणिमिति तपः। तपसेति
करणे तृतीया निर्जरणं निर्जरा विपाकानां कर्मावयवानां परिशाटनं हानिरित्यर्थः। तपसा सेव्यमानेन प्रमाणोत्मप्रदेशोभ्यो विघटत इ
तियावत् कर्तुः संतापकत्वाद्वा शुष्करसं कर्मा तिरस्कृत्वा निःस्नेहबंधनं परिशाटनीर्थं च शब्दः प्रस्तुतसंवरानुकर्षी तपसा संवरश्च क्रि
यते। अनशनप्रायश्चित्तध्यानादितपो युक्तो वश्यतये वसंवृताश्रवद्वारो भवतीति। तपो द्वादशविधं बद्धातीति इति। आदि भाष्यं
द्वादशविधः प्रकारायस्य तद्द्वादशविधं तप उपरिष्टाद्वक्ष्यामो निधास्यते। बाह्यमनशनादिकं भ्यंतरं च प्रायश्चित्तादि
षा। तेन द्वादशभेदेन तपसा करणतामापन्नेनोक्तलक्षणः संवरो भवत्यागंतुककर्माभावप्रतिपादनं निर्जरा च भवतीति चिरंतनब
द्धकर्माभावप्रतिपत्तिः एवमिदमुभयस्य संवरनिर्जरालक्षणस्य हेतुभूतं तपो भवतीति॥३॥ आह॥ अस्मिन्नारते सर्वेसां प्रतिक्र
क्षयाणाम् अल्पवीर्यत्वात् सकलयोगनिरोधलक्षणसंवरात्ययेगुप्त्यादिसामर्थ्यात्परिस्पंदवतामपि संवरास्तित्वमाश्रयेते यदि त
न सा एव स्वस्वरूपतोभिधेयाइति। क्रमेण गुप्त्यादिस्वरूपनिर्णयः कार्यः तत्र तावद्गुप्तिस्वरूपमभिधीयते। सम्यक्योगनिग्रहे गुप्तित्रि
प्रकारस्तथा क्रियतापि विशेषणं संबंधमाह। अत्रादौ क्रमित्यादि गुप्त्यादिभिः संवरो भवतीत्यत्रावसरे कश्चित्प्रश्नयति। उक्तं भवता।
गुप्त्यादिरुपायैः संवरो भवतीति तत्र ते संवरकारणेषु के गुप्त्यादयः किंस्वरूपा गुप्त्यादय इति। अत्रोच्यते प्रतिपादयितुर्वचनम
त्र प्रश्ने निर्वचनमभिधीयते धीयते सम्यग्योगनिग्रहो गुप्तिरिति। सम्यक्प्रशस्तो गुप्तो योगनिग्रहे गुप्तिरात्मसंरक्षणं। योगा मनोवाक्का २४८
यलक्षणस्तेषां निग्रहो निगृहीति प्रवचनविधिना मार्गव्यवस्थापनमुन्मार्गव्यवस्थापनमुन्मार्गगमननिवारणं वेसतो योगनिग्रह विशेषणार्थं

सम्यगिति। सम्यगागमानुसारेण रक्तद्विष्टपरिणतिसहचरितोर्मनोव्यापारः कायवाग्व्यापारश्च निर्व्यापारता वाक्कायकयोर्निग्रहे गुप्तिर्भवति
गुप्त्वस्तु करसे व सत्यप्रागसो गाढबंधनबद्धस्यानिपीडितहृदयप्रदेशस्य संपुटितनक्रविवरस्य पराधीनात्मनो निग्रहोयोगनिग्रहो नुष्यते
प्रतिभाष्येण सूत्रार्थं स्पष्टयन्नाह। सम्यगित्यादि। सम्यगित्यस्य शब्दार्थमान्वे विधानत इति सभेदं विज्ञाय योगं। तत्र काययोगस्सौदारिकौ
वैक्रियाहारकतैजसकर्मलक्षणः संजवनः वाग्योगस्य सस्वाद्भाषाद्य मनसंसारव्यसंकल्पाद्यः। ज्ञात्वेसागमतो यथावदवबुध्य अन्य
पेत्य सम्यग्दर्शन हर्षक्रमिति प्रतिपद्य च भावात् एवमेते योगाः परिणताः कर्मबंधायैवं च कर्मनिर्जरायै सम्यग्दर्शनश्रद्धेकैमिस्तुपगमक्रि
याविशेषणं प्रशमसंवेगनिर्वेदास्तिक्यानुकंपाभिव्यक्तिलक्षणं सम्यग्दर्शनं तत्त्वश्रद्धस्याभ्युपगमस्येति। त्रिविधयोगस्येति मूलभेदाभ्यां
मुत्तरभेदानां मूलानतिलंघित्वात्परिग्रहः। निग्रहः स्ववशेऽवस्थापनं। स्वातंत्र्यप्रतिषेधेन सम्यक्कामार्यानुरूजः। परिणामो गुप्तिः संरक्षणं भ
यानकात्कर्मबंधशत्रोः त्रैविध्यप्रतिपादनायाह। कायगुप्तिर्वाग्गुप्तिर्मनोगुप्तिरिति कायस्य गुप्तिः संरक्षणं तु उन्मार्गगतेराममनः न
यच संरक्षतः कायो नान्यानेनुपद्यंति। एवं वाङ्मनोगुप्तोरपि व्याख्या इति शाब्दैवधारणार्थस्त्रिविध एवमूलभेदतो योगः। तत्र तेषु योगेषु
निगृहीतव्येषु काययोगनिग्रह एव तावदुच्यते शयनमासनमोक्षो निक्षेपोक्रमः कालः स्थरात्रावेवनदिवास्वपनादेः तत्राधिकृणदायात्र
स्पर्शयाप्रेक्षतिक्रांते गुरूणा दृष्टप्रमाणं युक्तायां वसतौ वेकस्यसाधोर्हस्तत्रयप्रमिते भूप्रदेशेस भाजनस्य च यत्रावस्थानं सक
शावकाशप्रसरणं च सप्रमाणयुक्ता तत्र प्रस्वप्स्यावकाशं प्रत्यवेक्ष्य संद्दष्टवर्तीर्थं च संस्तरणं परद्वयमूर्धनिधमस्तकायं प्रस्कृत्यपादं
पुष्पवस्त्रिकारजोहरणेति सामग्रद्यापितसंस्तारकारथानः। कृतसामायकनमस्कृतिः। वामबाहूपधानः आकुंचितजानुजः कुक्कुटवकुद्दि
यति प्रसारितजंघो वा प्रमार्जितकोलीतलन्यस्तचरणो वा ऊरुयः संकोचसमये प्रमार्जितसंदंसकमुद्वर्तनकाले च मुखवस्त्रिकाप्रस्रुति
निशानिविशेष्या कुंचनप्रसारणादि पूर्ववत्कुर्वीत। भवर्षादिषु चतुःष्टिकापीठकाद्यं मुपैव सामाचार्यामनुपे दृष्टप्रमृज्य वसन्निवेशनं
कुर्यात्। आदाननिक्षेपौ वदं डकोपकारणवेष्टभोजनादिविषयौ तावपि प्रत्यवेक्ष्य प्रमार्जनपूर्वकौ निरवद्यौ भवतः। तथा स्थानमू
र्द्धस्थितिकरणमवष्टंभादि चासुप्रत्यवेक्षितप्रदेशविषयं पिंडीकृतवस्त्राद्यं तर्हिनमवष्टंभादि च निरवद्यं चंक्रमणं गमनं तदपिप्र
योजनवतः पुरस्तात् युगमात्रप्रदेशसन्निवेशितदृष्टेः प्रयत्नस्य स्थावराणि जंगमानि च भूतानि परिवर्जयतो त्वरयापदन्यासमाचर
तः प्रशस्तं। एवमेतेषु गमनादिविषयेषु कायकृतचेष्टया कायव्यापारस्य नियमो व्यवस्था निग्रहः एवं कर्तव्यमेवं न कर्तव्यमिति। उक्तं च। का
यक्रियाकायक्रियानिवृत्तिः कायोत्सर्गः शरीरगुप्तिः स्यात्। दोषेभ्यो वा हिंसादिभ्यो विरतिस्तनोर्गुप्तिः। अत्र च यद्यपि मनोव्यापारसंसृष्टका
यव्यापारः तथापि कायचेष्टया साक्षात्काये नैव निःपादितत्वाद्विहिरूपलक्षणत्वाच्च प्रधान्येन विवक्षा वाग्गुप्तिविषयप्रदर्शनायाह
याचनप्रश्नादि। याचनेत्यादि। याचनं प्रार्थनमन्यतो गृहस्थादेः शय्यासनोपधिशय्यानां तद्गुप्तवसनाच्छादन कालागमस्य प्रवचन विहितस्य
क्षुच्छुद्धानुसारिणो भाषमाणस्य वाग्गुप्तिर्भवति। न याप्रश्न नमाचरतोऽभ्युगमनं वेद्यं संदेहविच्छेदादिविषयमागमविधिनाजोवा
ग्गुप्तिः। तथा धर्ममावसेतितृप्त्यादेकेनचिद्वोकस्य ग्रंथावसिहितेनीसा कुर्यात् सम्यगुपयुक्तोन्यथा सावद्यमनवद्यं वा इत्यादि। समाधाय लोका

गमाविरोधेनाचरितो । एवंविधप्रश्नादिविषयो वाङ्नियमो वाग्गुप्तिर्मौनमभाषणमेव वा वाग्गुप्तिरिति । आह च । अनृतादिनिवृत्तिर्वा
मौनं वा भवति । वाग्गुप्तिः । मनोगुप्तिस्वरूपाख्यानायाह । सावद्येत्यादि । अवद्यं गर्हितं पापं सहावद्येन सावद्यः संकल्पश्चिंतनमालोच
नमार्त्तरौद्रध्यायित्वं बलवत्तितया वा यवदवद्यं वर्द्धयति । तस्य निरोधो अकारणमप्रवृत्तिर्मनोगुप्तिः तथा च कुशलसंकल्पानुष्ठा
नं सरागसंयमादिलक्षणं येन धर्मेनुबध्यते । यावांश्चाध्यवसायः कर्मनिर्जरायामत्तनेनोपि सद्गिः कुशलसंकल्पो मनोगुप्तिः अथवा न कुश
लेसरागसंयमादौ प्रवृत्तिना प्यकुशले संसारहेतौ योगनिरोधावस्थायां प्रभावादेवं मनसो गुप्तिः तत्कालेच ध्यानसंभवात् सकलकर्मक्ष
यार्थ एवात्मनः परिणामो भवतीति । ३ । एवं कायादिनिरोधात निमित्तकार्मणाम्नवणे सति संवरसिद्धिरुक्ता संप्रति चेष्टावतोपि संवरसिद्ध
र्थमिमाः पंचसमितयो निधीयते । आह च । तद्गुणपरिरक्षणार्थं निरोधेर्युम्नी जगाद् ... चेष्टतुकामस्य पुनः समितीः प्राजिज्ञपत् पंच ।
ईर्याभाषैषणादाननिक्षेपोत्सर्गाः समितयः अनंतरसूत्रात् सम्यग्ग्रहणमनुवर्त्तते तत्प्रत्येकमभिसंबध्यनीयं । समितिग्रहणं चाई
र्यायां गतिपरिणामः सम्यगागमानुसारिणी गतिरीर्यासमितिः । समितिरिति तांत्रिकी संज्ञा पंचसु चेष्टासु । अथवा नानुवर्त्तते स
म्यग्ग्रहणं समितिरिति समुपसर्गः प्रसंसार्थः प्रशस्ताः इति वोक्ता सर्ववित्प्रवचनानुसारेण । प्रशस्तार्थाः । एवं भाषणं भाषा तद्विषयाचे
ष्टा समितिः । एषणमेषो गवेषणं तं करोतीति णिच् । तत्र स्त्रीलिंगे भावे । युच् । एषणा यथागमम् आहारादेरन्वेषणमेषणासमितिः । आदानं ग्रहणं
निक्षेपो न्यासः । आदाननिक्षेपौ । समितिशब्दः प्रत्येकं ... समितिशब्दः समानाधिकरणेन स्वगुणमर्थं भाष्येण स्फुटयति । सम्यगीर्या
दिना सम्यगागमपूर्विका ईर्या गमनमात्मपरबाधापरिहारेण यथोक्तं । अरत्नियुगमात्रा ... ईर्याकाले
यदा गमनमिति यत्र वा यं विसमं षाणं विष्णु ले परिवर्ज्य संक्रमेण गच्छता विषमाणे परक्रमे सम्प्रज्ञा ... आगमानुवर्त्तिनी । जा य सच्चा नव
ज्जा सच्चामोसाय जा असुस्सा । जाव बुद्धेहिं नाइण्णा न तं भासेज्ज पण्णवं ... एषणा गवेषणा ग्रहणैषणा ग्रासैषणा ... मविधिना पिंडादीनां सम्य
गादाननिक्षेपौ ... प्रमार्जनपूर्वकौ । सम्यगुत्सर्गः स्थंडिले व्यपगतप्राणिके इति शब्दः स्वरूपप्रतिपादनार्थः एवं स्वरूपाः पंचैव स
मितयः न द्विस्वरूपं प्रपंचयति । तत्रेत्यादि । तत्र तासु समितिषु ईर्यासमितिरिमं रूपा आवश्यकायैवेत्यावश्यकार्थमवश्यकर्त्तव्यं
यदागमबोधितं ... विहारादि गमनं तदेवमस्य स्यादिति संयमार्थमिति संयमः समदशभेदस्तदेवावश्यकमवश्यं कर्त्तव्यं ×तया×
सर्वतइति सर्वत्र युगमात्रमिति ... अयावद् युगमात्रं तावन्निरीक्षणेन स्वर्थः । युक्त आयुक्त स्तस्यैवं चेष्टमानस्य ज्ञानेर्यद्
गतिभेदमकुर्वतो नासंचरण ईर्याचरतः ईर्यासमितिः । आह च । उपयोगो ज्ञानालंबनमार्गविशुद्धिरियर्ते । अरतः । सत्रोदितेन विधि
ना भवतीर्यासमितिरनवद्या । १ संप्रति भाषासमितिनिरूपणायाह हितमित्यादि । आत्मने परस्मै हितमायत्यामुपकारकं सुखवस
मध्यादिता ... प्रयोजनमात्र ... मितमसंदिग्धं स्फुटमर्थवर्णप्रतिपत्तौ ... निरवद्यार्थमातुः ... अव्यातकं भाषणं भीत
कायानेवंविधं वचनियतं सर्वदेव भाषणं भाषा समितिः । आह च । सत्कानृतादिदोषं सत्यमसत्यानृतं च निरवद्यं सूत्रानुवीचिवदतो भाषा २५९
समितिर्भवति साधोः । २ एषणासमितिस्वरूपावधारणायाह । अन्नपानेत्यादि । अन्नमशनं ... पानमारनालतंडुलक्षालनाद्य ।

द्गमादिदोषपरिशुद्धं । तथा रजोहरणं समुखवस्त्रं पात्रं वस्त्रं ... चोलपट्टकादिस्थविरमादि ग्रहणं चतुर्दशविधोपधिः स्थविरकल्पयोग्यो जिनकल
ल्पप्रसङ्गो ... ग्रहणं ... धर्मसाधनानामिति । श्रुतवर्ण धर्मसाधकानामित्यर्थः सा शय्यां संस्तारं ... अंतरेणमहाव्रतसंरक्षणं १०
कर्तुं शक्यमिति वसाहारोपकरणविषयामेषणा प्रतिपाद्य प्रतिषेधमेषणाभिधानायाह । आश्रयः शय्या साधुरमादिदोषरहितेषु परिभाषा
तत्राह । समुत्थितो तत्र षोडशधा कर्मादय उद्गमदोषाः उत्पादनादोषाः षोडशैव धात्र्यादयः । दशैषणादोषाः शंकितादयः एतद्दोषपरि
णामन्नपानादिग्रहणमेषणासमितिः उत्पादनोद्गमैषणधूमांगारप्रमाणकारणतः संयोजनाच्च पिंडं शोधयतामेषणासमितिः । ३ आदान
निक्षेपसमितिस्वरूपविवक्षयाह । रजोहरणेत्यादि । रजोहरणं पात्रचीवरादीनामिति चतुर्दशविधोपधिग्रहणं द्वादशविधिग्रहणं । पं
चविंशतिविधोपधिपरिग्रहः पीठफलकादीनामिति वा शेषौपग्राहिकोपकरणसंग्रहणं भावस्य कार्यमित्यनंतनया वर्षासु पीठफल
कादिग्रहः कदाचिदेव ग्रीष्मयोरपि क्वचिदनूपविषये जलकणिकाकुलायां भूमौ वेवं द्विविधमप्युपधिं स्थिरतरमभिसमीक्ष्य प्र
मृज्य वा रजोहरणादाननिक्षेपौ कर्त्तव्यौ ... आदाननिक्षेपणासमितिः । आह च । न्यासाधिकारणदोषान्परिहरतस्त्यापरस्परं निक्षेप
न्यासः समितिरथादाने च तथैवादानस्य । ४ उत्सर्गसमितिस्वरूपकथनायाह । स्थंडिलमित्यादि । स्थानशयनात स्थंडिलमुज्झितव्य
मुपयोग्य प्रदेशः । कीदृक्पुनस्तदवकाशं ददातीत्याह । स्थावरजंगमजंतुवर्जितं तत्र स्थावराः सचिता भूम्याश्चथ पृथिव्यादयः पंचह्री
न्द्रियादयो जंगमाः तद्वर्जिते निरीक्ष्य प्रमृज्य ... चरजो हत्या वस्त्रपात्रलेपमकृत्वा भक्तपानमूत्रपुरीषादीनामुत्सर्गः समि
तिः इति शब्दः परिसमाप्तिवचनः । आह च । न्यासादानसमित्या व्युत्सर्गेचापि वर्णितास्स्मितिः । सूत्रोक्तेन विधिना स्फुरज्जनतो
र्थप्रतिष्ठापनं । ५ एवं साधोर्नित्यं यतमानस्याप्रमत्तयोगस्य मिथ्यात्वाविरतिप्रत्ययं निरुद्धं भवति कर्मः । ५ । अत्राह । उक्तं समितिषु
प्रवृत्तस्य संवर इति तत्रमधुना को धर्मः । संवरस्य कारणमिति वक्तव्यं सागारिधर्मे वा ... हितं स देहस्य ... सत्यपि विशेषविधानेनपुण्य
कर्मधर्मः किं तर्हि संवरापादनसामर्थ्यनिमित्तं यो धर्मः । स उच्यते उत्तमक्षमामार्दवार्जवशौचसत्यसंयमतपस्त्यागाकिंचन्यब्रह्मचर्याणि ध
र्मः । उत्तमग्रहणमगारिधर्मव्यवच्छेदार्थं उत्तमो धर्मः प्रकर्षयोगात् । क्षमादयो हि उत्तविशेषणविशिष्टास्ताद्दृग्गारिणि न संति यतस्त
स्विस्थ्यमनगाराः कुर्वंते । सकलमदस्थाननिग्रहेण सायरहिताः संतोषामृततृप्ताः सत्यवादिनः संयमिनस्तपस्विनो यथावदात्तार
कनकादिकं किंचनरहिताः सर्वप्रकारं ब्रह्म बिभ्रतीति । नन्वेवं ज्ञातुविशुद्धिर्हि ते क्षमादयः प्रकर्षभाजो भवंति । क्षमादयः उत्त
मार्थबद्धवचनविहिताः सत्पुरुषा एवोत्तमो धर्मः एषव क्षमादिसमुदायः संवरं धारयति करोति । यतस्ततो धर्मः संवरार्थमात्मना धार्य
त इति धर्मः । एतावंति धर्मांगानीति क्षमादिनत्वधर्म इति दर्शयति । इत्येवं दशविधो नगारधर्म उत्तमगुणप्रकर्षयुक्तो भवति । एवं मेषद
शप्रकारो धृतिधर्मः उत्तमा गुणे सत्येनोत्तरा ... प्रकर्षः पराकाष्ठा तद्युक्तो नगाराणां धर्मो भवति । तत्र क्षमेत्यादिना विवृणोत्युत्तमलं
क्षमेति क्षमणं सहनपरिणाम । आत्मनः शक्तिमतो शक्तस्य वा प्रतीकारोनुष्ठानं । तौ पर्यायशब्देरा ... तितिक्षा क्षान्ति सहिष्णुत्वं स

तत्त्वार्थटी०
२५०
ण्वत्रीत्वं क्रोधनिग्रहः। क्रोधस्योदयनिरोध उदितस्य वा विवेकबलेन निःफलतापादनमेवमेतेन अनर्थांतरवाचिनः शब्दाः क्षमेव।
निर्धनिनाप्यकारस्तु स्वयमेवाशंक्याह। तत्कथं क्षमितव्यमिति चेत्। क्षमितव्यमिति भाविकृत्यः क्षमापि भाव एवात। सामान्यस्य चुमाश्रितत्वात्।
इत्ययोगः वाक्यार्थस्तु सा क्षमा। कथं केन प्रकारेण कर्त्तव्या एवमन्यंते दुर्जनः क्रोधविनिगमदकस्यैव करिणः चेतन्नाशकः संकायास्त्वकः एवमा
शंकिते आशंकाच्छेदासचिकीर्षया आह। उच्यत इति क्रोधनिमित्तस्यात्मनि भावाभाव भावचिंतनात्। भावः सद्भावो अस्तित्वं तच्चिंतनात्
दुपयोगाद्वयथापि क्रोधेन घटित इति येन निमित्तेन परयुक्तेनायं मम कोप उत्पद्यते तन्निमित्तं मयि किं सत्यमेवास्ति तत आख्यातिपरय
दिमत्यमस्ति सन्निमित्तं किं कोपेन कृतं भवत्वयमिदं नालीथापि परस्यागात्रः सद्भूतमर्थं प्रकाशयतः स्वकृतं दुश्चरितं तपतीस्येवं चिंतयाण
तदेवाह। भावचिंतनाच्चावद्विद्यंते मय्येते दोषाः किमत्रासौ मिथ्याब्रवीति क्षमितव्यं। तथा भावचिंतनादपि क्षमितव्यमित्यादि ये दोषांपरे
णोपक्षिप्यंते। मयि नैते विद्यंते। अज्ञानादेव परस्त्वज्ञानादेवमभिधत्ते। अज्ञा वैव दोषानुपक्षिपतीत्यर्थः। एवंच निरपराधमात्मनामंवत्त
क्षं तन्मयेव किं चान्यदालंबनं सहिष्णुत्वे इत्याह। क्रोधदोषचिंतनाद्वेत्यादि क्रुधः कषायपरिणतो हिंसादि कर्म बध्नाति। एवं वा निर्हतव्या
पादयति वा। अतः प्राणातिपातनिवृत्तिव्रतलोपस्यात्। युद्धनासादधिक्षिपेद्ततो ज्ञानादिनिर्वाणसाधनपरिहाणिरवश्यंभाविनी। क्रुधो वा
त्रिकस्मृतिकोऽमृषापि भाषेत। विस्मृतप्रव्रज्यासतिमतिः। परेणादत्तमप्याददीत। द्विषात्परपाषंडिनीपुत्रलब्धं तं गमप्यामेवेन। तथा प्रद्वि
ष्टः सहावकुधागृहस्थो अविरतिमूर्छामपि कुर्यात्। आदिग्रहणादुत्तरगुणभंगमप्याचरेत्कारहकसकालानेमासरूपकवर्त्किं वान्यदालं।
बनं क्षांताविस्याह। बालस्वभावचिंतनाद्वा बालशब्दो विधेयवचनन वयोवस्थावाची। नथेवाह। भाष्यकृद्बालो मूढो निर्विवेक इत्यर्थस्तमवे
क्ष्य एवं स्वभावो हृत्वा यत्किंचनभाषितं तत्स्वभावालोचनमन्वेषणमतस्तच्चिंतनाद्वा क्षमितव्यमेव। चशब्दः समुच्चयार्थस्तत्रोत्तरत्रार्थमिति
परोक्षाक्रोशान्नप्रत्यक्षाक्रोशान्मुत्तरं प्रत्यक्षाक्रोशान्नाडनं। नाडनान्मारणं मारणाद्धर्मभ्रंशानं परोक्षाक्रोशानक्षमायां प्रत्यक्षाक्रोशं क्षितं
नवत्येवमुत्तरत्राप्यस्ति हि क्रियस्पपिमंदाक्षमाक्रोशुर्मयि ततः परोक्षमाक्रोशति न प्रत्यक्षं दिष्ट्या इति। तृतीयैकवचनप्रतिरूपको निपा
तः प्रसादवचनः प्रशंसावचनो वा अयमेव च प्रसादो मम इदमेव च। साधयन्मां परोक्षमाक्रोशति प्रत्यक्षमेवेष एव लाभः। लौकिकः स्वस्व
भावभाव एको अयमेव लाभो इत्येवं सर्वत्र भाष्या किं वान्यदालंबनमाश्रित्य क्षमा कार्या। तदभिधीयते। स्वकृतकर्मफलाभ्यागमाद्व
जन्मांतरोपात्तस्य कर्मणः स्वकृतस्यायं विपाको मम यदाक्रोशति ताडयति वा परः स तु निमित्तमात्रं कर्मोदयस्य यस्माद्द्रव्यक्षेत्रकाल
भावापेक्षः। कर्मणामुदयो भगवद्भिराख्यातः स्वकृतं च कर्मानुभवितव्यमवश्यं तया निकाचितं तपसा वा क्षपणीयमिति। क्षमितव्या
मिति किं वान्यदालंबनं क्षंतव्यमनसा विधेयमित्याह। क्षमागुणांश्चेत्यादि। क्षमाया गुणाः ज्ञानादिवृद्धिहेतवोऽनायासादयः। तांश्चानुचिंत्य
क्षमामेव विधीयात्। आयासो दुःखहेतुश्रमविशेषः प्रहरणसहायान्वेषणसंरंभावेशारुणविलोचनस्वेदद्रवप्रवाहप्रहारवेदनादि
कः। तद्विपरीतोऽनायासः स्वच्छिता। आदिग्रहणात्तत्स्पर्शकर्मप्रायश्चित्तभावः शुभध्यानाध्यवसायिना परसमाधानोत्पादनं अस्ति
मितप्रसन्नांतरात्मत्वमित्यादयः इत्यमनुस्मरतो गुणाः संपद्यंते। क्षममाणस्य क्षमितव्यमिति क्षमाधर्मः। तथा मार्दवं धर्मा मृदुर २५०
स्तां शुल्वजावस्तत्कर्म वा मार्दवं न च क्षणप्रदर्शनाया हानीयेईत्स्य तु सेकाविनिनीचैर्वृत्तिरस्तु ज्ञानासनदानांजलिप्रग्रहणा

दिविनयकरणरूपानीचैर्वर्त्तनं। उत्सेकश्चित्तपरिणामो गर्वरूपस्तद्विपर्ययो नुत्सेकः। संसारस्वभावात्मवयतो असमंजसं विशिष्टजातिकु
लादि संपदः कदाचिदेवासाद्यंते। कदाचिद्धीनास्ततो न गर्वपरिणामः। मार्दवं दर्शीसे तदेवाह। मदनिग्रहो मानविघातो श्चेत्यर्थः माद्य
त्यनेनेति मदो जात्यादिमदास्तस्य च निघातो मूलोत्कर्षणं इत्यर्थः। तद्यातिवाबकुंभावीज्यातादिमदविनाशः। तन्निरूपणार्थमाहात
अमानस्येत्यादि। तत्रेति वाक्योपन्यासार्थः। स्थानानि निदानानीति प्रसक्तीकरोति। परस्यातु नवमुत्सादयति। तद्यथेत्यादिनोदाहरति
जात्यक्षीनिवीर्यतान्यछेत्तानाति तत्र जातिपितृन्वयः प्राधानतमवंशताजातिर्जन्मजायते। पंचेंद्रियादिलक्षणा तया गर्वमुद्वहति। विशि
ष्टजातिरहमिति वदति कर्मपरिणामस्य निरूपणाजातिमदं स्वकृतकर्मफलानुजो जीवानां नाजातिरूपनीचाः प्रपद्यंत इति। नश्रेयान्जा
तिमदः। मात्रयः कुलं पितृयोजादि वा तेनापि मदो न युक्त एवं जात्यादि कावीह्मिति रूपं शरीरावयवानां सन्निवेशविशेषो लावण्ययुक्तस्मा
दिकप्रिन्माद्यति प्रतिषेधश्च शुक्रनरकारणालोचनाद्भवति। तत्रास्य कारणं मातृरोजः पितृशुक्रं उत्तरकारणं जननीग्रस्तान्नपानरसाः प्रवह
रोरसग्रहणे लेवमास्त्रानो न प्रतिभाति स्वरूपमदः त्वङ्मांसास्थिपुरीषहयाद्यशुभप्रायत्वात्। ऐश्वर्यमदे धनधान्यसंपत्प्रभवः धनंर
जतचामीकरमकरतादि गोमहिषाजाविकादि व्रीहि तिलमुद्गमाषकंगवादि धान्यं। नैनापि कर्मानुभावादृष्टापि नष्टेन वा संरक्ष
माणे न क्लेशकारिणा अकांडभंगुरेणायासबहुलेन कोपहेतु इत्येवं प्रसाद्दीनाबाधकेन त्वेतदेव बलं संज्ञया प्रसमरना
भुपात्तं तत्त्रिधा शरीरस्वजनद्रव्यबलात्। ऐश्वर्यग्रहणे स्वजनद्रव्यबलपरिग्रहः शरीरबलं तु वीर्यग्रहणात्संगृहीतं। वीर्यबलस्य प्र
धान्यप्रकाशनार्थं विज्ञानं बुद्धिचतुर्विधा औत्पत्तिकी वैनयिकी कर्मजा पारिणामिकी चेति तत्रौत्पत्तिकी अदृष्टाश्रुतपूर्वविमुक्त
पर्ज्ञाते। तत्क्षण इवसेकासादितोपजना आहृतफलाभरतरोहकादिरिव भवति। गुर्वादिविनयानुष्ठानाभ्यासविशेषजा वैनय
की ऐहिकामुष्मिक फलसंपादिना प्रस्कतकार्यनिस्तरणसमर्था धर्मादित्रिवर्गशास्त्रार्थग्राहिणी चतुत्रागमनकाणहस्तिनाप
रिज्ञानेनैमित्तिकस्येव। कर्मजा तु नर्दीः सुकृत् कार फलाभ्यनाचार्यकं कर्म। तत्र पुनः पुनरुपयोगात्प्रतिक्षणमभ्यस्यतस्तादृशी बुद्धि
रुत्पद्यते येन प्रथमादि क्षत कर्मातिशायी याप्यस्यकर्मपिजायते सोवलिकरूपाबलनं तु वायादेरिव। पारिणामिकी तु वयोविपा
कजन्मापरमहितनिःश्रेयफलापंचावयवादिसाधनानुसारिणी जवस्य नव्यकुमारादेरिव यथासंभवमिदंलक्ष्यानुप्या
अहमेव बुद्धिमानिति न मन्यमानः परिभवति। शेषं जनं मदसमुद्धस्य परपरिभवपरिवादात्मोत्कर्षताश्च नीचैर्गोत्र
द्वि बंधमेति यदनेकभवपरंपरासुपरिनिष्ठस्यनीतिसापभ्रमवगत्य बुद्धिगर्वमित्थं चिंतयेत्। बुद्धयो हि विनयाधानहेतवः स
वेदानजानुचित्। अहंकारस्य कारणीभवंति। मानपरस्य च विनयभंडनमवश्यंभावि विनयहीनस्य च धर्मतपसी निष्फले स्यातां
मिति विज्ञानमदोऽयत्नेन महता विवर्जनीयः श्रुतमागमः प्रणीतनाम आगमतत्त्वपरिज्ञानान्माद्यत्यहमेवैको जानामि नापर इति श्रुतम
दं धत्ते बालिशो मेवं परं मन्यते। श्रुतमदं च निजिघृक्षुरित्यमालोचयेत्। उत्कर्षापकर्षवृत्तिचारुक्षयोपशमस्यसंनिमत्तो
स्पेपि बद्धज्ञः कदाचिदहमान्य सोऽल्पतरश्रुतो। आतिगहनार्थत्वादागमानामधिगतश्रुतोपि बाढं अधिगन्तव्यः सामिति

श्रुतमदत्यागः श्रेयान्। अपि वरं चतुर्दशपूर्वधरैः षट्स्थानकमवघुष्यते यदितत्रकाकथा शेषश्रुतज्ञानावरणक्षयोपशमवैचित्र्यात् द्वि
गतसकललक्ष्मीनापरिहार्यः श्रुतमद इति। लाभमदो लाभः प्राप्तिर्विशिष्टवस्त्वन्नसत्कारसन्मानादेः नृपतिसमित्रस्वजनकेभ्यो विज्ञान
तपोभिजनकैश्वर्यादधिकादहं लब्धमेव परश्च यत्र वा न पिनलमत इति। स्वलाभेनमाद्यतिनच्छासकलजनवल्लभतां च प्राप्तोऽहमय
मयमपरो नकस्मै चिद्रोचते वचनमप्यस्य नादरयंतीति मदोऽपि यं लाभमदस्त्वेवं गृहीतव्यो लाभांतरायकर्मोदयात् लाभतालाभां
तरायकर्मक्षयोपशमाच्चासत्कारादिलाभसंसारेऽपि परिभ्रमतो जीवस्य रंकादावपि कोऽन तु शाश्वतः कर्मायत्तत्वात्संसारानुबंधी वे
ति लाभमदत्यागः श्रेयस्करः बाह्यस्य कस्यापि तिरपि कर्मोदयजनिते व संसारिणं वलत्नेति। बाह्यस्य कलाभमदः परिवर्जनीय।
इति वीर्यपराक्रमः शक्तिरुत्साहः सामर्थ्यमतिशायवती चेष्टेति पर्यायाः वीर्यांतरायक्षयोपशमात्प्रादुरस्ति। वीर्यबलविशेषस्ता
न वीर्यत्वात्युतिवीर्यमदः तस्य प्रतिक्षेपः संसारानुबंधित्वचिंतानात्संसारानुबंधी वीर्यमदः कषायरूपत्वात् वीर्यस्य वा शाश्वत
त्वान न्याहि बलिनो विपुरुषाः क्षणेन विबलतामुपयांतो दृश्यंते निर्बलाश्च बलवंतः संस्कारवशाद्धजायंते तथा व्याधिजरामृत्युषु
लबलेषु च क्षवर्तिहरिसीरिणोऽपि सीदंति। सरुक्शरा किमुनान्ये पृथग्जनाद इति। वीर्यमदाद्ध्यपरमः श्रेयान्। इतिशब्दो मदस्था
नाभियत्ताभावेदयति। भेदान्येतावंति स्थूलानि शस्तेषां भूयांस इति संप्रतिसामान्येन सर्वमदस्थानेभ्युदोषाना विजयन्नुपसंहरति
एभिर्जात्यादिरित्यादि कुलक्ष्मोर्जात्यादिनिमित्तो दंमानी परनिंदायामात्मप्रसंसायांच सक्तस्तीव्रेणातिशयवताहंकारेणोप
हतबुद्धिमंजीमसमतिर्धिषणेहपरलोकानुभवनीयं कर्मापि विनोतीव ध्नाति अकुशलं पापमशुभफलं अकुशलमपि बहुकदा
ह्यकुशलफलतया परिणमस्य अशुभफलयक्लंस म्यग्दर्शनादिमुक्तिसाधनं श्रेयः स्तवाख्यायमानमपि नप्रतिपद्यते। नश्रद्धतेयत
एतदेवंतस्मादेषां मदस्थानानां मार्दवं नियाहकं तन्नियमश्च धर्म इति। संप्रतिमायाप्रतिपक्षमार्जवलक्षयति। भावविशुद्धिरविसंवाद
नं चार्जवलक्षणभावः कायवाङ्मनसा नितेषां विशुद्धिरवक्रता शाठ्यविरहितत्वंमनसोऽपि परिणामः कायवाचोरुपचर्यते। तदनु
तानुवृत्तिः मायावीतु सर्वत्र संधानपरतया सर्वाभिसंकनीयः कपटपटप्रच्छादित कायादिक्रियः सुहृदेऽपि द्रुह्यतीति तमेव योगाना
मविपर्यासं दर्शयति। ऋजुभावइत्यादिनाउपनिरुक्त्यो विशेषः उपधिश्छद्मसञ्छादनं स्वाभिप्रायस्य… निकारो निकृतिः परबुद्धिपरभवघारे
…स्वाभिसंधेः साफल्यापादनं अविसंवादनमविनाशनमहिंसनमित्यनर्थांतरं। विनाशनं परिणामांतरापादनं विसंवादनमुच्यते न
विसंवादनविसंवादनं। परिणामांतरापादनमिति तस्मादेवं विधमार्जवं धर्मः अथ नाशौचप्रतिपक्षं शौचलक्षणमाविर्भावयन्नाह। अ
लोभशौचलक्षणं लोभस्वाभावतः परमार्थतोऽपि संगांश्चेतनाचेतनमिश्रवस्तुविषयः लोभदोषाश्चकोधमानमायाहिंसानृतस्तेयाब्र
ह्मपरिग्रहार्जनमलजालोपचीयमान आत्मा भवति अशुचिः तत्र लोभोऽभावो न क्वचिन्ममत्वं अलोभस्य हि लोभदोषविनिर्मुक्त २९१
त्वात्निर्मलत्वं ततः स्वपरहिताभिप्रवृत्तिरित्येतदेव शौचलक्षणं मुख्यमात्मनः एतदेवस्पष्टयति भावविशुद्धिमभितलाभावो निःसंगता
अपरोपहेत्वाद्यनुष्ठाने निःकल्मषता निर्मलता धर्मसाधनमात्रास्वपि रजोहरणमुखवस्त्रिकाचोलपट्टकपात्रादिलक्षणास्वनभिष्व।

नभिष्वंगो विगतमूर्छ इत्यर्थः। यस्माद्शुचिर्नाविकल्मषसंयुक्तो भावकल्मषं च लोभकषायः तस्मात्त्यागः शौचं धर्म इति। शारीरमाह्य
ण्यशौचकल्पनादिद्रव्यशौचं तनपास्तु केवलीयेन जलादिनानिर्लेपागंधिता पादनमागमोक्तेन विधिना कार्यमिति। अथ सरप्राप्तं पंचमं धर्
मंगं निर्दिक्षुराह। सत्यार्थे भवं वचः सत्सं सविद्यमानोऽर्थोऽनेकधर्मा न स्मिन्सत्यार्थे भवं दिगादेरहत्कृतयात्तयथावस्थितार्थप्रति
पादि सत्यं नत्ववसतुच्छकायमृगमानमपि सत्यं सत्यार्थः एवंतर्हि सद्भ्यः प्रसंसार्थः प्रशस्तोऽर्थः सत्यपापहेतुः तस्मिन्भवतीति भवं सत्
पक्षांतरसमाश्रयणं वा सद्भ्यो हितं सत्यमिति। संतो जीवा एव शुद्धेभ्यो हितं शाश्वत्परनात्मान्यजीवसंबंधि किंचिद्धितमस्ति अतो प्रशा
स्तार्थत्वादिति सामान्येन वा जीवेभ्यो हितं। अनेकपर्यायकलापभाजोऽर्थाः तेषां यथावस्थितविवक्षितपर्यायप्रतिपादनं सत्यमेता
देवत्तेभ्यो हितं यद्यथार्थप्रतिपादनमिति तस्येदानीं सत्यवचनस्य विशेषगुणान्नाचष्टे अनृतमिति। अनृतं अनृतमित्युक्तं भूताभ्रू
वनं विपरीतकटुकसावद्यादिवचनं। नानृतमनृतं। मनुवसत्यपर्याय एवायं सत्यमेतत्तथापि वक्ष्यमाणोत्तरगुणसमर्थपुनर्वच
नैकहृंसंदरहितं परपीडाकारित्वपरुषमपरुषं तत्राविनये शुभाशसवाभावनाविनये शुभासोभ्यागपुरुषं पिशुनं प्रीतिविच्छेदका
रिद्वयोर्बहूनां वा सत्यासत्यदोषास्त्वानान्। न पिशुनमपिशुनं। सभार्यं सभ्यं नसभार्यमसभ्यं। सभासु विगर्हितं विदग्धसभासु गृह्य
शरुष्टतामौचटनवचनावत्। तस्य प्रतिषेधो नासभ्यमसत्यवचपलो अनालोचितभाषितचवनमपि चपलं। न चपलमचपलं। न चाविलं नाविलं
ति। आविलं कलुषं कषायवशावर्तिनो वचनं नन्न आविलमनाविलं प्रसन्नवचनमित्यावत्। विरलं विश्रम्यभाषणं सविच्छेदत्वा
च्छ्रोतुरनादरवाक्यव्याहरणा बलंवैरस्यंकरोति। नविरलमविरलमनुसंततमिति। संभ्रांतमुत्त्रासकरं न संभ्रांतमसंभ्रांतम्
तित्वरितं वा संभ्रांतमनुस्वासमाषितेव वचः। अव्यक्तवर्णपदालापत्वादप्रत्यायकं वाश्रुतिविरताक्षरमप्रवेशकमेवस्मात् मधुरमि
ति प्रसन्नपदघटितं श्रवणसुखं सुखावबोधार्थं च। अनभिजातमविनयसहितं अभिजातं सप्रश्रयं सविनयं संदिग्धमाकांक्षाविनवर्त्तीन
असंदिग्धं तद्विपरीतमसंदिग्धमाकांक्षाविच्छेदकारि विराकांक्षमिति। अस्फुटमनिश्चितार्थत्वाद्वालकविशेषणप्राणं निश्चितार्थत्वा
स्फुटं अनौदार्यमतोऽत्यप्रदीपकं तद्विपरीतमौदार्यं अप्रधानार्थं अनौदार्यं उदारार्थप्रतिबद्धत्वादुदारं। तदेवमुदार्यात दृष्टमौ
दार्यमुक्तं विदग्धजनमनोनुरंजने। असमर्थ्याम्यं ग्राम्यं अग्राम्यं पदार्थाभिविवक्षितानभिव्याहरतीति पदार्थाभिव्याहारं। अग्राम्यत्वाय
दर्थमभिव्याहरतीति विदग्धजनाभिमतानित्यग्राम्यपदार्थाभिव्याहारं सीभरं विकत्थनं। विमर्दकरं न सीभरमसीभरमाभ्रूवप्रस्तुतार्थ
परिसमाप्तिकारि अरागद्वेषयुक्तमिति। मायाशाठ्यं सा कोपमाना सा वायुक्तं। सूचनात्सूत्रं गणधरप्रत्येकबुद्धस्थविरग्रथितं तस्य यो मार्ग
उत्सर्गापवादलक्षणः तदनुसारिणो प्रवृत्तार्थप्रवृत्तस्याप्यर्थानदर्पितमर्थ्यं श्रुश्रूषुजनेनाधीतस्य भावश्चिन्तितं द्युद्ग्रहणसमर्थं तदा वर्जनसमर्थ
तदेवं विधमात्मपरानुग्रहसमर्थं भवति निरुपधं मायारहितमुपधानावदोषः देशोयद्यत्र यस्यार्थस्य प्रसिद्धं तद्देशोपपन्नमक्षेर्विद्यका
लोपपन्नं यद्यत्र काले तदुपमाणं तत्परस्योद्वेगकारि भवति। प्रस्तावापेक्षमित्यर्थः। अनवद्यमगर्हितं। अर्हत्शासने यदशांगप्रव
चनं। तत्रतेन वा प्रशस्तमनुज्ञातं यत्तत्स्य यत्र सहितो मृषावसनाक्षादितवदनविवरस्यागितलक्षणमुखो वा भितमिति। यावता।

विवक्षितकार्यप्रतिपत्तिस्तावदेव तत्त्वपरमितं याचनमभीक्ष्णावग्रहादिविषयं प्रज्ञानमुत्पन्नसंदेहस्य मार्गादिस्त्रार्थविषयं प्रश्न
व्याकरणेषु च त्रिष्वेव प्राधान्येन साधोर्वाग्व्यापारा नान्यत्र निःप्रयोजनत्वात्। स्वाध्यायवचनाद्यपि न कर्तव्यमिति चेतात्मसंस्कारा-
र्थत्वाद्वचनादियत्नः संस्कृतात्मा हि त्रिष्वेव याचनादिषु व्याप्रियत इति। अथवा मुमुक्षोर्मुक्त्यर्थं यन्नेयदुपकारकं वचनं न तस्य प्रति-
षेध इति संप्रति संयमो निधीयते। योगनिग्रहः संयमः योगा मनोवाक्कायलक्षणास्तेषां निग्रहः प्रवचनोक्तविधिना नियम एवं गंतव्य
एवं स्थातव्यमेवं वितव्यमेवं भाषितव्यमिति एष संयमो निधीयते सप्तदशविध इत्यादि सप्तदशरूपसंयमः सप्तदशप्रकारो भवति
पृथिव्यादिनेनतान् प्रकारान् निर्मुखाकरोति पृथिवीकायिकसंयमः। पृथिवीकायः शरीरं येषां ते पृथिवीकायाः। एवं चेन्मत्वर्थी-
यः कः उच्यते पृथिवीकायशब्दस्य जातिशब्दत्वाद् बलेविव मत्वर्थीयकरूपसर्पवाल्मीक इति यथा। अथवा शायकाद्वैवंती ह्यर्थो संत्र
रूपोणीति पृथिवीकायिकजातौ जातिवसंयमः सम्यगुपरमो निवृत्तिरित्यर्थः ये जीवाः पृथिवीशरीरास्तेषां घट्टपरितापव्यापत्तीर्म-
नोवाक्काये कृतकारितानुमतिभिश्च परिहरतीत्यर्थः स एवं सर्वत्राप्कायतेजोवायुवनस्पतिपंचेंद्रियसंयमः प्रेक्ष्यसंयम इत्यत्र क्रियापदाध्याहारः प्रेक्ष्य
सामाचरन् संयमिनं युज्यते। प्रेक्ष्यैव चक्षुषा स्थंडिले बीजजंतुहरितादिरहिते पश्चाद्र्ध्वं निषद्यात्वग्वर्तनस्थानानि विदधीते सेवमा-
वरतः संयमो भवति उपेक्षासंयम इति। व्यापार्याव्यापार्यवेत्यर्थः एवं च संयमो भवति साधुव्यापारयतः प्रवचनविहितासु क्रियासु सं-
यमव्यापारणमेवोपेक्षणं गृहस्थानां क्रियासु अव्यापारयतः उपेक्षमाणस्य उदासीनस्य जनाः संयमो भवति। अपहृत्यसंयम इति
प्रोत्सृज्य परिवर्जसंयमं लभते। वस्त्रपात्राद्यतिरिक्तमनुपकारकं चरणस्य वर्जयतः संयमलाभः भक्तपानादि वा संसक्तं विधि-
ना परित्यजत इति प्रमृज्य संयम इति। प्रेक्षिते स्थंडिले रजो दृष्ट्वा प्रमार्जनमनुविधीय स्थानादिकार्यं पथि वा गच्छतः सचित्ताचित्तमि-
श्रपृथिवीकायरजोरंजितचरणस्य स्थंडिलात् स्थंडिलं संक्रामतो स्थंडिलाद्यास्थंडिले प्रमृज्य चरणौ संयमः सागमनागार्यादिरहितस्य
थात्वमार्ययत। एवं संयमः कायसंयम इति धावनवल्गनप्लवनादिनिवृत्तिः शुभक्रियासु च प्रवृत्तिः वाक्संयमो हिंस्रपरुषादिनिवृत्तिः
शुभभाषायां च प्रवृत्तिर्मनःसंयमो द्रोहाभिमानेर्ष्यादिनिवृत्तिः धर्मध्यानादिषु च प्रवृत्तिः उपकरणसंयम इत्यजीवकायसंय-
मः अजीवकायस्य पुस्तकादेः स्वग्रहणे ग्रहणधारणशक्तिसंपन्नजीवनानुरूपाः दीर्घायुष्कदगन्नासीत्तदयोजने पुस्तकेष्वपमान्त-
जानानुपरिहीले ग्रहणधारणादिभिरस्तिनिर्युक्त्यादि पुस्तकग्रहणं तु तत्त्वेवं यथाकालमपेक्षासंयमः संयमो वा भवतीत्येवं संय-
मे धर्मः संप्रति तपः प्रस्तावायातमुच्यते। तपो द्विविधमित्यादि। तपतीति तपः कर्मनिर्दहनसुवासंयमात्मनः शोषणाय वियोगधनार्थं बाह्या-
भ्यंतरतापनं तपनं तपः शरीरेंद्रियतापात्कर्मनिर्दहनाच्च तपः। अपर आह विशेषेण कायमनस्तापविशेषात्तपः द्विविधमिति बा-
ह्यमभ्यंतरं वा बाह्यमिति। बाह्यद्रव्यापेक्षत्वात् तीर्थिकगृहस्थादिकार्यत्वाच्च अभ्यंतरं त्वमतीर्थिकानभ्यस्तत्वादंतःकरणव्यापा-
रप्रधान्याच्चास्य च मनःप्रकृत्वाच्च। अन्ये त्वाहुः परप्रत्यक्षं बाह्यं परप्रत्यक्षमभ्यंतरं। अथवा आतापनादिः कालक्लेशस्तपो बहि- २९२
र्लक्ष्यत इति। बाह्यमनशनादि षोढा हि सोऽपि द्विवहिस्तरां वर्त्तत इति। तदुपलक्षितं बाह्यमेवं प्रायश्चित्तादि तपस्तस्मादपरिशिष्टमिति।

अनशनावमौदर्यादि प्रायश्चित्तविनयादि यथाक्रमं इहत्वकृत्स्नार्थं पुरुषविशेषचरितं प्रकीर्णककालाहारादिनियतमनेकविधं त-
द्यथेत्यादिना दर्शयति। यववज्रमध्ये चंद्रप्रतिमे द्वे मध्यशब्दः प्रत्येकमभिसंबध्यते। यवमध्या वज्रमध्या च चंद्रप्रतिमे इति। चंद्रतुल्ये
यथा चंद्रस्य कलावृद्धिः प्रतिदिवसमेवं भिक्षाकवलवृद्धिः। यथा चंद्रस्य हानिः प्रतिदिनं तथा भिक्षाकवलहानिरिति। अयवमध्या चंद्रप्रति-
मा शुक्लप्रतिपदीरंगाद्मावास्या प्रतिपद आरभ्य यथा चंद्रकलावृद्धिः। कवलवृद्धिर्वा यावत्पौर्णमास्यां पंचदशकवलाः ततः कृष्णप्रति-
पद्यपि पंचदशैव एवमेकैककवलहानिर्यावदमावस्यायामेककवल इत्येषा यवमध्या। वज्रमध्या कृष्णप्रतिपदारंभा कृष्णप्रतिपदि
पंचदशकवलान् भवहरति तत्राप्येकैककवलहानिर्यावदमावस्यायामेकः कवलः शुक्लप्रतिपद्यप्येक एवेति द्वितीयादिष्वेकैकवृद्धि-
र्यावत्पौर्णमास्यां पंचदशेत्येषा वज्रमध्या तथा कनकरत्नमुक्तावल्यस्तिस्रः कनकावली रत्नावली मुक्तावली च। तत्र कनकावलीत-
पः प्रायते आह्ना च चतुर्थभक्तं ततः षष्ठं। ततोऽपि षष्ठात्षष्ठे पुनश्चतुर्थषष्ठाष्टमदशमद्वादशचतुर्दशषोडशाष्टादशविंशत-
द्वाविंशतिचतुर्विंशतिषड्विंशति अष्टाविंशति त्रिंशद्द्वात्रिंशच्चतुस्त्रिंशद्भक्तानि ततः पुनश्चतुस्त्रिंशत्तमं षष्ठानि षष्ठानि। ततः परमेतदे-
वायमर्द्धचतुस्त्रिंशद्भक्तादारभ्य प्रतिलोमं विरचनीयं यावत्पर्यंते चतुर्थभक्तमिति। अस्यां च तपोदिवसानां त्रीणि शतानि चतुरशीति-
रधिकानि। अष्टाशीतिः पारणदिवसास्तपः सह पाश्चात्यानि दिनशतानि द्विशतपंचाशदधिकानि भवंति पिंडसु वर्षमेकं त्रयो मासाः द्वाविंश-
तिर्दिवसा इति। अत्र च प्रथमकनकावल्यां सर्वकामगुणकेन पारणविधिः द्वितीयकनकावल्यां पारणके सर्वनिर्विकृतिकं पारयितव्यं
तृतीयस्यां पारणविधिरलेपकृतापहारेण चतुर्थ्यां पारणविधिराचाम्लेन परिमितभिक्षेणेति एवं मासावतस्तपणमपि कालः पंच
वर्षाणि मासद्वयमष्टाविंशतिर्दिवसा इति संवत्सरं रत्नावल्यां तथापना चतुर्थषष्ठाष्टमान्यष्टौ पुनश्चतुर्थषष्ठाष्टमदशमद्वादशचतुर्दश-
षोडशाष्टादशविंशतिद्वाविंशतिचतुर्विंशतिषड्विंशति। अष्टाविंशतिद्वात्रिंशच्चतुस्त्रिंशद्भक्तानि तच्चतुस्त्रिंशत्तमं चाष्टमभक्ता-
नि ततः परमादिमर्द्धचतुस्त्रिंशद्भक्तादारभ्य प्रतिलोमं स्थापनीयं यावत्पर्यंते चतुर्थभक्तभक्तमिति। अस्याश्चाष्टाशीतिः पारणदि-
साः तैः सह तपोदिवसा एकत्रीकृता एकपिंडितः कालो वर्षं पंच मासा द्वादशदिवसाः। दिनशतानि पंच द्वाविंशानि उत्तरारत्न-
ओ रत्नावलीमेदा इति। एषा राशिसंवत्सराश्चतुर्गुणो जातं वर्षाणि पंच नव मासाः अष्टादशदिवसाः पारणविधिः पूर्ववत्। संप्रति
मुक्तावली प्रदर्प्यते। सा क्रावत् चतुर्थं षष्ठं तत्रश्चतुर्थाष्टमे चतुर्थदशमे चतुर्थद्वादशे चतुर्थचतुर्दशे चतुर्थषोडशे चतुर्थाष्टादशे
चतुर्थविंशतितमे चतुर्थद्वाविंशे चतुर्थषड्विंशे चतुर्थाष्टविंशे चतुर्थत्रिंशद्भक्ते चतुर्थद्वात्रिंशद्भक्ते चतुर्थचतुस्त्रिंशद्भक्ते
अतः परमन्यदर्द्धचतुस्त्रिंशद्भक्तादि प्रतिलोमं स्थापनीयं यावत्पर्यंते चतुर्थभक्तमिति। अत्र त्रीणि दिनशतानि षष्ट्यधिकानि वर्ष-
मेकं। एतच्चतुर्गुणं जातं वर्षचतुष्टयं पारणदिनान्यपि षष्ट्यधिकपारणावधिश्च पूर्ववत्। तथा अपरस्तपोविशेषः। सिंहविक्री-
डितं द्विरूपं क्षुल्लकसिंहविक्रीडितं महासिंहविक्रीडितं च। तत्र क्षुल्लकसिंहविक्रीडितविरचनं चतुर्थषष्ठे चतुर्थाष्टमे षष्ठदशमे अष्ट-
मद्वादशे दशमचतुर्दशे षोडसे चतुर्दशाष्टादशे षोडशविंशे तत्तोऽष्टादशं पुनरान्तार्थमेव प्रतिलोमं रचनीयं विंशषोडशादिकं

यावत्स्पर्श्यते चतुर्थभक्तमिति। षड्भिर्मासैः सप्तविंशदिवसैः परिसमाप्तिः एतच्चतुर्गुणं जातं वर्षद्वयं दिनान्यष्टाविंशतिः त्रयस्त्रिंशन्मा
रणदिवसा इति। महतः सिंहविक्रीडितस्य रचना चतुर्थषष्ठे चतुर्थाष्टमे षष्ठदशमे अष्टमद्वादशे दशमचतुर्दशे द्वादशषोडशे च
तुर्दशाष्टादशे षोडशविंशे अष्टादशद्वाविंशतिं चतुर्विंशे द्वाविंशतिषड्विंशे चतुर्विंशाष्टाविंशे षड्विंशत्रिंशत्के अष्टाविंशतिद्वा
त्रिंशे त्रिंशच्चतुस्त्रिंशत्के ततो द्वात्रिंशत्कं ततः परमाद्यार्धमेव चतुस्त्रिंशत्कादिकं प्रतिलोमं विरचनीयं। यावत्स्पर्श्यते च
तुर्थभक्तमिति। अस्य च कालो वर्षमेकं षण्मासा दिनान्यष्टादश एष कालश्चतुर्गुणो जातं वर्षाणि षट् मासद्वयं दिनानि द्वादश शेषं
पूर्ववत्। तथापरं तपः सप्तसप्तमिकाद्याः प्रतिमाश्चतस्रः सप्तसप्तमिका अष्टाष्टमिका नवनवमिका दशदशमिका चेति। तत्र
सप्तमिकायां प्रथमायामहोरात्राणामेकोनपञ्चाशद्दिवसा इत्यर्थः। अष्टाष्टकाः। अष्टाष्टमिकायामहोरात्राणां चतुःषष्टिर्दिनानीति
। नवनवमिकायामेकाशीतिरहोरात्राणि दशदशमिकायां दिवसशतं सर्वत्र प्रथमाद्यहोरात्रसंख्या एकैकाभिक्षाशीलत्वं सर्वत्रैनिच त
स्य च प्रतिमासु प्रथमे सप्तके प्रथमे ऽष्टके प्रथमे नवके प्रथमे च दशके प्रतिदिनमेकैकभिक्षाशीलत्वं द्वितीये सप्तके ऽष्टके
नवके दशके च भिक्षाद्वयाशीलत्वं एवं शेषेष्वपि सप्तकाद्येकैकभिक्षावृद्धिः कार्या यावत्सप्तमे सप्तभिक्षा अष्टमे ऽष्टौ नवमे नवभि
क्षा दशमे दशभिक्षाशीलत्वमिति। तथान्यत्तपः सर्वतोभद्रमिति। द्विविधं तत्क्षुल्लकसर्वतोभद्रं महासर्वतोभद्रं चेति तत्र प्रथम
स्य प्रस्तारविधिर्जल्प्यते। पञ्चकोष्ठाणि कृत्वा तिर्यगूर्ध्वं च ततो रचना तपसः कार्या चतुर्थषष्ठाष्टमदशमद्वादशानि प्रथमपंक्तौ द्विती
यस्यां दशमद्वादशचतुर्थषष्ठानि पारणदिवसाः पञ्चविंशतिः कालो मासत्रयं दिनानि दश। एष एव चतुर्गुणो वर्षमेकं मासो दश
दिनानीति क्षुल्लकसर्वतोभद्रमुच्यते। तिर्यगूर्ध्वकर्णयोश्च सर्वत्र दिक्राशिस्तुल्यः पञ्चदशपरिमाण इति। अथवा क्षुल्लकस्य सर्वतोभ
द्रस्य द्वितीयो विकल्पः चतुर्थषष्ठाष्टमदशमद्वादशानि अष्टमदशमद्वादशचतुर्थषष्ठानि द्वादशचतुर्थषष्ठानि द्वादशचतुर्थषष्ठा
ष्टमदशमानि। षष्ठाष्टमदशमद्वादशचतुर्थानि दशमद्वादशचतुर्थषष्ठाष्टमानीति संप्रति महासर्वतोभद्रं भण्यते। सप्तसप्तकोष्ठ
कानि कृत्वा तिर्यगूर्ध्वं च पंक्तयो रचना। चतुर्थषष्ठाष्टमदशमद्वादशचतुर्दशषोडशभक्तानि चतुर्दशषोडशचतुर्थषष्ठाष्टमदश
मद्वादशभक्तानि दशमद्वादशचतुर्दशषोडशचतुर्थषष्ठाष्टमानि। षष्ठाष्टमदशमद्वादशचतुर्दशषोडशचतुर्थानि षोड
शचतुर्थषष्ठाष्टमद्वादशचतुर्दशानि। द्वादशचतुर्दशषोडशचतुर्थषष्ठाष्टमदशमानि। अष्टमदशमद्वादशचतुर्दशषोडशचतु
र्थषष्ठानि। भद्रोत्तररचना द्वादशचतुर्दशषोडशाष्टादशविंशतिभक्तानि अष्टादशविंशतिद्वादशचतुर्दशषोडशभक्तानि चतुर्दशषो
डशाष्टादशविंशतिद्वादशभक्तानि विंशतिद्वादशचतुर्दशषोडशाष्टादशभक्तानि षोडशाष्टादशविंशतिचतुर्दशीभक्तानीति।
दिनानि पञ्चत्रिंशद्भद्रोत्तरं तपसि। तथापरं तप आचाम्लवर्धमानं अलवणोदनकुल्माषाचाम्लं तद्वर्धमानं यत्र तप २५३
सि तदाचाम्लवर्धमानं तस्य प्ररूपणा साकारवचा आचाम्लं तत चतुर्थभक्तं पुनर्द्वे आचाम्ले पुनश्चतुर्थभक्तं पुनस्त्रीण्याचाम्लानि पुनश्चतु
र्थभक्तं पञ्चाचाम्लानि पुनश्चतुर्थभक्तमेवमेकैकमाचाम्लं वर्धयता चतुर्थभक्तं च विदधता वर्धयितव्यमाचाम्लं यावदाचाम्ल

शतं पूर्णं पर्यन्ते चतुर्थभक्तं कालपरिमाणमस्य चतुर्दशवर्षाणि मासत्रयं विंशतिर्विंशतिर्दिवसाश्चेति। सर्वतोभद्रमित्येवमादीन्यादिग्रह
णादनेकप्रकाराणि तपांसि कीर्णकमिति ज्ञापयतीति। पारमर्षे एव प्रसिद्धं प्रवचने। अथवादिग्रहणसंगृहीता द्वादश भिक्षुप्रतिमास्ता दर्श
नार्थमाह तथा द्वादश भिक्षुप्रतिमा मासिकाद्या इत्यादि मासिकी आदिर्यासां ता मासिक्याद्याः द्वादशेति इयत्तानिरूपणाय संख्यानिरू
पणं भिक्षुरेषणादिशुद्धभिक्षाशी प्रतिज्ञा मासः प्रयोजनमस्या इति। मासिकी मासेन परिसमाप्तिमायातीत्यर्थः आसप्तमासिक्यः समेति
विभागं दर्शयति द्वित्रिचतुःपञ्चषट्सप्तमासा एवमेताः सप्त तथापरास्तिस्रः प्रथमा सप्तरात्रिकी। द्वितीया सप्तरात्रिकी। तृतीया
सप्तरात्रिकी चेति। तेनैता द्वादश। अपरे त्वहोरात्रिकी चेति। एवं द्वादश तत्र मासिकीं प्रतिमामारूढः साधुर्भोजनस्यैकां दत्तिं दत्ति
मादत्ते। तथा पानकस्य दायिकाचलनकस्यान्तः पादमेकं विन्यस्यापरं बहिर्व्यवस्थाप्य तां दत्तिं यदि ददाति। ततः कल्पते। अथादिम
ध्यावसानेषु त्रयं हि पीडा स्वर्द्धपेडा गोमूत्रिका पतङ्गवीथिः संबुक्क इत्यागत्वा प्रत्यागता चेति। षड्विधगोचरभूमिचारी एवंविधनपश्चा
दिति। यत्र ज्ञायते तत्रैकरात्रं कल्पते वासः। यत्र न ज्ञायते तत्रैकरात्रं वा अहोरात्रद्वयं वा वस्तुं कल्पते न परतः। यावत्प्रच्छनानुज्ञापन
पृष्टव्याकरणं भाषा। आगमनविकटगृहकवृक्षमूलोपाश्रयत्रयपरिभोगकारी पृथिवीकाष्ठयथासंस्तीर्णसंस्तारकत्रयग्राही कश्चित्
स्त्र्यासने प्रतिश्रये अग्निना प्रदीप्ते ततो दाहभयान्नातिक्रामेत्। कण्टकादिकं पादलग्नमक्षिणो वा कणुकादि नो निर्हरेत्। जलस्थलादि
षु यत्रास्तमेति तत एव स्थानादिकमपि पदं न यातीति। विगतजीवेनापि पानकेन हस्तपादादिप्रक्षालनं न करोति। सक्षुषमापततो दुष्टा
श्वहस्त्यादेर्भीतः पदमप्येकं पश्चान्नापसर्पेत्। एवमादिनियमविशेषैर्विचित्रा एषा मासिकी प्रतिमेति। द्विमासप्रतिमामारूढस्यापि
स्य द्वे दत्ती। पानकस्य च द्वे शेषं पूर्ववत्। एवमुत्तरास्वपि यावन्तो मासास्तावत्य एव दत्तयः यावत्सप्तमासिक्याः सप्त दत्तयः शेषं
प्रथमप्रतिमाविधानं। सप्तरात्रिकीं प्रतिमामारूढस्य चतुर्थभक्तमपानकं ग्रामादेर्बहिरुत्तानपार्श्वशायिनो निषद्यस्य वा कल्पते।
स्थानं दिव्यमानुषतैर्यग्योनानुपसर्गान् सम्यक् सहमानस्य शेषं पूर्ववत्। द्वितीयां सप्तरात्रिकीं प्रतिज्ञामारूढस्य तदेव चतुर्थभक्तमपान
कं स्थानं तस्य दण्डायतलगण्डशायिता उत्कुटुकासनं वा। तृतीयामपि सप्तरात्रिकीं प्रतिज्ञामारूढस्य तदेव चतुर्थभक्तमपानकं स्थानं
तस्य गोदोहिका वीरासनं आम्रकुब्जिता वेति। अहोरात्रिकीं प्रतिपन्नस्य प्रतिमां षष्ठभक्तमपानकं बहिर्ग्रामादेश्चतुरङ्गुलान्तरो
चरणौ विधाय लम्बितबाहोः कायोत्सर्गस्थानमेकं शेषं पूर्ववत्। एकरात्रिकीं प्रतिमां कुर्वतोऽष्टमभक्तमपानकं ग्रामादेर्बहिरी
षत्प्राग्भारगतेन कायेनैकपुद्गलनिरुद्धदृष्टेरनिमिषनयनस्य यथाप्रणिहितगात्रस्य सुगुप्तेन्द्रियग्रामस्य कायोत्सर्गस्थायिनो दि
व्यमानुषतैर्यग्योनानुपसर्गान् सम्यक् तितिक्षते यस्तस्य भवतीति। सप्तचतुर्दशैकविंशतिरात्रिकप्रतिमा इति नेदं पारमर्षप्रवचनानुसारि
ज्ञानं किं तर्हि प्रमत्तगीतमेतत्। वाचको हि पूर्ववित् कथमेवंविधमार्षविसंवादि निबध्नीयात्। सूत्रानवबोधादुपजातभ्रान्तिना
केनापि रचितमेतद्वचनकं द्वौ वासनराइ द्वया द्वितीया सप्तरात्रिकी तृतीया सप्तरात्रिकीति सूत्रनिर्भेदः द्विसप्तरात्राणीति
सप्तरात्राणीति सूत्रनिर्भेदं कृत्वा पठितमज्ञेन सप्तचतुर्दशैकविंशतिरात्रिकाः प्रतिमा इति। एवं तपः प्रकीर्णकमभिधाय सामाचारि

धिक्मात्वाप्राह। बाह्याभ्यंतरोपधिशरीरान्नपानाद्याश्रयो भावदोषपरित्यागस्त्यागः बाह्याभ्यंतरोपधिशरीरान्नपानाद्याश्रयो यस्य भावदो
षस्य तस्यैवं विधस्य भावदोषस्य परित्यागस्त्यागो विधीयते। न हि निरालंबनो भावदोषः समस्ति यथा लब्धुं तत्र एसानादत्ते शाकानं त्यज
नोबंधो लोपकरणादित्यागोपि संतृणोत्याश्रव द्वाराणि तत्रोपकरणं बाह्यं रजोहरणपात्रादि स्वविरजनकल्पयोग्योपधिः कुष्ठ वाउपनसं
मभ्यंतरे क्रोधादिश्वाति दुस्सजउपधिः शरीरं वाभ्यंतरमन्नपानं च बाह्यमादिग्रहणाद्दोषपयहि कंचवहिर्नि षद्यादं डकानि आश्रय भूतं
भाव दोषस्य भवति। भावदोषो मूर्छा स्नेह गार्ध्यादिः संयमसाधनं रजोहरणादि सर्वं धारयति। न पुनरोगार्ध्यादियुक्तः शोभाद्यर्थं एवं वि
धस्य भावदोषस्य परित्यागः सर्वप्रकारं त्यागउच्यते। संयत्यादिकिंचन्यस्वरूपनिरूपणायाह। शरीर धर्मोपकरणादिषु निर्ममत्वमाकिं
चन्यं। उक्तेन न्यायेन भावदोषत्यागं कृत्वा बाह्योपकरणं रजोहरणपात्रादिरूपं भुंजानो प्यकिंचिन एव भवति शरीरमाश्रयमात्रमात्मनोय
दयतत्र च त्यागार्थं मेशुचित्वयां सास्थिपंजरं केवलं धर्मसाधनचेष्टायाः संयमभरक्षमायाः सहायके वर्त्तते। तदिदं शाकटाक्षोपांज
नवदाहारादिनोपयाहं न तत्र बयवसन्निवेसाशोभार्थमिति निर्ममत्वमाकिंचन्यं धर्मोपकरणे रजोहरणादि प्रमार्जनादिकार्यप्रसा
धनायाभ्युपेयत इति संयमोपकरणमात्रापि निर्ममत्वमाकिंचन्यमिति ब्रह्मचर्यस्वरूपनिर्द्धारयिषयाप्राह व्रतपरिपालनयोत्साहि
आकिंचन्ये व्यवस्थितो ब्रह्मचर्यपरिपालयेत्। तद्ब्रह्मचर्यं गुरुकुलवासलक्षणं गुरुकुलवासो ब्रह्मचर्यमिति। वृहत्त्वादात्मा ब्रह्माबृत्ति
रात्मनि ब्रह्मचर्यमाख्यातं ब्रह्मणि चरणमात्मारामत्वमरक्तद्विष्टात्मनिव्यवस्थानं। अब्रह्मणश्च विनिवृत्तिव्रतं धवनवर्जनप्राधान्येन तत्प
रिपालनाय गुरुकुलवस्तव्यं। यद्यपि मनोज्ञामनोज्ञविषयरागद्वेषत्यागो विमुक्तिब्रह्मचर्यं तथापि प्रधानत्वेन विवक्षामैथुननिवृ
त्तेरेव तत्परिपालनार्थं च भगवद्भिर्नवगुप्तयो परिदिष्टा वसतिकथानिषद्येंद्रियकुड्यांतरपूर्वक्रीडितप्रणीताहारातिमात्रभोजन
विभूषणाख्या ज्ञानसंवर्द्धनार्थं च गुरुकुलवासो यथोक्तमार्ष। नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य धन्ना आवकहाए गुरुकुल
वासं न मुंचंति।१। कषायाः क्रोधादयस्तेषां परिपाकः परिणतिरुपशमः क्षयो वा तदर्थं च गुरुकुलवासो अनुपेयः गुरुरान्त्यस्य हि परिणाम्यै
चित्राः दिकथादिदोषाद सद्ब्यसनसंपर्कादयसत्क्रियासंगरनुश्रोतोगामित्वदोषात्सद्यपमोक्षमार्गभ्रंशः स्यात्। तस्माद्प्राणिना तु गुरुकुल
वासः श्रेयो गुरुकुलवासेनचात्मतंत्रीकृतस्य ज्ञानदर्शनचरणव्रतभावनागुप्त्यादिपरिवृद्धि। अत एव च साधोर्द्विसंगृहीतत्वमाचार्या
पाध्यायाभ्यां निर्ग्रंथानां सदा निर्ग्रंथीनां संगृहीतत्वं च। तदेव चपर्यायशब्दैराख्यातमाह राधनार्थमस्वातंत्र्यं गुर्वधीनत्वं गुरुनिर्देशावस्था
यित्वमिति। आचार्यग्रहणाच्च पंचाचार्याः आख्याः। प्रव्राजकसामायिकव्रतादेरारोपयिता।१। दिगाचार्यः सचित्ताचित्तमिश्रवस्त्वनुज्ञा
यी।२। श्रुतोद्देष्टा श्रितमागममुद्दिशति यः प्रथमतः।३। एवमुद्देष्टुर्गुर्वपायेत देव श्रुतं समुद्दिसति अनुज्ञानीते वा यः स्थिरपरिचिता
कारेणेत्यविनसम्यग्धारणानुप्रवचनेन च सम्यक्तनसमुद्देशानुज्ञयोरेककालत्वात् समुद्देसमुद्दिशासंगृहीतमनुज्ञानं।४। आम्ना
य आगमस्तस्योत्सर्गापवादलक्षणोर्थस्तत्क्रीयाम्नायार्थवाचकः पारमर्षप्रवचनार्थकथनेनानुग्राहको वृतमिषद्यानुज्ञायी पंचमा
आचार्यः।५। तस्य ब्रह्मचर्यस्येमां द्विगुणरापितदृढ़ीकरणार्थं ब्रह्मचर्यस्य विशेषगुणानाख्याति। इमे इति प्रत्यक्षाः। किं यते विशेषे २९४
ण विद्यते नोपकारित्वाद्विशेषणा अब्रह्मविरतिव्रतस्य यथोक्तभावनाप्राकृपंच सेवाव र्जनेन निर्गूढे स्त्रींगालोचन पूर्वर

तस्मरितत्हरसकाप्रकथने यः संसक्त दावसथादि। विरतयो भावनाब्रह्मणश्च अथस्येसशाद्यः शारीरविभूषा च तत्र त्वर्जिते दिस्तं
तत्त्वाभावपरितुष्टिर्मनसो ब्रह्माद अरक्तद्विष्टस्यैवं ब्रह्मचर्यं जायते इति। तदेवं क्रमयाक्रोधनिग्रहाल्लिप्सो क्रोधोनी चेदैस्यनुस
काप्यं मार्दवं धारयेत्। परित्यक्त मदस्थान आर्यवं भावयेत्। भावदोषवर्जनेन निगूढदोषामाया मार्जवेन प्रकटीकृत्यसेवमाचरेत्। अलो
भसम्पयेण शौचं तत्रे चे शौचे नसंतोषे अब्रह्मकात्मा सत्यं ब्रूयात्। सत्य भाषी समदशविधसंयममनुतिष्ठेत्। संयतस्तपसा शायविशोध्यना
र्थं तपश्चरेत्। ततो बाह्याभ्यंतर धर्मसाधनानि त्यजेत्। विद्यमाने च पिकाय वाङ्मनसेषु धर्मोपकारेषु वस्त्रज्ञनसुहृत्सं बन्धिषु वक्ति स्
हृत्वान् निर्ममत्वाल्लमाकिंचन्यं भावयेत्। सत्याकिंचन्ये ब्रह्मचर्यपरिपूर्णं भवतीति।६। एवं परमविशुद्धिलक्षणया धर्मव्यवस्थितः पुन
रपि आत्मगुणदोषमजुष्यार्थं जगदाद्दशाभिः स्मृतवैर्विज्यानुचिंतयेदित्याह। अनित्याशरणे संसारैकत्वान्यत्वाशुचित्वाश्रवसं
वरनिर्जरालोकबोधिदुर्लभधर्मस्वाख्यातत्वानुचिंतनमनुप्रेक्षा। अनुप्रेक्ष्यंते बहुवचनांतेत्वनित्यादि चिंतनामनुप्रक्षा इति एता द्वादशानुप्रे
क्षा इति एता द्वादशानुप्रेक्षा इत्यादि भाष्यं। एता अनित्यादिकाः परामृश्यंते द्वादशेति द्वादशैव नाधिका न्यूना वा। अनुप्रेक्षणमनुप्रेक्षाः
तिवानुपेक्षाः तत्र तत्त्वानित्यभावनाभावनालक्षणमं तत्रानित्यादयो धर्मस्वाख्यातांताः कृतद्वंद्वाः विहितभावप्रत्यया अनुचिंतनशब्दे
न सह कृतषष्ठीसमासात् तदुद्दंशसमानाधिकरणमनुप्रेक्षाशब्देन सह संप्रतिपद्यते। अपरे पठंत्यनुप्रेक्षा इति। अनुप्रेक्षितव्या इत्य
र्थः। अपरे अनुप्रेक्षाशब्दमेकवचनांतमधीयते। तत्रार्थे नित्यादिचिंतनमनुप्रेक्षोच्यते।७। बहुवचनांते त्वनित्यादि चिंतनामनु
प्रेक्षा इति। एता द्वादशानुप्रेक्षा इति। एता द्वादशानुप्रेक्षा इत्यादि भाष्यं। एता अनित्यादिका। परामृश्यंते द्वादशेति द्वादशैव नाधिका
न्यूना वा। अनुप्रेक्षणमनुप्रेक्षा। अनुप्रेक्ष्यंते तु चिंत्यंते इति वानुप्रेक्षाः तत्रानित्यभावना भावलक्षणेन। अभ्यंतरं शरीरं इदं जीव
प्रदेशैर्व्याप्तत्वात्। बाह्यानि शय्यासनवस्त्रादीनि। आदिग्रहणादौधिकौपग्रहिकोपधि समस्तस्य ग्रहणं तत्र शरीरं तावज्जन्मनः प्रभृति
एव विस्तं जरतरामवस्थामास्कंदत् प्रतिक्षणमन्यथान्यथा भवत् जराजर्जरितसकलावयवं ऊर्जनात्त विरचनामात्रपर्यंते परि
त्यक्तसन्निवेशविशेषं विलीयते इत्यनित्यमेवपरिणामानित्यत या एवमन्यागतमेवानुभेदकाणस्य तत्र न निबंधाः। स्नेह इति बंधोन
भवति तत्र स्नेहत्यजनो दर्शनमदने स्थानविरूपाविशुनिस्तरस्य धर्मध्यानादिषु व्यासंगेन न भवति आगमेष्वनिहितं। जीवमे
दं शरीरं गं इदं कंतं पियं मणुण्णमिच्चादि। शय्यापनिश्रयः। संस्तरणपट्टकादिः संस्तारक फलकाविर्वा आसनं गोमयपीठकादि
तं कल्पवाल पट्टकादि प्रतिदिवसं जरसा विपरिणम्यमानं सर्वप्रकारं स्वासंनिवेशावस्थां विहाय विशराकृता प्रतिपद्यत इत्यनि
त्यभावनाभ्यासान्नतेषु ममत्वं भवति केवलं धर्मसाधनमिति ग्रहणं सर्वसंयोगा अनित्या इति यावंतः संयोगममसंबंधाः केचि
द्बाह्याभ्यंतरे द्रव्यैः शाह्यशरीरादिभिस्तेषु एकांतभंगुरा इत्येवरूपं वा दिमता संयोगेन वियोगांतेन भवितव्यं स्वभावः खल्वयं।
बाह्याभ्यंतराणां द्रव्याणामित्येवं चिंतयेत्। कस्मादेनो यथा चैवं चिंतयतस्तेषु अभिष्वंगो न भवति। स्नेहप्रतिबंधः एन दैवाद्माभू
नेत तद्वियोगजं दुःखमित्येवं नित्यानुप्रेक्षते वियोगे बाह्याभ्यंतरैर्द्रव्यैस्तद्वियोगे जातं दुःखं शारीरं मानसं वा न भवत्याभूदित्यनागतमे
वाभिनित्यानुप्रेक्षा प्रतिपादनायाह। यथा निराश्रये इत्यादि। यथेति दृष्टांतप्रदर्शने निराश्रये इति। शुभिस्थानमूले जनविरहितेः।

ति निवारकाभावप्रदर्शनं यत्र तु जनस्य च कदाचित्कश्चित्कालिको निवारयत्यपि वनस्थली ए ष्ठ इति वचनशब्देन वर्ष्टिरू
ढ इत्युक्ते । ननु नर्जालिकादियुक्तिरमनं बलवतेति दुर्बलेनाभिभूतः कदाचित्प्राणस्यापि बलवानपि यदि प्राण भवति । ततो
मंदारत्वान्नानुगच्छेदित्याह । क्रूरत्वरिगते नाभिषे विलेति सिंहेन मृगराजेनाभ्याहतस्याभिभूतस्य मृगशिशोरिति जीर्णमृगः कदा
चिदनुगतक्रूरशत्रवायुराभिः शरणं प्रगत्त्वा स्थलस्य दृष्टिनपुनः शवः शरणं नयाशरिस्थानेतस्य वाभावः एवमित्यादिना
दार्ष्टान्तिकमर्थं समीकरोति । जन्मयोनेर्निःसरणं गर्भाधानं च उभयं दुःखदेतुस्तत्राकुलः । पिंडकवद्योनिमुखेन पीड्यमानः कुंछे
णनिस्सरति । उदरस्थोपि पिंडितावयवत्वादुरीतन्मात्र पुरीषाकुलितः । कतिचिन्मासान् दुःखेन गमयति । निर्गतिस्य योनेर्ज
रसायस्य तत एव प्रतिकूलमवस्थान्तरापत्तेः । मरणमथाबीचिक भवरूपं भावोच जन्मवतः । व्याधयो ज्वरातीसारकासश्वासकुष्ठप्रभृत
यः । प्रियइष्टोजनस्तेन सह विप्रयोगस्तद्विपरीतो । विप्रियस्तेन च संयोगमीप्सितमाप्तुमिष्टं तस्यालाभः दौर्मनस्यं मानसमेव दुःखम
रणमल्पायुष्मा ऽपक्रमसन्निधाना ह्रासकल्यायुषः मपरिक्षयाशा अवस्थं तया प्राणिनां संसारेऽति भवति । आदिग्रहणाद्वधबं
धदेतुक्लेशानीतो ऽपादिदं शमशाकं द्वंद्वाभिभवः एवं जन्मादितसमुद्भूतेन दुःखेनाभीक्ष्णस्य जन्मवतः शरणं नास्ति । स्या लोकत्रय
तः सर्वदाहमशरण इति । नित्यमेव भीतस्य संसारिके शुभावेषु मनुजसुरेषु हस्त्यश्वादिषु हिरण्यसुवर्णादिषु वनादिषु संभोग
प्रीतिर्भवतीति परमर्षिप्रणीत शासनाभिहित एवं विधो ज्ञानवर्णादिलक्षणो घटते । प्रवर्त्तते । इति जन्मजरामरणभयपरिग्रस्त
चयस्मात्तदेव परं प्रकृष्टं शरणमित्यशरणानुपेक्षा ॥२॥ संसारानुप्रेक्षाभिरूपणाय क्रमतेनादौ संसारित्वादि अविद्यमान
आदिर्यस्य भवगादिनाभत्र । तस्य लोनाप्युत्पादितः केनचिदिति संसरणमितश्चेतश्च नमागमनं संसारस्तस्यानुविधिं प्रेरनरकादिषु
देवभवप्राप्तिजन्मवतः । नरकादिजन्मनां प्रपादानानिते षुचक्रवर्तीत्र वपरिभ्रमतो जन्मवतः सर्व एवप्राणिनः क्षितिजलदहनप
वनवनस्पतिशरीराः । द्वित्रिचतुःपंचेंद्रियलक्षणस्वभावजनकाः स त्वोयदायोनेनसंबंधेन स्वाम्यादिसंबंधेन वा संबंधमन्वभूवन्नतु
भवत्यनुभविष्यंति वा स्वजनकाः स्वाम्यादया वा यदा न संबंधाः तदा परजनाः । एतदेवदर्शयति न हि स्वजनपरजनयोर्व्यवस्थावि
द्यत इति । न नित्यमवकश्चित्स्वजनः । परजनो वास्तिस्वजनो भूत्वा कर्मवशात्परजनो भवति । परजनश्च भूत्वा स्वजनो भवती
यमवस्थैव संसारे न व्यवस्थास्तीति । माताहि भूत्वेत्यादि नानाभेदाव्यवस्थां प्रपंचयति । एवं चतुरशीतियोनिप्रमुखशतसहस्रेष्वि
त्यादियोनिर्यत्र सम्मूर्छति गर्भस्थानं वा तत्र विभागो भवति । परस्परं केनचिद्देलक्षणेन द्वयेनाद्वयेन वा सर्वज्ञवचनयाद्द्येण ।
तत्र पृथिवीजलज्वलनसमीरणेषु प्रत्येकं सप्तसप्तलक्षाः दशलक्षाः प्रत्येकवनस्पतिषु निगोदजीवेषु चतुर्दशलक्षाः द्वित्रिचतु
रिंद्रियेषु प्रत्येकं द्वे द्वे लक्षे तिर्यङ्नारकदेवेषु प्रत्येकं चतस्रश्चतस्रो लक्षाः मनुजेषु चतुर्दशलक्षाः । एवं चतुरशीतिलक्षयोनीनां
चतुरशीतियोनिप्रमुखानि सतसहस्राणि प्रमुखशब्दः । प्रधानवचनः चतुरशीतियोनिप्रधानानि यानिशतसहस्राणि तेषु नान्येषु २५६
स्पर्धाः रागो माया लोभो द्वेषः क्रोधमानौ मिथ्यावहासादिर्मोहः एभिरभिभूतैर्वशीकृतैर्जन्मवद्भिः । अनिष्टा विषयइष्टा येषां तैरविछिन्नवि

षयतृष्णैरन्योन्यं परस्परं भक्षणं पशुरोमादीनामिव तथा विधौ मारणं । बंधः संयमनं । अभियोगो भ्याख्यानं आक्रोशैवं विधदुःखभाजनमसद्
स्तियादशः संसारः द्वंद्वाबधबंधदशामशाकशीतोष्णादयः । न एवारामो यत्र संसारे आरामो हि नानाजातीयतरुसमूहः । आरामइवारामो
द्वंद्वानां संघातः कष्टं कष्टं दुःखं गहनं स्वभावैः स्वरूपं यस्य संसारस्येत्येवं चिंतयेत् ततः संसारभयादुद्विग्नस्य जाताशतिसंसारिकसुखजि
हासालक्षणो भवति निर्वेदइत्येषा संसारानुप्रेक्षा ॥३॥ एकत्वभावनास्वरूपाभावनायाह । एक एवाहमित्यादि । एक एवाहं न जातु द्वि
तीयो जाये म्रिये वा जननं मरणं चानुभवामीति यमलकयोरपि क्रमेणैव भवितः शरणं । यद्वजन्मनि दुःखं मरणे वा तदेक एवानुभवामि स्वार्थं
। नतस्य मदीयस्याशर्मणे अनुभवे कश्चित्सहायोस्ति न तत्र सह जन्मानः सह मरणश्च निगोदजीवा अपि तत्र्यति चारयं तस्मुमर्थी मेक एवा
हं म्रिये इति । एतदेवजाप्येण दर्शयति । न मे कश्चित्स्वजनः । परजनसंज्ञो वा व्याधिजरामरणादीनि दुःखान्यपि हरति मत्तः सकलं दुःखमाहिप्या
न्तानि निमित्तेइत्येतत्र प्रसंज्ञो विभागो वंटनं न च सभूयस्वजना । परजनावा मयि दुरकमुत्तमं विभाजयंतीत्यर्थस्ततश्चैक एवाहं स्वकृतस्यक
र्मणः फलमनुभवामीति चिंतयेत् । स्नेहानुराग प्रतिबंधइति जनन्यादि ष्वकामविषयेस्नेहो भार्यायां कामविषयोनुरागः प्रतिबंधश्चास
क्तिर्न भवति । परसंज्ञकेषु च द्वेषानुबंधः परएवायं न कदाचिदात्मीयो भवतीति किमनेन मा द्वनेनेतितत्तः स्वजनेषु परजनेषु च निःसंगतानु
पगतो मोक्षायैवयतेतेत्येकत्वानुप्रेक्षा ॥४॥ अन्यत्वभावनायाह । शरीरव्यतिरेकेणेत्यादि शरीरं पंचप्रकारमौदारिकादि तस्माच्छरीरपंचका
दन्यो हं कुत एतत् । यस्मादिंद्रियग्राह्यं शरीरमतींद्रियोहं तेन च रूपादिनाकारेण गृहीतुं शक्यं इंद्रियग्राह्यं शरीरमित्यध्यापिनाभेदप्रति
पत्तिरित्याह । अनित्यं शरीरमित्यादि पुद्गलात्मका मौदारिकादि शरीरं पुद्गलाश्च विशरारुत्वाच्छरीरसन्निवेशविशेषं विहाय स्कंधांतरेण पर
माणुरूपेण वा वर्तंते न जातुचिदात्मा असंख्येयप्रदेशसन्निवेशं परित्यज्य ज्ञानदर्शनरूपं वाहत्योवर्तते वर्तिष्यते वा ततश्च नित्यत्वमात्म
नः । ननु ध्रुवपरिणामानित्यतया आत्मा अनित्योपीष्यते । इत्यपरितुष्यन्नाह । अज्ञं शरीरं ज्ञोहमिति । न कदाचित्सुपुद्गला ज्ञानाद्युपयोगरूपे
ण परिणमिनो भवंति । आत्मा तु परिणमितानाद्युपयोग परिणामेन ततोन्यत्वं तथा द्यं तवच्छरीरमनाद्यंतोहं आदिरारंभकालः अंतो विनाश
कालस्तौ यस्यस्तस्य दाद्यंतवत् आदिरौदारिकवैक्रियाहारकाणं स्तु ज्ञानात्तैजसकार्मणयोः सत्यप्यनादित्वमिष्टं पर्यायार्थीकरणेन तु
तैजसकर्मणः पुद्गलाः परिसटंति लगंति चा । यदाश्लेषमायांति तैजसकार्मणत्वया तदा आदिः यदा परिसटेति न दांतः । नैवमात्मनः
कदाचिदादिरंतो वा विद्यते । आरंभारंभकाभावात् ज्ञानरूपेण दर्शनरूपेण वा अविच्छिन्नत्वानन्यरूपत्वाच्च सर्वदेवानाद्यनोहं
इत्यन्यत्वं बहूनि चशरीराणि संतसहस्राणीत्यादि न हि प्राक्तन जन्मशरीराणि इदानींतनजन्मशरीराणि भवंति संसारे परिभ्रमतव
हूनतीता निशरीरकाणि न हि तेषां अफानानुशरीरेन्वयोस्ति स एवोपि अहं पुनः स एव येनोपभुक्तान्यतीतिशरीरशतसहस्राणि
सतो हमस्मि इत्यनुचिंतयेत् अन्यत्वे च सति विच्छिन्नशरीरममत्वत्वान्निःश्रेयसायैव यतते । इत्यन्यत्वानुप्रेक्षा ॥५॥ अशुचित्वा
नुप्रेक्षानिदर्शनायाह । अशुचिविषमिदं शरीरमित्यादि शुचिमलरहितं न शुच्यशरीरकं । पाणिपादाद्यवयवसन्निवेशविशेषस्त
द शुचीत्येवं चिंतयेत । ननु च निर्मलशरीराः स्निग्धत्वचः स्त्रियः पुमांसश्च दृश्यंते तत्कथमस्य प्रति ज्ञामात्रेणाशुचित्वप्रतिपद्येत

स्यात्। आद्युत्तरकारणाशुचित्वादित्यादिहेतुपंचकं। तत्राद्युत्तरकारणाशुचित्वादित्यादि। तत्र हेतुपंचसु हेतुषु आद्युत्तरकारणाशु-
चित्वादित्यस्य व्याख्या तावदुच्यते। क्रमावद्योतनार्थः आद्यं कारणं प्रथमं शुक्रं शोणितं च करोतीति। कारणं निर्वर्त्तयत्युत्पादयतीत्यर्थः
येनासावुत्पद्यमानो जीवस्तैजसकार्मणशरीराभ्यां प्रथममेव शुक्रशोणिते अभ्यवहरति। शरीरीकरोति। औदारिकशरीरतया परिणम-
यति। उत्तरकारणं तु रसहरण्यापरसंज्ञितया नाड्या जनन्याहृतमाहाररसमभ्यवहरति। तदेतदुभयमत्यंताशुचीति शुक्रशोणित-
योरशुचित्वं लोकस्य प्रतीतमिति व्यापयत्यत्यंताशुचीति न जातुचिच्छुचित्वं शुक्रशोणितयोः सम्भवति। तद्यथा कवलाहारो हीत्यादि-
नोत्तरकारणस्याशुचित्वमाचष्टे कवलाहारो हि जनन्या ग्रस्तमात्र एव श्लेष्माशयं कफस्थानं प्राप्तः श्लेष्मणा द्रवतामापादितोऽत्यंताशु-
चित्वतो पित्तस्थानं प्राप्तो मूलतामापन्नोऽशुचिरेव ततो वाय्वाशयं प्राप्तः समीरणेन विभज्यमानः पृथक् खलुः पृथक् रसः इति द्वैधी-
परिणतिमापद्यते तत्र खलांशः मूत्रपुरीषद्विकाद्विदलालादयो मलाः प्रादुर्भवंति रसाच्छोणितमांसमेदोऽस्थिमज्जशुक्राणि जायंते
सर्वं चैतत्कफादि शुक्रांतमशुच्येव तस्मादाद्युत्तरकारणाशुचित्वादशुचिशरीरमिति निगमयति। किंचान्यदित्यनेनाशुचित्वे हेत्वं-
तरमाह। अशुचिभाजनत्वादिति। असुचीनि कर्णमलादीनि तेषां भाजनत्वात्। यथावस्करस्तमवस्करो वर्चस्थानं पादक्षालनकं तदिव यत्त-
दवस्करभूतं तस्मादशुचीति किंचान्यदशुचिभवत्वादिति। हेत्वंतरमेषामेव कर्णमलादीनामशुचीनामुद्भवमाकरः शरीरं यस्मात्तत उत्प-
द्यंते। एते कर्णमलादयः अनंतरेण हेतुना उत्पन्नानां कर्णमलादीनामाश्रयः शरीरमिति प्रतिपादितं। अनेन पुनर्हेतुना शरीरादेव क-
र्णमलादयः उत्पद्यंते इति प्रतिपाद्यते। अयमनयोर्विशेषः अशुचौ वा गर्भे संभवतीत्यशुचिशरीरं गर्भे उदरमध्यं वरा स्त्री वा शब्दार्थे
अशुचौ वा गर्भे तु पुरीषादि प्राये संभवस्तूत्पद्यते। यस्माच्छरीरं तस्मादशुचीति किंचान्यदित्यपरो हेतुरशुचित्वे असुभपरिणा-
मपाकानुबंधादिति। अशुभः परिणामो यस्य पाकस्य तेनानुबंधित्वादनुगतत्वत्त्वमेवाशुभपरिणामपाकं प्रकाशयति। आर्त्तवमृ-
तो शोणितं तस्मिन्। आर्त्तवे सति विदोराधानात्प्रभृतीति बिंदुः शुक्रावयवस्तदाधानान्निक्षेपात्प्रभृत्यौदारिकं कललादिभावेन
परिणमति। अर्बुदघनव्यूहे अवयवविभागः सर्वस्यायमशुभपरिणामः पाकः कललाद्यनयवरूपस्तेनानुबंधदुर्गंधशुभगंधं
अत एव स्त्रियमावकोश्रस्थजावदुरंतमिति पर्यवसाने पि कृम्यादिपुंजो वा भस्म सारमेयवायसादिभक्षो वा भस्मांतमस्थिशकला-
नि वा एवमिदं दुरंतं शरीरं यतस्तस्मादशुचीति किंचान्यदिति। प्रकारांतरेणाशुचित्वप्रतिपादनमशक्यप्रतीकारत्वादिति। अशक्यः प्रतीका-
रो यस्याशुचित्वस्य अशुच्यपनयनप्रकारश्च लोके जलक्षालनादिना प्रसिद्धः। उद्वर्त्तनकं प्रतीतं रूक्षणं रौक्ष्यं कषायादिभिः स्नानं जले-
नात्र लेपनं चंदनादिकं धूपो विशिष्टः सुगंधिद्रव्यसमवायः प्रघर्षणं घर्षणकं वासयुक्तिः पटवासादिकं माल्यं मालाई पुष्पा। आ-
दिग्रहणात्कर्पूरोशीरतुरुष्ककस्तूरिकाग्रहः एभिरप्यस्य शरीरस्य विशिष्टैरशुचित्वमपनेतुं न शक्यं कुतः अशुच्यात्म-
कत्वात्। अशुचिशरीरात्मा स्वभावो यस्य तदशुच्यात्मकमशुचिस्वभावस्य पुरीषादेरिव असम्यक्प्रतीकारशुचित्वापनयनं। शुपघात-
कत्वाच्चाशुचिशरीरं शुचीनि द्रव्याणि शालयोदनदधिक्षीरद्राक्षादीनि तान्यपि आत्मसंपर्कादुपहत्याशुचीकरोति। तथा कर्पूरचंद- २५५
नकश्मीरजादीनि। सुगंधद्रव्याणि संस्पर्शमात्रादेव हतीकरोति। अतो विचार्यमाणं सर्वप्रकारं शरीरमेतदशुचि परमार्थतो नापरं किंचि-

त्वतो शुचिसमस्तिशरीरकं वा शरीरसंघटकं वा विद्यत इति। एवं ह्यस्य चिंतयतः इत्यादिना अशुचित्वानुप्रेक्षायाः फलमाह निर्वेद इत्य-
प्रीतिररतिरुद्वेगः शरीरके निर्विण्णश्च न शरीरसंस्कारार्थमायतते जन्मप्रहाणायैव उद्घटते इत्यशुचित्वानुप्रेक्षा॥६॥ आश्रवा-
नुप्रेक्षा स्वभावप्रकाशनायाह। आश्रवानिहामुत्रापाययुक्तानित्यादि आश्रूयते यैः कर्मादीयंते। आश्रवास्ते इंद्रियादयः स्तानाश्र-
वानिहलोके अमुत्रेति परलोके अपायो दोषः पीडा दुःखं तेनापायेन युक्तान् महानदीगंगादिका तस्याः श्रोतः प्रवाहः तस्य वेगः
सर्वणविशेषः तद्वत्तीक्ष्णा यथासनदीप्रवाहस्तृणकाष्ठादिपतितमपहरति। एवमेते चक्षुरादयः स्वप्रवाहपतितमात्मनम-
पहरंति। सन्मार्गाद्भ्रंशयंति। अकुशलं पापं सामान्येन वा कर्म बंधत स्यागमः प्रवेशस्तद्वारभूतान्। कस्य वपुन्यस्य दशविधध-
र्मस्य वा निर्गमद्वारभूतान् इंद्रियमादियेषां ते इंद्रियादयस्तानवद्यतः बंधयते जीवस्यापकारिणश्चिंतयेदववाअवद्यं गा-
र्हितं तत्तावदादिस्वेवं चिंतायत। तद्यथेत्यादिना सोदाहरणानाश्रवान्दर्शयति। सिद्धविद्यः सोनेकेन विद्याबलेन युक्तोपि वि-
षद्विचारी। अंगस्वरलक्षणादष्टांगनिमित्तस्य पारंगतो गार्ग्य इति। गोत्राख्यः सत्यकिः स्त्रीलोलस्तु विलोनिधनं विनाशमुपज-
गामेति। तथेत्यपरमुदाहरणं यवसप्ररणीयविशेषः तस्य प्रमाथो भंजनमर्दनात्मव्यवहारलक्षणस्तदेकेवश्चि छयावगाहाश्च-
वगाहादिगुणसंपन्नमित्यादिग्रहणात् सिंहादिभ्यो जरहितवमेवं विधवनविचारणे मदेनोत्कटतरा हस्तिबंधकीखिति। गण-
कालंसंज्ञा। नाश्वंमंकप्रकारं चाटुकरणस्पर्शनादिभिः प्रोढयोपितहवमनुजारप्रतारयंति। हस्तिमूर्खान् बंधः संयमनं वध-
स्ताडनं दमनं। शिक्षाग्रहणं पश्चान्निर्दनं अंकुशाभिघातः प्रतोदः प्राजनकस्तेनाभिघातः आदिग्रहणाद्दंतिना रोपिणं युद्धा-
कालेव शस्त्राभिघातः तथेति दृष्टांतरमाह। मेष्कवगुमप्रसंगेनाभिहितः कुतो गर्भेयिस्या अश्वतरीवेगसरीप्रसवकालेमर-
णमस्तुपेत्य वशमेवमित्यादिना दार्ष्टांतिकमर्थमुपसंहरति। एवमुक्तेन न्यायेन लोकद्वयेपि विनाशमृच्छंति। प्राप्नुवंतीति तथैवा-
श्रवांतरेपि दोषदर्शनं सामायिकानि चवायसात्मुदाहरणानि बडिशाग्रलग्नमांसं तथैवापराश्रवमनदोषोद्घाटनमुदाहर-
णद्वयेन तथा परमाश्रवे दोषापादनं। अर्जुनकचौरः स्याम्यांनिवेशितदृष्टिर्निधनं गत इति। सामायिकमेवाख्यानकं तथैवाय-
मप्यन्याश्रवस्य दोषः इति कप्रतितित्तिरः पंजरवर्त्तितित्तिरिशब्दश्रवणादागतो युयुत्सार्थी पाशेन बध्यते। एवं कपोतकपिंजलादेरपि
गीतमेककमेवं गौर्यां पेटके गायति संगीतकं स्कंदकस्यादि सुक्तं एवमेतानाश्रवान्दोषवत्कुशलानेव चिंतयेत्। एवं च परिचिंतयत्
आश्रवनिरोधायैव घटते इत्याश्रवानुप्रेक्षा॥७॥ संवरानुप्रेक्षानिरूपणायाह। संवरांश्च महाव्रतादीनित्यादि आश्रवकारणमपि-
धानमाश्रवदोषपरिवर्जनं संवरः तांश्च संवरान् प्राणातिपातनिवृत्त्यादीनगुप्त्यादिपरिपालनानिति गुप्त्यादयः परिपालनाः
काय परिपाल्नशक्तिवांस्महाव्रतादीनां। आदिग्रहणादुत्तरगुणपरिग्रहः इतरत्रादिग्रहणात्समितिग्रहणं तान्गुणचिंतयेत्। गुणउपकारि-
णस्तांश्च गुणानिति एवं चिंतयेत्। सर्वेह्येते इत्यादिगतार्थं नाख्यं॥८॥ निर्जरानुप्रेक्षा स्वरूपावधारणमाह। निर्जरावेदना इत्यादिना।
निर्जरणं निर्जरा आत्मप्रदेशानुभूतरसकर्मपुद्गलापरिशाटनं निर्जरया एकार्था विपाको वेदना विपाक इति तत्र वेदनानुभवः तत्र

वेदनानुभवः तत्रसाम्प्रादनं विपचनं विपाकः कर्मणां फलानां उदयावलिकाप्रवेशोनुभूतरसानामुत्तरकालं परिशाटः विपच्यमा
ना विपाकाः परिसटंति सद्विविधः इति विपाकानिसंबंधः। निर्जरायाः सहैकार्थत्वात्। द्वैविध्यप्रदर्शनायाह। अबुद्धिपूर्वः कुशलमू
लश्चेति तत्राबुद्धिपूर्वः बुद्धिपूर्वायस्य कर्मणः शाटयामीति। एवंलक्षणा बुद्धिः प्रथमं यस्य विपाकस्य स बुद्धिपूर्वः। सबुद्धिपूर्वोनबुद्धि
पूर्वोऽबुद्धिपूर्वः तत्र तयोर्विपाकयोर्यं तावदबुद्धिपूर्वः नरकतिर्यग्मनुष्यामरेषु कर्मज्ञानावरणादि तस्य यत्फलं माहात्म्यादिको
दिरूपं। तद्विपाकस्तु उदयस्तस्मात्कर्मफलाद्विपच्यमानाद्यो विनिर्जरणं लक्षणो विपाकः सतिनस्मिन्कर्मफले विपच्यमाने सम
वत्यबुद्धिपूर्वकः। मदितैस्तपःपरीषहजयाबानारकादिभिर्मनीषितः तमेवंविधविपाकमवद्यतः पापं संसारानुबंधिनमेवचिंत
येत नद्वितादृशानिर्जरया मोक्षः। शाको धिगतुं इत्येतदेवाह। अकुशलानुबंध इति। यस्मादुपभुज्यापितत्कर्मफलं पुनः संसारभावे
वत्रमितबंधयः पुनः कुशलमूले विपाकस्तपसा शक्याविधेन परीषहजयेन वा कृतः। सा वक्ष्यं तत्रैव बुद्धिपूर्वकः तमेवं विधं गुणत
इति गुणमुपकारकमेव चिंतयेत्। तस्मात्तादृशो विपाकः शुभमनुबध्नात्यमरेषु नावदिंद्रसामानिकादिस्थानान्यंवाप्नोतिमनुष्ये
षु चक्रवर्तिबलदेवमहामंडलिकादिपदानि लभते ततः सुषु परंपरया मुक्तिमवाप्नोति शुभानुबंधः निरनुबंधो वेतिवाशब्दः
पूर्वविकल्पापेक्षः। तपः परीषहजयकृतो विपाकः सकलकर्मक्षयलक्षणः साक्षान्मोक्षायैव कारणीभवतीति। ननु च यदि बुद्धि
पूर्वको देवादिफलः शुभानुबंधी विपाकः स तत्रागमेन सह विरोधः नो इहलोगट्ठयाए तवं। अहिट्ठेजा। न लपेत न पुण्यकरणेदेवादि
फलमिष्टमहितं फलमोक्षार्थमेव घटते। तदंतरालिकफलं देवादितदानुषंगिकमिक्षुवपने केदारादिसेकमन्नमपीणेतुते
न तपः परीषहजयामोक्षः शाप्यः तत्र याप्रवृत्तिस्तपसिपरीषहजये वा सा बुद्धिपूर्विका विपाकहेतुरितितस्मादेवमनुचिंत
यत्कर्मनिर्जरणायैव घटते निर्जरानुप्रेक्षा॥९॥ पंचास्तिकायात्मकमित्यादिना लोकानुप्रेक्षास्वरूपं निरूपयति। पंचास्तिकाया
धर्माधर्माकाशपुद्गलजीवाख्यास्तेआत्मनः स्वरूपमस्येति लोकमित्यपरिच्छिद्यते विविधो नानाप्रकारः परिणामोयस्येति तमेवंवि
धपरिणामं दर्शयति उत्पत्तिस्थित्यन्यतानुग्रहप्रलययुक्तं उत्पत्तिर्द्विविधाप्रतिकृत्याप्रवर्तिनी अविनामो त्यप्रलया नुमेयाप्रतिक्ष
णमन्यथा वान्यथा चोत्पद्यंते परिणामंते नाना अस्तिकायाः कालांतरवर्तिनी मृद्द्रव्यपिंडाद्याकारेणोन्मज्जनप्रकीणमयशायपिं
डादिरूपेण परिणामते स्थित्यंतरवस्थानमस्तिकायइति अस्तिकायरूपेण सर्वदाप्यवस्थानात्। धर्मास्तिकायादिव्यपदेशमजह
तः ते सर्वदाप्यवतिष्ठंते वचनार्थपर्यायैरन्यतानन्यत्वमिति स्यामन्यत्वंविनाशः सोपिद्विविधः क्षणिकः कालांतरवर्ती विवि
वक्षितरूपतः। द्वितीयकालमन्यत्वमवरूपं नावीत्यवस्थांतरापत्तिरेव विनाशोन निरन्वयः क्वचिदस्तिप्रलयः क्षितिपुलनीअनुग्र
हकारित्वेन सतां नां घटादिसमुत्पन्नानिष्टं अजलाहरणधारणादिरूपेणानुगृह्णाति। प्रलयोपिकालांतरभावी नवत्यनुग्राहको॥ २९७
विनाशः संहितः कुंडलार्थिनः कटकविनाशवनन्यत्वएवअलत्वाद्विभिन्नक्रमतुल्यत्वादि परिणामिश्चनावैलोकंजीवाजीवधरल
क्षणं क्षेत्रं। अतएव विचित्रस्वभावमितिवृत्तौ। विचित्रो नानाप्रकारः स्वभावस्वरूपं यस्य सद्युत्कर्षापकर्षरूपत्वात्। वैचित्र्यं च कर्म

परिणतेः एवं ह्यस्य चिंतयतस्तत्त्वज्ञानविशुद्धिर्भवतीति। लोकानुप्रेक्षा एवमुक्तेन प्रकारेण लोकस्वरूपमभिधाय तस्मिन्नेव जीवादिषु
पदार्थेषु विशुद्धं निर्मलं शंकादिदोषरहितं ज्ञानं भवति। यथा च भगवद्भिरुक्तं। सव्वठाणाइं असासयाइं इति। नकश्चिदस्मिन्नावर्तितज
रूपे लोके किंचित्स्थानमस्ति। शाश्वतं यत्रात्यंतिकी वृत्तिरात्मनो भवतीत्याह। परलोकनिरपेक्षस्य च मोक्षायैव चेतो वृत्तिरनुगुणा भव
तीति। लोकानुप्रेक्षा नादौ संसारे स्यादिना।१०। बोधिदुर्लभत्वानुप्रेक्षां निरूपयति। अनादाविति। सर्वकालावस्थायिनि संसारे किंस्व
रूपेण नरकादिषु स्थानादिषु तेषु भवग्रहणेषु इति। तेष्वेव तेष्वेव नरकतिर्यग्मनुष्यामरभवग्रहणेषु पुनःपुनः क्रमवत्परिभ्रमतो नंतकृत्वः प्रा
णिनः शरीरमानसैर्नानाप्रकारैः दुःखैरालीढस्य तत्त्वार्थश्रद्धानाविरतिप्रमादकषायादिभिरुपहतमतेर्ज्ञानावरणाद्युदयाभिभूतस्य
ज्ञानावरणादिकर्मचतुष्टयं घातिकर्मविशेषतो मोहनीयं सम्यग्दर्शनादिमार्गस्य विघातकमित्येतदेवाह। सम्यग्दर्शनादीत्यादि सम्य
ग्दर्शनविरत्यप्रमादकषायविशुद्धो बोधिदुर्लभो भवतीति। जंतोरित्यादि विभक्तिपरिणामेनाभिसंबंधनीयं। जंतुनादुर्लभइति। बोधिश
ब्देनात्र चारित्रमेवविवक्षितं। अथवाऽनंतरं सम्यग्दर्शनादिविशुद्धो बोधिः सम्यग्दर्शनादिरेव बोधिरपगतसकलशंकादिदोष
याज्ज्ञानदर्शनावरणांतरायक्षयाच्च केवलं। अथवा तपसा निर्जरा चेत्युक्तं निर्जरातश्च कर्मणां केवलज्ञानमुत्पद्यते
तत्केषां कर्मणां निर्जरातः। केन वा क्रमेण निर्जरणे सति केवलज्ञानमाविर्भवतीति तानि कर्माणि क्रमं चाभिनस्त्रेण दर्श
यति मोहनाम्नोष्टाविंशतिभेदः। पूर्वोक्तः तस्य क्षयो निरवशेषतः। परिशाटनमात्मप्रदेशेभ्यः क्षीणे च सकलभेदे मोहनी
ये ज्ञानावरणदर्शनावरणांतरायेषु च पंचचतुःपंचभेदेषु युगपत्क्षीणेषु निरवशेषीकृतेषु केवलज्ञानं दर्शनमाविर्भव
ति। समस्तद्रव्यपर्यायपरिच्छेदि घातिकर्मविगमादुत्पद्यते। यथोक्तं। तस्मिन् तस्मिन्समये केवलमुत्पद्यते। ततस्तत्समस्तं
ज्ञानं च दर्शनं चावरणक्षयं कृत्वा तु दृष्टिः। त्रिपटनि नित्यकालसहितं ततः स लोकमिमं। पश्यति युगपत्सर्वं सालोकं
वा सर्वभावज्ञा आसामिति सूत्रनिर्दिष्टानां कियतीनां बंधस्थानं कर्मप्रकृतीनां कर्मस्वाभावो मोक्षस्तमाश्रित्य द्विविधकारित्वं

वतिश्च भावाः क्षयोत्पन्नाः । प्रसादः केवलस्य ज्ञानस्य दर्शनस्य च हेतुः कारणं निमित्तमिति पर्यायाः फलसाधनयोगः पदार्थो
हेतुरिति भाविनो भावो पि हि निमित्तं भवति । यथा विपक्षहेतुरभावद्वारेण गमकः तत्क्षयाद् इत्यादि । घातिकर्मक्षयो ऽच्छा
दनक्षयस्त्वर्थः । अतस्माद् अगमलकणोपगुणो हेतुः विनाभाप्युलेन्ममित्यामिति । हेतौ पंचमी निर्दिष्टमोहक्षयादिति सार्वहिक
मं वक्ष्ये पि व्यपेते निरावरणे जीवस्वभावो ज्ञानलक्षणः सदा चकास्ति । तस्य न सा पि हि कर्मविगमो निमित्तं । किरणमालिनस्त्वा
निबहलात् पटलप्रच्छादितमंडलस्य संकुचितकिरणकलापस्य तदपगमे निरावरणस्य समस्तमस्ति विस्तरणं तद्धि
ति ज्ञानदर्शनचमोहक्षयादिति पृथक्करणं प्रतिविशिष्टक्रमप्रसिद्ध्यर्थं किमर्थं क्रमप्रसिद्धिः यथा गम्येत प्रत्युद्दीर्णस्य
य एव सर्वस्य मुमुक्षोः । ततमोहसागरमुत्तीर्यान्तर्मुहूर्तमात्रं विश्राम्यति । वत्सश्च वीतरागस्य अस्तत्रोस्य ज्ञानदर्शना
वरणान्तरायक्षयो युगपदेव भवति । तत्समनंतरमेव च केवलज्ञानं केवलदर्शनं चोपजनयामास इति । यथोक्तमार्गमेवी
सपिकमेण नियंता इत्यादि चरमेनावरणमित्यादि । ७ । अत्रादौ उक्तमित्यादि तंत्रांतरसंबंधमिति । मोहक्षयात् केवलज्ञानो
त्पत्तिः अथैषां मोहादीनां क्षयः । कथं केन प्रकारेण भवतीत्यत्र अभिप्रायः प्रश्नयतः । यावदपि सकषाययोगस्तावदपि
कर्मसततं बध्नाति । कषाययोगप्रत्ययं तच्च प्रतिकृत्य बध्नतः कथं क्षयं करोतीति । अत्रोच्यते इत्याह । बंधहेत्वभावनिर्जरा
भ्यां आत्मप्रदेशानां कर्मपुद्गलानां वान्योन्यानुगतिः लक्षणः । क्षीरोदकवद् बंधः तस्य हेतुः मिथ्यादर्शनादि पंचविधः तस्य हेतो
रभावात् पूर्वकर्माणि पोतास्ति पूर्वमबद्धस्य च निर्जरणं निर्जरात्मप्रदेशेभ्यः परिशाटनं कर्मणः । बंधहेत्वभावश्च निर्जरा
श्च बंधहेत्वभावनिर्जरे ताभ्यां हेतुभ्यां कर्मपरिक्षयः मिथ्यादर्शनादयः इत्यादि भाष्यं । प्राग् निर्दिष्टा मिथ्यादर्शनादयस्ते
षामपि मिथ्यादर्शनादीनां बंधहेतूनां तदावरणीयस्य कर्मणः क्षयाद् भावो भवति मिथ्यादर्शनमज्ञानविशेषः ज्ञानाव
रणीयेन कर्मणा ज्ञानमेवाच्छादितं तद् ज्ञानमुच्यते । अन्यथाव्यवस्थितान् जीवादि पदार्थान् अन्यथावे परीत्येन प्रति
पद्यते । अत आह तदावरणीयस्य कर्मणः क्षयादीत्यंतिकालतस्य मिथ्याज्ञानस्य यदावरणं तदभावात् मिथ्यादर्शनाभा
वः । नाम विरतिप्रमादकषायादर्शनावरणमोहक्षयात् । योगनिरोधकाले च योगनिमित्तो प्यपेति बंधहेतुः बंधहेत्वभावो
सति निर्जरणमपूर्वं चितस्य कर्मणः स्वकाले समये । सम्यग्दर्शनज्ञानावरणानां चोत्पत्तिः प्राग् निर्दिष्टानामुपलक्षयति
तत्त्वार्थश्रद्धानं सम्यग्दर्शनं । तन्निसर्गादधिगमाद्वेत्युक्ते च न पुनरपि भाष्यायेति । अथवा पर्वीतत्तत्पूर्वमुक्तं । एवं संवरं
संवरं इत्यादि । एवमुक्तेन प्रकारेण बंधहेत्वसंभव एव संवरस्तेन संवृतस्य स्थगितसकलाश्रवद्वारस्य महात्मनः । परमा २७८
ति ज्ञायमेपन्नस्य सम्यग्ध्यायमस्य सम्यक्क्रियानुष्ठायिनः व्यस्तस्य सयोगिकेवलिनस्य निरुद्धसकलयोगस्य च अनिवा

स्मात् पूर्वकर्मक्षयं च धीयमानं भवति । पूर्वोपचितस्य प्राग्बद्धस्य क्षयो गोक्तिस्तयोपुष्टानादिनिर्जराहेतुनिरास्तेति कात्स्नैक
र्मक्षय इत्यनर्थकं नवधारणीयं क्षयः तत्रोत्पत्ति कर्मक्षयात् समनंतरमेव सर्वद्रव्यपर्यायविषयमित्यनेनंतावदैश्वर्य
मिति सूचयति । परं प्रकृष्टमैश्वर्यं विभूतिः परमसाधारणं ईश्वरत्वं ऐश्वर्यं अनंतमपर्यवसानत्वादनुच्छेदित्वात् केवलम
सहायमित्यादि रहितं । ज्ञानं च दर्शनं च प्राप्य लब्ध्वा । शुद्धो धौतो अपनीतसकलकर्ममलः बुद्ध इति कर्त्तरि निष्ठा बुध्यते क
र्मकत्वात् । शुद्धविशुद्धवल्लोके प्रयोगदर्शनादकर्मकत्वं बुध्यत इति बुद्धो ज्ञानस्वभाव इत्यर्थः । केवलज्ञानेन सर्वज्ञानी
त इति सर्वज्ञः केवलदर्शनेन सर्वं पश्यतीति । सर्वदर्शी रागद्वेषमोहजिज्जिनः केवली केवलज्ञानदर्शनसंभवात्ततः
त्पन्नकेवलज्ञानः प्रतनूनि शुभानुभावानि शुभविपाकानि च प्रायश्चत्वारि कर्माण्यशेषाणि यस्य वेद्यायुर्नामगोत्राणि स
र्वायुषः कर्मणः संस्कारावशात्प्रतिकृत्य भवति । संस्कारस्तद्वशाद् विहरति भव्यजनकुमुदवनबोधनाय शीतरश्मिरिव क
दाचित् ग्रामादि विहरति निरन्तपिवा विविधं रजो हरतीति । ७ । ततोस्य विहरत उक्तेन विधिनायुष्ककर्म परिसमाप्तावितरा
ण्यपि त्रीणि कर्माणि क्षीयंते ततः कृत्स्नकर्मक्षयो मोक्षः कृत्स्नं सर्वं निरवशेषं ज्ञानावरणाद्यंतरायपर्यवसानमष्टविधमूल
प्रकृतिबाधं । उत्तरप्रकृतीनां तु षट्पंचाशदुत्तरं शतमेवमेतत्कृत्स्नं कर्म तस्य क्षयः । साट आत्मप्रदेशेभ्यः । अपगमः कर्मरा
शेर्मोक्ष आत्मनः । आत्मावस्थानमिति । कृत्स्नकर्मक्षयलक्षणो मोक्षो भवतीत्यादि भाष्यं । कृत्स्नक्षयो लक्षणं । यस्य मोक्षस्य कृ
त्स्नकर्मविमुक्ता आत्मा मुक्त इति लक्ष्यते । स एव मोक्षः सकलकर्मविमुक्तस्य ज्ञानदर्शनोपयोगलक्षणस्यात्मनः स्वात्मन्य
वस्थानं मोक्षो न पुनरात्माभाव एव । परिणामिनो निरन्वयनाशो न स्तु उपपत्तिदृष्टांतो परिणामित्वादेव ज्ञानात्यात्मन सो भाव
सर्वकर्मणामपगमः क्रमेण मुक्तिरिति दर्शयति । पूर्वं क्षीणानि चत्वारि कर्माणीति ततः केवलज्ञानोत्पत्तेः । प्राक् पूर्वं मोहनीयज्ञा
नदर्शनावरणांतरायाख्यानि चत्वारि घातिकर्माणि क्षीणानि ततः केवलज्ञानोत्पत्तिः । पश्चाद्वेदनीयनामगोत्रायुष्कक्षयो
भवतीति । केवलज्ञानोत्पादात् पश्चाद् वेदनीयादीनि चत्वारि कर्माणि यं प्रतिपद्यंते । नवधारणीयानि । तत्र का प्रकृतिः क्षपु
णस्मानि क्षीणेति । पूर्वेवनप्रदर्श्यते अविरतसम्यग्दृष्टिदेशप्रतिप्रमत्ताप्रमत्तस्थानानामन्यतमस्थाने मोहनीयप्रकृतयः
सप्त क्षीणा अनंतानुबंधनश्चत्वारः सम्यक् मिथ्यात्वतदुभयानि च । अतो अनिवृत्तिस्थाने मोहनीयप्रकृतयः अनयोर्द
शद्दर्शनावरणप्रकृत यश्च तिस्रः । क्रमेणानेन प्रत्याख्यानाः क्रोधादयश्चत्वारः प्रत्याख्यानावरणाः क्रोधादयश्चत्वारः नर
कगतिनरकगत्यानुपूर्वी तिर्यग्गतिः तिर्यग्गत्यानुपूर्वी एकद्वित्रिचतुरिंद्रियजातयः आतपउद्योतस्थावरसूक्ष्मसाधारणं च ।
निद्रानिद्रा प्रचलाप्रचला स्त्यानर्द्धि । नतोन पुंसकस्त्रीवेदा हास्यरत्यरतिशोकभयजुगुप्साः पुरुषवेदश्च संज्वलनक्रोधमानमायाइतिस

२८९

सूक्ष्मसंपरायस्थाने परमसमये संज्वलनलोभः क्षीणः ततः क्षीणकषायस्थाने निद्राप्रचले द्विचरमसमये क्षीणे चरमसमये
प्रकृतयश्चतुर्दश क्षीणाः ज्ञानदर्शनावरणविघ्नानि पंच चतुः पंच भेदानि। अयोगकेवलिनो द्विचरमसमये नामप्रकृतयः
पंचचत्वारिंशत् क्षीणाः तास्त्विमा देवगतिः औदारिकादिशरीरपंचकं। संस्थानषट्कं। वर्णगंधरसस्पर्शचतुष्टयं मनुष्यदेवगत्या
नुपूर्व्यौ। अगुरुलघु उपघातं। पराघातं। उच्छ्वासः प्रशस्ताविहायोगतिः अपर्याप्तं प्रत्येकं स्थिरं। अस्थिरं शुभं। अशुभं। दुर्भगं अप्रशस्तविहायोगतिः
सुस्वरं। दुःस्वरं। अनादेयं अयशः। अकीर्तिनिर्माणं बद्धिवर्द्धे अन्यतरवेदनीयं नीचैर्गोत्रं आदि क्षीणे तीर्थकरायोगकेवलिनश्च
रमसमये त्रयोदश क्षीणाः अन्यतरवेद्यं उच्चैर्गोत्रं मनुष्यायुः। नव च नामप्रकृतयः तद्यथा मनुष्यगतिपंचेंद्रियजातित्रस
बादरपर्याप्तं सुभगादेययशःकीर्तितीर्थकराख्याः। अतीर्थकरायोगकेवलिनस्तु चरमसमये एता एव द्वादश क्षीणाः ती
र्थकरनामवर्जाः। मनुष्यायुश्चैकमेव बद्धं। न शेषाणीत्येकमेवाप्यते। एवं तत्क्षयसमकालमेव सकलकर्मक्षयतुल्य
कालमेवौदारिकशरीरवियुक्तस्यास्य मनुष्यजन्मनः प्रहाणमुच्छेदः। वेधर्दित्वभावात् चोत्तरजन्मनो प्रादुर्भावः। एषावस्था
ति पूर्वजन्मनोच्छेद उत्तरजन्माप्रादुर्भावः केवलआत्मा ज्ञानादि उपयोगलक्षणः शुद्धः। इत्येषावस्थेति पूर्वजन्मनोच्छेदउत्त
रजन्माप्रादुर्भावः केवलआत्मा ज्ञानाद्युपयोगलक्षणः शुद्धः इत्येषावस्था कृत्स्नकर्मक्षयलक्षणो मोक्ष इत्याख्यायते
अवस्थायच्छन्नात्मानुच्छेदप्रतिपादनार्थमिति। ख। किं चान्यदित्य नेन तस्यामवस्थायां प्रश्नशेषमाशंकते। औपशमि
कक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च सूत्रं। जी[illegible]। जीवस्य तत्त्वा। तत् किं तस्यामवस्थायां
सकलमेव परिशाटयते उत कंचित् कीर्यते किंचिदारोप्य क्विचन परिशाटति किं विलोति। संदेहापनयनार्थमाह सूत्रकारः। औपशमि
का[illegible]रिणामिकादि भव्यत्वाभावाच्चान्यत्र केवलसम्यक्त्वकेवलज्ञानदर्शनसिद्धत्वेभ्यः। उ त्वे
पशमिनवउपशमिनवा निर्वृत्तः। औपशमिकः सम्यक्त्वादिर्येषां त इमे औपशमिकादयः। आदिग्रहणेन क्षायिकक्षायोपशमिकौदयिक
कपारिणामिका गृहीताः सेसूपलक्षणं भव्यत्वे। उपशमकादि भव्यत्वानि एषामभावः औपशमकादि भव्यत्वाभावस्तस्मादित्यौ
पशमिकाद्यभावाद्भव्यत्वाभावाच्च मुक्तात्मा भवति। किं सर्वेषामौपशमिकादीना[illegible]मित्युच्यते। अन्यत्र केवलसम्यक्त्वज्ञानद
र्शनसिद्धत्वेभ्यः शेषाभमसंति। औपशमिकक्षायोपशमिकौदयिकाः सर्वथा तस्य संत्येव क्षायिके तु भावे केवलसम्यक्त्वं मिथ्यार्थाः के क्षायिकसम्यक्त्व
वलज्ञानं केवलदर्शनं सिद्धत्वं च संभवति मुक्तात्मनि पारिणामिके तु भावे भव्यत्वमेव केवलसिद्धे न संभवति। तत्त्वौपशमि
कादिग्रहणादिभव्यत्वं संगृहीतमेव किमर्थं पुनर्भव्यत्वग्रहणं उच्यते पारिणामिकभावो भव्यत्वमेव केवलसिद्धे न समस्ति शेषाः
पारिणामिकाः प्रायेण संतीति ज्ञापनार्थं। अस्तित्वगुण[illegible]त्वानादित्वासंख्येयप्रदेशवचनित्स्वादयः संत्येव। एतदनुसारिया

तत्वार्थ टी०

२ - ष्यं। औपशमिकस्यादि। औपशमिकादयश्चत्वारो भावा ... भव्यत्ववर्जनेन निर्दिष्टाः एषामभावात् भव्यत्वाभावाच्च मोक्ष इ
न्यत्र केवलसम्यक्त्वादिभ्यः इत्युपपदलक्षणं पंचमीदर्शनमत्र करणात् इ। यदि केवलसम्यक्त्वं समस्तज्ञानावरणक्षयात्क्षा
यिकं केवलदर्शनं समस्तक्षयात् सिद्धत्वमित्येते क्षायिका भावाः यस्मात् सिद्धस्य मुक्तस्यापि भवंतीति। आत्मनो मुक्तान्याय
नमुक्तस्य समस्तकर्मभिः किं न त्वेवावतिष्ठते उतान्यत्र तिष्ठते उच्यते तदनंतरमूर्ध्वं गच्छत्यालोकांतात्। तदनंतरं कृत्स्नकर्मक्षयात्
परान्तर्भूत औपशमिकादिभव्यत्वाभावाबाधानंतरमिति। कृत्स्नकर्मक्षयानंतरं अनुसंततमेव मुक्तस्य ऊर्ध्वमेव गच्छतीति कि
यतीत्यपिमित्याह। आलोकांतात् ... कायसमुदायो लोकः तस्मांतो मस्तकः तत्र प्राग्भारा नामकाली ... नामक धवला
उत्तानकच्छत्राकृतिः। तस्याश्चोपरि योजने भवति लोकस्य मस्तकः ... उपरितनके षड्भागे त्रयस्त्रिंशद
त्तरमनुष्येशत्रिंशतिभिः धनुस्त्रिभागाधिके लोकांतरप्राप्ति वर्त्तते। आङ्गमर्यादायां प्रयोगः उदकांतादिति। यथा एवमालोकांतात्
जति। न ततः परमिति। तस्य च मुक्तात्मनो देहवियोगः सर्वात्मना तैजसकार्मणयोः क्षयः सिध्यमानगतिरिति तावत्प्रत्यवनङ्गमे
कशाल एवासीमा मध्वी लोकस्यमसिध्यति। तस्य गतिरितो गमनं मुक्तस्य सतः लोकांतरप्राप्ति लोकांते वस्थानं एतत्त्रितयमप्येक
समयेन परमनिरुद्धेन कालविशेषेण युगपद्भवति। गतिश्च समयांतरं प्रदेशांतरं वा स्पृशंती भवति। तस्याचिंत्यसामर्थ्या
दितस्सर्वं युगपद्भवति देहवियोगादि। किंचिदाह कर्मक्षयकालश्चादेहवियोगादि समकाल एव भवतीति। तद्यथेत्यादिना दृष्टां
तयति। प्रसिद्धेन दृष्टांतवस्तुना सिद्धस्य उत्पादादीनामेककालता साध्यते। प्रयोगवीर्यनिराय कृयोपशमात् कृयावचेष्टा
रूप परिणामः प्रयोगपरिणामः। आदियक्षणत्वात् भाविको वा परमाण्वादीनां गतिः परिणामस्तस्य मुक्तस्य तस्मात् तस्य गतिक
र्मणोगतिः क्रियाविशेषस्य कार्यद्वारेणोत्पत्तिकालः कार्यारंभप्रकारणविनाशश्च पर्यायांतरेण घटकादिकार्यारंभः पूर्व
पर्यायेण विनाशश्च दृष्टः सिद्धस्यापि कर्मक्षयदेहवियोगादयस्समकाला एकसमयेन भवंतीत्यर्थः। उत्पादव्ययगमस्ता
नवदिति सुज्ञानं। तत्रान्हेत्यादि सूत्रे। संबंधमाति प्रक्षीणकर्मणो हति रूपितनिरवशेषकर्मराशेर्निराश्रवस्य निरस्तका
यवाङ्मनोयोगस्य कथं केन प्रकारेण गतिर्लोकांतरप्राप्तिर्भवति। एवं मन्यते योगाभावात् सत्ता हानिः क्रियागनिर्धं क्रिया लोलो
कांतागमनमनुपपन्नमिति प्रश्नयति। अत्रोच्यते। यथागमनं समस्ति मुक्तात्मनः स्फुटीक्रियते। पूर्वप्रयोगादसंगत्वाद्बंधच्छेदात्त
थागतिपरिणामाच्च तद्गतिः उपरतकर्तृव्यापारात्। यथा कुलालचक्रं ... हस्तदंडचक्रसंयुक्तसंयोगात् हस्तेन दंड
संयुक्तः दंडेन चक्रसंयुक्तं संयोगः तस्मात् पुरुष ... यत्नतश्च पुरुषप्रयत्नात् आविद्धवेगितं प्रेरितं उपरतेऽपि पुरुषव्यापारा २
दिपूर्वप्रयोगात् हस्तादिव्यापारप्रेरणत्वात् भ्रमत्येव आसंस्कारपरिक्षयात् संस्कारेनावरतक्रियाप्रबंधः दृष्टांतेन दार्ष्टांतिक
मर्थसमीकुर्वन् ... नाह। एवं यः पूर्वमस्यादियोगनिरोधप्रभृतिमुपस्य यत्कर्मक्रियानेन कर्मणः प्रयोगो जनितात् सक्षीणोपि कर्म

णि अविच्छिन्नसंस्कारत्वात् योगाभावेपि गतिहेतुर्भवति तेन हेतुना क्रियते गतिरित्यर्थः। किंचान्यदिति द्वितीयं हेतुं तरमुन्यस
ते। असंगत्वादिति। संगस्खलनं तद्भावः संगत्वं स्खलितत्वमित्यर्थः। न संगत्वमसंगत्वमस्खलितत्वं। तस्मादसंगत्वात्। सिद्धस्योर्ध्वग
तिः। सिद्धान्हित्याभाविकत्वात् गतस्य ऊर्ध्वं कचित्स्खलनमासादयति। एतद्व्याख्यानाय आह पुद्गलानामित्यादि पूरणगलनाच्च पुद्गलाः
५ परमाण्वादयः जीवाश्च ज्ञानदर्शनोपयोगलक्षणाः एषां पुद्गलजीवानां गतिसत्त्वमुक्तं नान्येषां धर्माधर्माकाशद्रव्याणां। तत्र स्व
भावत एवाधोधस्तात् गौरवं भारिकत्वं परिणामविशेषः गौरवधर्मेषु येषां ते गौरवधर्माणः पुद्गला ऊर्ध्वगौरवधर्माणो जीवा इति।
जीवानामपि तादृशं गौरवं परिणामविशेषो लाघवं येषामिति। एवंविधं तेषां गौरवं विशिष्टं येनोर्ध्वं गच्छति एषां पुद्गलानां च स्वभा
वः। अतोन्यतिस्वाभाविकी गतिमवद्राय संगादिजनिता गतिर्भवति। संगः कर्मकृतं स्खलनं आदियक्षणाद् अभिघातप्रेरणादि पु
गमनकारणं पुजातिनियमेन जातिः पृथिव्यनिला नलव्यक्तिभेदेन भिन्ना पृथिवी च वायुश्चाग्निश्चाप्श्च तया नियमः क्रियतेऽन
पृथिवीत्वनियमेनाधोगतिर्लोष्टयो हि बादरः पृथिवीपरिणामः स सर्वो अधोगतिः एवं तिर्यग्गतिर्वायुरूर्ध्वगतिर्दहनः स्वजाति
नियमेनैवमेषामेता स्वाभाविक्योगतयो यानथासंगविनिर्मुक्तस्य कर्मकृतस्खलनरहितस्य ऊर्ध्वगौरवात् परिणामविशेषादूर्ध्व
मेव सिध्यमानगतिर्भवति संसारिणः सुरनरकादिगतिचतुष्टयवर्त्तिनः संसारे परिभ्रमंतः कर्मसंग कर्मजनितस्खलनादध
स्तिर्यगूर्ध्वं वा नियमेन गतिर्भवति संसारिणां। किंचान्यदिति युक्तं तरोपन्याससूत्रं बंधच्छेदादिति। बध्यते येन रज्वादिना स बंधः।
तस्य छेदः शस्त्रेण त्रोटयति त्रोटनं वा तथा च दृष्टं। यथा रज्वागाढमापीड्यापीड्य बद्धायाः कीचकविदलघटितायाः रज्जुबंधच्छेदा
दुपरितन उत्पत्ति गमनमूर्ध्वं दृष्टं वीजकोशबंधच्छेदाच्च वीजकोशः फलीफलं वा तस्याः सुबंधनं गाढसंपुटता सवितृकरजाल
शोषितायाः परिणतिकाले संपुटोद्भिदः छेदः ततश्च एरंडादिफलभेदे वीजानां गतिर्दृष्टा तानि त्रुटीयंडी यदूरे पतंति। तथा
कर्मबंधः फलकंडादस्थानीयस्तच्छेदान्निघटनाद्नंतरमेवोर्ध्वं सिध्यमानगतिरिति। किंचान्यदिति। द्वितीयं तार्थप्रसाधा
नाय हेत्वंतरमुपादत्ते। तथा गतिपरिणामाच्चेति। तथा तेन प्रकारेण सर्वकर्मविनिर्मुक्तस्यास्य गतिपरिणामो भवति विगतयो
गस्यापि वृत्तिः समुच्चयोऽयस्य पूर्वोक्तहेतुभ्यः। ऊर्ध्वगौरवात् पूर्वप्रयोगादिभ्यश्च गतिपरिणाम उत्पद्यते येन सिध्यमानगति
र्भवतीति स च गतिपरिणाम ऊर्ध्वमेव भवति नाधस्तिर्यग्वा पूर्वाविहितहेतु निरपेक्ष ऊर्ध्वगौरव प्रयोगपरिणामहितीअसंग य
योगं वा तरेलेत्यादि। तदा हगौरवप्रयोगपरिणामासंगयोगाभावादिति। तच्छेत्यादिना दृष्टांतमाह। अत्र स्वानुनोवस्थापूर्वि थी धुनो
कादिशोध्यंते गुणवद्भूमिभागारोपितमिति। वीजावस्थागुणवान् भूमिभागे पुष्पतः क्षीरमध्वतुरीयादिभिः सिक्तशोपितं तथा ते
नतकालेवर्षासु जातं ततश्च तस्मा वस्थाद्वीजोद्भिदादंकुरः प्रवालं किसलयं पर्ण जरठं ततः पुष्पं ततः फलं एषां वीजारोपणे

तत्त्वार्थ टी.
२८३

छेदादंकुरप्रवालपर्णपुष्पफलानां कालेषु स्वेषु विमानतश्चाप्रकालोन कृतः कृतस्त्व विमानितस्सेको दोहदश्च आदियद्गुणाद
स्थितिभूमं तस्या वपुंगुना दिपरिग्रहः एवमादिना पोषणकर्मणा परिणतं जरठीभूतं पक्वं काले परिपाकोन्नरकालच्छिन्नं शुष्क
मलीमसं नत निमज्जति न जलं तः प्रविशति सर्वेषां विशेषणानामिदं फलं निरूपद्रवं वाते नाप्लिष्टं अशुषिरमिति तदेव
वपुः गुर्वालाः कुलाप्रतिकायालेपैर्घननिविडं तरेवकुशिरष्टानिर्दृष्टी वष्टनोकालमालिप्तः तैतैन्य घनमृत्तिकालेपेन वेष्टनेन
वद्धर्दिनाजनितभागं गुर्वाकांगौरवं यस्य तदेवंविधमष्वप्रक्षिप्तं तलप्रतिष्ठं भवति उत्तरकालं यदा त्वस्याद्भिः संबंधतः क्लिन्नो
मृतिकालेपो अपगतो भवति तदा तत्संगविनिर्मुक्तं दर्भादिबंधनमृत्तिकामोक्षणसमनंतरमेवोर्द्धं गच्छत्या सलिलोर्द्ध तला
दित्येष दृष्टांतः संप्रति दार्ष्टांतिकं दर्शयति एवमष्टगौरवेणादिसंसारोदधौ भवसलिलेन वआ दारिकादिकाय निर्वर्तितवि
एवम सलिलंतत्र मग्नो भवासक्तः शरीरी अनियमेना धस्तिर्यगूर्ध्वं च गच्छति ततः सम्यग्दर्शनज्ञानाचरणसलिलाक्लिन्नं तत्प्र
णष्टविधकर्ममृत्तिकालेपऊर्द्धमेव गच्छत्यालोकांतात् दिक्स्या देतद्दिस्यादिना इदमाशंकते ऊर्द्धं गच्छत्यालोकान्तादिति कोनिय
मः स्याजाविकृयागत्या लोकांतादपि परेणगच्छतु गते निर्वारकस्याभावादिति अत्रोच्यते धर्मास्तिकायाभावादिति अस्त्येव नि
५ वारकं धर्मशब्दं तदपेक्ष्या कारणं स्वयमेव गतिपरिणतस्य जीवपुद्गलद्रव्यस्य धर्मद्रव्यमुपग्राहकं भवति मीनस्येव वारिद्रव्यं
तत्त्वगच्छतः कुवंबलाद्धारितियति एवं गतिपरिणतस्यात्मनः पुद्गलस्य वास्वत एवगत्युपग्रहकारी धर्मास्तिकायः कारणी
भवति स च लोकात्परतो नास्ति तस्मात् तदुपग्रहकारिणो भावात् परतो गतिर्नास्त्यस्य यथालाकान्तः अलाबुर्हि मृत्तिकापगमा
७ त्स्वयमेव गच्छन् उत्तमस्तकप्रतिष्ठं भवति न परतो यात्युपग्राहकजलद्रव्याभावात् ऊर्द्धमवश्च प्रयाति नाधो नापि तिर्यक् गुरु
त्वमेव तत्रेवानुश्रेणिगतिर्लोकांते च तिष्ठइति यत्र देशे स्थितो मुच्यते समस्तैः कर्मभिः तत्र या शरीरसोपरिरुद्धाश्रेणिर्नभसस्त
येवगत्वा लोकांते व तिष्ठति मुक्तात्मा निःक्रिय इति यथोक्तं धर्माभावाद्वा लोकेसप्रतिद्वत्येतेन लोकाग्रेन तु सर्वत्र स्थितत्वात् गमनोप
ग्रहधर्मो जीवानां पुद्गलानां च मुक्तोनंतं कालं गच्छतु परीति वाप्यनुपपन्नं मुक्तस्य संसृतिर्हि न युक्ता भ्रमणं हि संसारः संसारेण
स्तु विभ्रमणमस्ति तस्यततमहानन्नर्थः स्यात् अपि वा लोको जीवस्य च कृतकृत्यस्तथा भवतः तिष्ठति सर्वार्थान् सो संतं परं फल
थाविजानं भनास्ति भावविगमो न तु सर्वस्यापि भावस्या घातीनि तु कर्माणि भावजातानि गुणान्विहन्यंवति तदभावान्स्वाभाविक
गुणभावो भवति ननु सिद्धः यदि चस्य भावविगमो नेष्टः कस्मात् निष्क्रियो भवति इति वा चोद्ये प्रोक्तं यत्स्पंदः स्पष्टभावत्वं कार्याना
वाच पुनर्नस्पंदस्तस्य विद्यते यं तं प्रायोगिको प्ययुक्तः स्पंदः कर्मप्रयुक्तस्य विषये च तस्य नार्थः कृत्स्नकर्मविप्रमुक्तस्य बाधानां २८३
रागादीनां च तथा भावाद्वयोगहितत्वात् एतेन व्याख्यातो भाषणचंक्रमणचिंतनादीनां चेष्टानां सिद्धस्याभावो विसरीरत्वात्

नसा एवं तेषां मुक्तात्मनां पूर्वप्रयोगादिनियुक्तिः स्वाकृतिरिति वचनादित्याह क्षेत्रकालगतिलिंगतीर्थचारित्रप्रत्येकबुद्धबो
धितज्ञानावगाहनांतरसंख्याल्पबहुत्वतः साध्याः अथवा अमी सिद्धा परिनिष्ठितिदोषाः कार्मणशरीरोपशमकादिभावनिरु
पाध्याः किं पर्यायांतरेणाप्यपदेष्टुमशक्या एवा दोष्विदतीतव्यवहाराद्वदिनिर्द्धार्या इति उच्यते शक्यं तत एव सूत्रं पदेष्टुं यस्मानेष
पुष्पवजिरीर्थप्रि प्रत्युत्पन्नभूतार्थानुग्रहतंत्र यदि नयसामर्थ्यविशेषवशात् श्रुतज्ञानादिना तदर्द्धं ज्ञानदर्शनचरणप्रत्युतमा
र्थस्तत्त्वप्रतिपत्त्यर्थमाप्त्यद्दितमाद्यानेः क्षेत्रादिद्वारैरनुगमनीयाइत्याह क्षेत्रकालइत्यादि क्षेत्रादीनां अल्पबहुत्वांतानां द्वं
द्वः द्वंद्वसमासात्रि निर्वृत्ताव प्रातिपादिका तृतीयार्थे तसि सिद्धिविशेषस्यानेकाश्रयत्वात् साध्यवचनं क्षेत्रादीनि अल्पबहु
त्वांतानां द्वंद्वः ति [illegible] क्षेत्रादीनि यका दर्शापेक्षा
णि प्रतिपदं दर्शयति नाम्नेण तत्र क्षेत्रमाकाशं जीवपुद्गलानां निवासगतिविशेषण लोकाकाशपरिग्रहः तस्यापि लोकाका
शस्यैकदेशग्रहणं अर्द्धतृतीयद्वीपसमुद्रयमीषत्प्राग्भारोपलक्षितस्थगगनप्रदेशाइति कालोनादिरनंतस्तत्सोत्सर्पिण्य
वसर्पिणी वयाद्यागतिर्नरकादिभेदेन चतुर्विधा लिंगं स्त्रीपुंसकाख्यं अथवा द्रव्यलिंगभावलिंगमलिंगमिति तीर्थमिति ती
र्थकरत्वप्राप्य सिद्धा इत्यादिविकल्पं चारित्रं सामायिकादि मूलगुणोत्तरगुणभेदं प्रत्येकबुद्धबोधितस्वयंबुद्धसिद्धादिभेदः ज्ञा
नं मतिश्रुतादिभेदं अवगाहना मितिशरीरावगाहग्रहणं अंतरमेकसमयादिकं षण्मासांतिकं संख्येत्येकस्मिन्समये कि
यंतः सिद्ध्यंतीत्यादि अल्पबहुत्वमिति क्षेत्रसिद्धा येतः पातिनेदानां परस्परं विस्पंते एतानि द्वादशानुयोगद्वाराणि सिद्धा
स्य सिद्धत्वलाने कारकाणि भवंति एतदेवस्पष्टयति एभिः सिद्धसाध्य इति साध्यपर्यायानार्चष्टे अनुगमनीयो नुगम्योनुसर्त
व्य अनुमृत्यविनिव्यवस्थाप्यश्चिंत्यः व्यवस्थाप्यश्च व्याख्येयः कथनीयएकस्य भिन्नस्यार्थस्य वाचकाः सर्व एते साध्यादयो अत एव
पर्यायत्वं युगपद्प्रयोगात्तत्रास्मिन् सिद्धव्याख्याने कर्मण्ये द्वौ नयौ पूर्वभावप्रज्ञापनीयः प्रत्युत्पन्नभावप्रज्ञापनीयश्च नैगमादि
प्रसिद्धनयेस्स्वधनेभ्यो व्यतिरिक्तौ एतेषामेव वा नो युक्ति भेदेन ग्रहणं तत्र नैगमसंग्रहव्यवहारा सर्वकालार्थग्राहित्वात् पूर्वभाव
प्रज्ञापनीयशब्दवाच्याः ऋजुसूत्रशब्दसमभिरूढैवंभूतास्तु वर्तमानकालार्थप्रतिग्राहित्वात् प्रत्युत्पन्नभावप्रज्ञापनीयशब्दवा
च्याविज्ञेयाः आभ्यां नयाभ्यां क्षेत्रादयो व्याख्येयाः तत्र तस्मात् सोऽनुगमनुयोगविशेषो व्याख्याप्रकारः तद्यथेत्यादिना
त्रं निरूपयति कस्मिन् क्षेत्रे सिध्यंते तत्र प्रत्युत्पन्नभावप्रज्ञापनीयस्य सिद्धिक्षेत्रे सिध्यतीति तत्र सिद्धः प्रतिष्ठितो यस्तथावा
गमः इहं बोधिं चइत्वाणं तत्थ गंतूण सिज्झइ अप्राप्तं स्थानमुत्तैव सिद्धः कृत्स्नं शेषत्वात् पूर्वभावप्रज्ञापनीयस्य जन्मप्रतिप
न्नजातः कर्मभूमिषु पंचसु भरतेषु पंचसु ऐरावतेषु पंचसु विदेहेषु सिध्यति संहरणं प्रति मानुषक्षेत्रे सिध्यंति संहरणं द्विधा

स्वकृतं परकृतं वा। तत्र स्वकृतं चारणानां विद्याधराणां चाती विशिष्टस्थानाश्रयणं। परकृतं चारणविद्याधरदेवैः प्रत्यनीक
तयानुकंपया वा। क्षिप्यास्तत्र क्षेपणं संहरणं। तच्चन सर्वस्य किं तर्हि। संहरणं सम्यक्त्वी स्वेत दिवे केन दर्शयति। तत्र प्रमत्तसंयता
संयतासंयतास्त्वेशविरताः संक्रियंते केचिदाकुरतसम्यग्दृष्टिरपीति। अपीपुनर्म... जानुविना संक्रियंते। श्रमणसंयतीस्वर्थः
अपगतवेदः परिहारविशुद्धसंयत उत्कृष्टज्ञानतपा पुलाकसंयतः अप्रमत्तसंयतः चतुर्दशपूर्वधरः आहारकशरीरीति एते
समापिन संह्रियंते आगमोपि। समणीमवगयवेदं परिहारपुलागमप्पमत्तं च। चोद्दसपुव्विं आहारगं च ण विकोवि संहरइ
ऋजुसूत्रनयशब्दादयश्च त्रयशब्दसमभिरूढैवंभूताः प्रत्युत्पन्नभावप्रज्ञापनीयाः वर्तमानार्थग्राहिणः शेषानैगमादयो न
मात्रनया भावप्रज्ञापनीयाः अतीतं वर्तमानं चेति। कालस्त्रयो ऽप्युपगमादिति। काल इत्यत्रापि तदेव नयद्वयं कस्मिन्काले सि
ध्यतीति। इतरस्य तु जन्मनः संहरतश्चात्र जन्मतो ऽवसर्पिण्यादिषु त्रिष्वपि जातः सिध्यति। एवं तावदविशेषतः सामान्येनेत्यर्थः
विशेषस्तु अवसर्पिण्यां सुषमदुःखमायां। तृतीयकालविभागे संख्येयेषु वर्षेषु शेषेषु जातः सिध्यति। दुःखमसुखमायां सर्वस्यां
चतुर्थकालविभागे सर्वत्र सिध्यते। दुःषमसुषमायां जातो दुष्षमायां पंचमकालविभागे सिध्यति। न तु दुःषमायां जातः कश्चि
त्सिध्यतीति। अन्यत्रोत्सर्पिणी दुःखमायामपि जातो नैव सिध्यति। संहरणं प्रत्युत्संहरणं विवक्षितेयदा तदा सर्वकालेष्ववसर्पिण्या
दिषु पि सिध्यतीति। गतिद्वारे प्रत्युत्पन्नभावप्रज्ञापनीयस्य सिद्धगत्यां सिध्यति। नान्यस्यां गतौ शेषस्त्रिकालविषयानयात् द्विप्रका
रः अनंतरपश्चात्कृतगतिकश्चेति। एकांतराः पश्चात्कृतगतिर्यथानेनंतरपश्चात्कृतगतिकास्तेषां मनुष्यगत्यां सिध्यति। एकां
तरपश्चात्कृतगतिकाश्चेति। एकांतराः पश्चात्कृतागतयो येनतस्याथ विशेषेण सर्वगतिभ्यः सिध्यति एकमनुष्यगत्यां अंतरिता
पश्चात्कृता नरकगतयो येनेत्यर्थः। लिंगस्यादि तत्र प्रत्युत्पन्नभावप्रज्ञापनीयस्य अवेदो विगतलिंगः सिध्यते लिंगं वेद इत्येको
ऽर्थः प्रज्ञापनीयस्य तु अनंतरपश्चात्कृतगतिकस्य अनंतरपश्चात्कृतलिंगस्येत्यर्थः गतौ चतुर्विधायां नियमेन लिंगं लिंगे वा वस्था
विनीगतिरिति लिंगशब्देनोच्यते। अविनाभावात् यद्वानंतरं पुंलिंगं स्त्रीलिंगं नपुंसकलिंगं वा एकमेव एकांतरपश्चात्कृत
गतिकस्यापि। गतिशब्दो लिंगवाची एकेनानंतरेण लिंगेन पश्चात्कृतानि शेषलिंगानि... लिंगानि। येनतस्य त्रिभ्यो लिंगेभ्यः
सिध्यति। तीर्थमित्यत्र संतिविद्यते। तीर्थकरसिद्धाः। तीर्थकरनामकर्मानुभवपूर्वकाः सिद्धाः। तीर्थकरसिद्धाश्चेव तीर्थकरतीर्थे
तीर्थकरेण प्राक्प्रवर्तितं तीर्थं तस्मिन्सति पुनः स एव तीर्थस्य प्रवर्तयिता तीर्थकरः सिध्यति नो तीर्थकरसिद्धाः प्रत्येकबुद्धाः तेषु ती
र्थकरतीर्थे अतीर्थे अतीर्थकरसिद्धाः साधवः तीर्थकरतीर्थ एव। एवं क्रमेण प्रकारेण तीर्थकरी तीर्थसिद्धा अपि वाच्याः तीर्थका
रीतीर्थे तस्या तीर्थकरीसिध्यतीत्यादि सिद्धप्राभृते अमी विकल्पाः अस्ति तीर्थकरसिद्धा तित्थकरतित्थे नोतित्थसिद्धा। तित्थकरतित्थेतित्थसि

द्धा तित्थकरतित्थे तित्थसिद्धाउ। तित्थकरीसिद्धा तित्थकरातित्थे नोतित्थसिद्धा। तित्थकरीतित्थे। तित्थसिद्धा। तित्थकरीतित्थे। तित्थसिद्धा
उ। अत्र तत्वविदः प्रवचनाभिज्ञाः। लिंगे पुनरन्यो विकल्प उच्यते। ननु च पूर्वमेवोपन्यस्तनीयः स्यात्सत्यमेवं तथापि द्वितीयमिदमेकमाचार्य
स्त्रिप्रकारं लिंगं द्रव्यलिंगं भावलिंगं अलिंगमिति। तीर्थोपाधिकत्वात्। इतो त्रय एव विकल्पाः तत्र प्रत्युत्पन्नग्राहिणा नयस्य श्रु
धस्यालिंग एव सिध्यति। तदा तु द्रव्यलिंगं न संभवत्येव द्रव्यलिंगं त्रिविधं रजोहरणमुखवस्त्रिका चोलपट्टिकादिव लिंगं अन्यलिंगं
तापरिव्राजकादिवेषः। गृहलिंगं दीर्घकेशकच्छाबंधादि। तदेवं त्रिविधद्रव्यलिंगभाजः। कदाचित्सलिंगः कदाचिदलिंग इति भावलिंगं
श्रुतक्षायिकसम्यक्त्वचरणानि तत्र किंचिदनुयाति किंचिन्निवर्तते। श्रुतं नास्ति सिद्धे क्षायिकसम्यक्त्वं तु विद्यते। चरणमपि सामा
यिकादि आवर्तत एव पूर्वभावप्रज्ञापनीयस्य भावलिंगं प्रति श्रुतादिकं स्वलिंगं तत्रस्थः सिध्यति संदेहस्तु सर्वो भावलिंग प्राप्ता
सिध्यतीति नियमश्चारित्रमिति वर्तमानग्राहिणो नयस्य नो चारित्री नो अचारित्री सिध्यति नो शब्दः सर्वप्रतिषेधे। नास्तस्य चारित्रं
सामायिकादि नो अचारित्री द्वौ प्रतिषेधौ तत्र चारित्रे वगमयतः। किं तर्हि अचारित्री अचरन इत्यपि ऋजुनशकाले तस्मान्न विरतो नावि
रत इति। पूर्वभावप्रज्ञापनीयो द्विधा अनंतरस्य। पश्चात्कृतिः पश्चात्करणं यत्रासावनंतरपश्चात्कृतिको नयः अस्य तु यथाख्यातचा
रित्री सिध्यति व्यास्य व्यंजिते मक्रियापादिते स्पष्टीकृते विशेषिते। अव्यंजिते सामान्यमात्रे अविशेषितेव्यंजितान्यव्यंजिते त्रिच
तुःपंचचारित्रपश्चात्कृतः सिध्यति कानि त्रीणि चारित्राणि चत्वारि पंच वा अतो व्युच्यते सामायिकं सूक्ष्मसंपरायाय यथाख्यातं च अ
थवा छेदोपस्थानं सूक्ष्मसंपरायं यथाख्यातमिति त्रिचारित्रस्य विकल्पद्वयं चतुश्चारित्रस्यापि विकल्पद्वयमेव सुज्ञानं पंचचारि
त्रस्यैकरूप एव विकल्पः प्रत्येकबुद्धबोधितः इति चतुर्थं भाष्यायते तीर्थकरः प्रत्येकबुद्धिः परबोधकः स्विष्टकारी वेतिलक्षणेनाधिकार
र्ययति। अस्ति स्वयंबुद्धसिद्धः स्वयमेव बुद्धो नान्येन बोधित इति द्विविधः। तीर्थकरो ऽतीर्थकरनामकर्मोदयभाक्तथापरः प्रत्येक
बुद्धसिद्धः प्रत्येकमेवमात्मानं प्रति केनचिन्निमित्तेन संजातिस्मरणवल्कलचीरीति प्रत्ययः करकंड्वादयश्च प्रत्येकबुद्धाः बुद्ध
बोधितो पि द्विविधः। बुद्धेन ज्ञानसिद्धांतेन विदितसंसारस्वभावेन बोधितो बुद्धबोधितः परबोधकः परस्मायुपदेशं ददाति अ
परस्तु नः स्वस्मै इष्टं हितं स्वेष्टं तत्करणशीलः स्विष्टकारी। तपरस्मायुपदिशति किंचिदिति। चतुर्थो विकल्पः एते चत्वारोपि वि
कल्पा विकल्पद्वयमनुप्रविशंतीति। तत्र स्वयंबुद्धश्चेति तीर्थकरः। प्रत्येकबुद्धः स्वबुद्धबोधितसिद्धः परबोधकः स्विष्टकारी चेति। ज्ञान
मित्यत्रापि तावेव द्वौ नयौ। तत्र वर्तमानकालग्राहिणः केवलज्ञानवान् सिध्यति। इतरो पि द्विविधः। तत्रानंतरं कदाचित्किं वित्ता
नं न वति। परंपरपश्चात्कृतिकस्य अव्यंजिते चेति। चत्वारो विकल्पाः तत्राव्यंजिते द्वे त्रीणि चत्वारि वा ज्ञानानि पश्चात्कृतानि व्यं
जिते मतिश्रुतवान् मतिश्रुतावधिमान् मतिश्रुतमनःपर्यायवान् मतिश्रुतावधिमनःपर्यायवान् सिध्यतीति अवगाहनेति

आत्मनः शरीरे वगाहोनुप्रदेशः संकोचविकासधर्मत्वादात्मनः शरीरं किंप्रमाणमिति चिंत्यते वगाहनाचरमशरीरे सावगाहनादि
धा उत्कृष्टा जघन्या च तत्रोत्कृष्टा पंचधनुःशतानि धनुःपृथक्त्वेनाभ्यधिकानि द्विरत्नानवमःपृथक्त्वसंज्ञा च एतेषां कृष्टं देहमानम
रुदेविप्रभृतीनां संभवति तीर्थकराणां पंचैव धनुःशतान्युत्कृष्टा जघन्या च सप्तहस्तानां तीर्थकराणामेव अंगुलपृथक्त्वेनासामा
न्येन तु जघन्या द्विहस्तानां वामनकूर्मकुत्तादीनामिति तत्र पूर्वभावप्रज्ञापनीयस्य एतास्वेवावगाहनासु सिध्यते प्रत्युत्पन्नभा
वप्रज्ञापनायेतु एतेष्वेवावगाहनासु यथास्वं पंचधनुःशतादिकासु त्रिभागहीनासु सिध्यतीति अंतरमिति सिध्यतां जीवाना
मंतरमनंतरं च तत्रांतरमेको वर्त्तमानसमये सिद्धस्ततोन्यः कियता कालेन सेत्स्यतीति सिद्धिगमनशून्यः कालोंतरमंतरा
मित्यर्थः अनंतरं निरंतरमव्यवच्छेदोनुसंततमित्यर्थः तत्रानंतर्येण जघन्यतः सिध्यंति द्वौ समयौ उत्कृष्टेनाष्टौ समयानित
तःपरं व्यवच्छेदः अंतरं तु जघन्येनैकसमयमुत्कृष्टेन षण्मासाः सिध्यंतो व्यवच्छिद्यंते व्यवच्छेदः कदाचिदेकस्मिन्समये द्वयो
स्त्रिषु चेत्यादि यावत्षण्मासा इति संख्येति एकस्मिन् समये कति सिध्यंति जघन्यत एकः सिध्यते उत्कृष्टेनाष्टोत्तरं शतमिति
अल्पबहुत्वमेषामित्यादि क्षेत्रादीनां संख्यातानामेकादशानामल्पबहुत्वं चिंत्यते जन्मतः संहरणतश्चेति जन्मतः पंचद
शसु कर्मभूमिषु अकर्मभूमयस्त्रिंशत् हैमवताद्याः तत्र संहरणं कर्मभूमिष्वकर्मभूमिषु वा तत्र सर्वस्तोकाः संहरणतो
काः संहरणसिद्धाः अत एवासंख्येयगुणा जन्मतः सिद्धाः संहरणं द्विविधमित्यादिनागतार्थं समतलाद्भूभागान्नवयोजनशा
तान्यारुह्य ततः पर्यूर्ध्वलोकः अधोलोकोपि नवयोजनशतान्यवगाह्य परतः अष्टादशयोजनशतपरिमाणो मध्ये तिर्यग्लोकः
नाच्छेषु पतितसिद्धं एवं क्षेत्रगतमल्पबहुत्वमभिधायिकालकृतमल्पबहुत्वमनेन कालस्त्रिविधो विभागो भवा
तीत्यादि सुज्ञानमेव नाख्येयं गतावल्पबहुत्वं चिंत्यते तिर्यग्योन्यनंतरगतिसिद्धाः तिर्यग्योनेस्सकाशमनुष्यगतौ सिद्धास्तथा
मनुष्यगतेरेकेवोह्य मनुष्येभ्यस्संख्येयते सिद्धाः एवं शेषेष्वपि वाच्यं लिंगमिति स्त्रियादिकं नपुंसकसिद्धाः स्तोकाः स्त्रीसिद्धाः संख्ये
यगुणा इति तीर्थमित्यत्राल्पबहुत्वे चिंता तीर्थकरतीर्थे नोतीर्थकरसिद्धा अतीर्थकराः संततः सिद्धास्तीर्थकरसिद्धेभ्यः संख्येयगु
णास्तेन पुंसकाद्योपि सर्वे संख्येयगुणाः चारित्रमित्यत्रापि तावद्वयोर्नयोश्चतुश्चारित्रसिद्धेभ्यो विकल्पो त्रिचारित्रसिद्धा विशेषे
भ सर्वत्र संख्येयगुणत्वं प्रत्येकबुद्धबोधितद्वयस्तत्र सर्वत्र स्तोकाः प्रत्येकबुद्धसिद्धाः सर्वत्रिसंख्येयगुणत्वं ज्ञानमित्यत्रापि सर्वत्रसं
ख्येयगुणत्वं अवगाहनेत्यत्र उत्कृष्टावगाहनासिद्धाः असंख्येयगुणाः यावसंख्येयगुणा विशेषाधिका विति अंतरमित्यत्राष्टसु स २८३
मयेषु नैरंतर्येण सिद्धाः सर्वेपि संख्येयगुणाः सांतरेष्वपीत्यादि एकसमयांतरसिद्धाः संख्येयगुणाः यवमध्यांतरे संख्येयगुणाः
अधस्तात्यवमध्यांतरे संख्येयगुणाः संख्येत्यत्राष्टोत्तरशतसिद्धाः सर्वस्तोकाः विपरीतक्रमाविति सप्तोत्तरशतसिद्धाः अ

नंतगुणाः एवं विपरीतहान्या यावत्पंचाशदिति अनंतगुणाः विपरीतहानिरियर्थ तात्पंचाशादर्शयति सर्वस्तोकाः अनंतगुणहानिसिद्धाः अ
संख्येयगुणहानिसिद्धाः अनंतगुणाः संख्येयगुणहानिसिद्धाः संख्येयगुणा इति एवमित्यादिना मंदबुद्ध्यनुग्रहार्थं सकलमेव तत्त्वार्थ
शास्त्रार्थं समासतः कथयति विशुद्धं सम्यग्दर्शनमवाप्य तस्य विशेषणानि निसर्गाधिगमादीनि ज्ञानं च विशुद्धमधिगम्य सम्यग्द
र्शनोपलंभात् मिथ्यादर्शनभाविनमज्ञानमेव नियमेनापि मिथ्यादृष्टेः सम्यक्त्वलाभे तु विशुद्धं ज्ञानं निक्षेपो नामादिः प्रमाणे प्रत्यक्षप
रोक्षे नयाः नैगमादयः तथा निर्देशस्वामित्वादिभिः सत्संख्याक्षेत्रादिभिश्च जीवानां पारिणामिकौदयिकौ भावास्तेषां स्वरूपं विदित्वा
धर्माधर्मादीनामनादिमतां च पारिणामिकादीनां घनशरीरादीनामुत्पत्तिस्थितिविनाशावतो मनुष्यद्वयकारस्तकृतप्रत्यय
पश्चान्तरस्तत्त्वागमः ततस्तत्त्वो विरक्तः संसारिके सो भावे सोपि तत्र गुणानुष्ठानात् फलदर्शनाच्चेति निर्वाणमेव फलं तस्मात्सो
पन्नार्थमभिवर्धितश्रद्धासंवेगः पंचानां व्रतानां भावनाई यसमित्यादय स्तानिर्ज्जवितात्मा अनित्याद्यनुप्रेक्षाभिः स्थिरीकृतात्मा
अनभिष्वंगेन कथिदा बद्धस्नेहः संवृतत्वादिनिर्मयगता जिनवकर्मोपचयः कर्मणं भावनाभावतः सम्यग्दृष्ट्यादिगुणस्थानानां के
वलिपर्यंतानामसंख्येयगुणोत्कर्षप्राप्त्या पूर्वोपचितकर्मनिर्जरणात् सामायिकाद्युपलंभात् पुलाकादिस्थानानामेव्यपेतार्त्ती
रौद्रध्यानः धर्मध्यानविजयात्समासादवाप्ता यच्छुक्लध्यानद्वयस्य नानाविधा लब्धयः प्रयुक्तो खल्लपादावयवपरामर्शमात्रेणे
व सर्वरोगापनयनसामर्थ्यमामर्शौषधित्वं निदीप्तः मूत्रपुरीषावयवसंपर्कात् शरीरेनैरुज्यं विप्रुडौषधित्वं तथा सर्वएव
तदीयावयवाः याद्रःखल्लानामौषधीभवंतीति सर्वौषधित्वं अभिव्याहारसिद्धिर्वाक्पटुत्वेनैव शापदानसामर्थ्यमनुग्रहणं सामर्थ्य
वाः ईशित्वं सर्वभूतेष्वैश्वर्यं वशित्वं सर्वभूतानि वशवर्त्तीनि तथा अवधिज्ञानमनेकरूपं वैक्रियशरीरकरणं तदेव दर्शयता
णिमादिविशिष्टं जंघाचारणत्वमग्निशिखाधूमायपि निश्रित्य आकाशे गच्छेत् मर्कटकतंतु कोकिलककोशिकातंतुः अपरं विद्य
या तिवारणत्वमिति निश्रित्य एव विश्वत्वात् भूमौ विवन्योमि गच्छेत् तथा च शकुनिर्वियति प्रडीनमुपरिष्टाद्गमनमवडीनमधस्तात्गमनं
करोति एवमसावपि कुर्यात् गच्छन् पर्वतनितम्बादिभिरप्रतिहन्यते इत्यप्रतिघातित्वं अंतर्धानमदृश्यत्वं युगपदनेकरूपधा
श्री रणं कामरूपित्वं निःश्रीतेजसामीकरणमाद्य तेजोनिसर्गः सर्वशक्तिर्मतिज्ञानविशुद्धिप्रकर्षाद्विषयाणां रूपादीनां देशप्र
माणनियमात् स्पर्शनेनापि ग्रहणं कुर्यात् युगपदनेकविषयग्रहणं संभिन्नज्ञानत्वं आदिग्रहणादिंद्रियव्यापारासेनापि विषय
ग्रहणसामर्थ्यं मानसं मनोव्यापारजातं कोष्ठबुद्धित्वं यत्किंचित्तदवाक्याद्यादिष्टं हीतं तत्र कदाचिन्नश्यतीति कोष्ठप्रक्षिप्तध
न्यवत् बीजबुद्धित्वं स्वल्पमपि दर्शितं वस्तु अनेकप्रकारेण गमयति तथा पदैः प्रदर्शितेन प्रकरणेनोद्देशकादिना सर्वम
र्थं ग्रंथं चानुधावति परचित्तं जानाति अभिलषितमर्थं प्राप्नोत्येवं अनिष्टं च नैवाप्नोति एवमादयोतिशयाः प्रज्ञास्या भावादपरिमि
तास्तस्य तस्य भवस्थास्याः प्रादुर्भवंतीति वाचिकमप्यतिशयवत्त्वं तस्य क्षीरास्रवित्वं तदीयवचनं क्षीरमिवास्वादनेनैव

मध्याश्चवित्वं।विद्वत्संसत्स्वप्यपराजितत्वं।वादित्वं सर्वेषां शुश्रूषापन्नपरिषदि नतीकोद्भूतार्थज्ञत्वं सर्वानुसत्वानुबुधिकानवबोध
यतीति।सर्वसत्वावबोधकं।आदियद्गणादिद्धरसाश्रविताद्ियद्गणं।तथाविद्याधरत्वं महाविद्याः सर्वा एवतस्य नरास्य यन्मेवोप
तिष्ठंते।आशीविषत्वं कर्मजातिभेदानेकप्रकारं भिन्नाकुर्वन्त्यैतेकिंचिन्न्यूनानुद्धाणि चतुर्दश।पूर्वाणि संपूर्णानि वातिद्वारलब्धान
तीत्येत्यादि।निवृत्तिज्ञायेत्यनंतरक्रमानुप्रजातलायस्य मोहक्षपक परिणामावस्थस्येति।विरतसम्यग्दृष्ट्यादिस्थानवर्तिनो।
मोहक्षपणाभिमुखस्य श्रेण्यानिरवशेषमोहक्षये सति ज्ञानावरणादिप्रहाणे च संसारबीजबंधनं मोहज्ञानावरणादि तेनवि
मुक्तः केवली भवति।ततः फलबंधनं वेदनीयादिचतुष्कं तन्मोहक्षयेपि क्षीणे नापि वेदनीयादिना।अतो पफलबंधनेन विमु
क्तो।आनाम्भिनिदग्धपूर्वोपात्तकर्मेधनो निरिंधनवद्वाग्निः पूर्वोपात्तो भवः औदारिकादिकायसादियोगादुत्तरस्य च कायस्य देह
जावात्संसारे पुनरप्रादुर्भावात्।परस्माद्दुपगतः कारणापेक्षं संसारसुखमतीत्यात्यंतिकं साद्यपर्यवसानमैकांतिकं एकां
तेनैव भवति निर्वृत्तिं चिन भवती सर्वक्षः निरुपममितिना किंचिन्नोपमानं तत्सदृशमिति निरतिशयमिति।नास्याति
शयः प्रकर्षापकर्षलक्षणो विद्यते सर्वमुक्तानां तुल्यत्वात्।नित्यमिति ध्रुवाक्षयस्य अविचालिनेवलि सुषमवाप्नोतीति।सत्
कारार्हः।सततं विरुद्धको निर्नयोवि निर्द्वंद्वो नीरजा वितनुः संसाराग्निनिर्वापद्वंद्वं परमसौख्य
मलि लेननिर्वातिस्वात्मसंयोगतजातिजरामरणरोगाः आबाधाभावात्समस्तक्षत्वाद्वा भवतीपरमसुखी।आबाधाभावो सुखस्व
रूपत्वमनंतसुखं।अनुपममप्रमेयमक्षयमनघं शिवमजरमरुजमभयदं।एकांतिकमत्याबाधं सुखं हेतुं।त्रिषष्टिकाले
षुकरत्वा नियमितिर्यङ्मनुष्यदेवानां।सर्वाणिनानिनसमानि तस्य नात्रासुखेनापि।अतानि हि रागोत्याक्षयाबाधा पूर्वकालि
वसुखानि।नहास्तिरागमपविघ्नतत्र किं विरुद्धमपक्षं।एवं क्षायिककवीर्यसिद्धत्वदर्शनज्ञानैः।आत्यंतिकैः समुक्तो निर्द्वंद्वो
नापि चसुखेनः।आसे प्रत्येना भवशास्त्रार्थलोकैरुपसंहरवि दिवद्धसुखदं भवतीति।एवमित्यादि उक्ततीत्यान्याजीवादीनि
तत्वानितत्सरिज्ञानादिरक्षणविषयक्षयविरतस्य रुद्रामात्मवतः ज्ञानित्यस्य बाहृचादिभिन्नाया मिनवकर्मसंततौ कर्मसंतानि
पूर्वोपादिशक्तं न कर्मक्षपयत तपोनुष्ठानादिभिः क्षयतुभिः संसारतरोबीजं समस्तामवपोहनीयं प्रदीयते।क्षपकश्रेण्यंतत
इत्यादि अंतरायेज्ञानदर्शनावरणबोध्यहीणमोयुगपत् अशेषतः गर्भसंबाधिमित्यादिमस्तकस्थसूच्यांधनायां सर्वोत्मनाविनायमुखेति
स्थकलस्याज नरुः एवं मोहनीये क्षीणे शेषं कर्मक्षयमेति सर्वं।तत इत्यादि।किंभूतसकलसंघातिकलसंघानि कर्मायथाख्यातसं
यममनुप्राप्तः बीजबंधनेनमोहनीयादिविमुक्त।स्नातकोनिर्मलापगमात्बुद्धः केवलज्ञानावाप्तेर्निरामयो निर्गताशेषरोगनिदानः
केवली भवति।कृत्स्नेत्यादि।सकलकर्मकलंकनिर्मुक्तः ऊर्ध्वमिव निर्वाणमधिगच्छति।निरुत्तमसुखानमनुपचारोनिर्वाणं।अथ
वा निर्वाणं।निर्वृतत्वं सिद्धत्वं।अहिंसपादंबंधनो वर्त्तिरिव निरुद्धकाष्ठोपादानसंततिः दग्धेंधनाग्नि जैसे नस्य सा कृतेनोक्त।

स्यप्रादुर्भाव एवं कर्मबीजे दग्धे संसारांकुरस्याप्रादुर्भावः।तदनंतरेत्यादि।सकलकर्मक्षयसमनंतरमालोकांतादूर्ध्वं गच्छति।क
थमुक्तस्य गतिरित्याशंक्याभिदधाह।पूर्वप्रयोगादसंगत्वाद्बंधच्छेदादूर्ध्वगौरवाद्गतिरस्य भवति सिद्धा।पूर्वप्रयोगस्योदाहरणानिर
र्दयति।१०।कुलालेत्यादि।पूर्वप्रयोगात्कर्मक्रिया।यथा कुलालचक्रादिषु तथा सिद्धगतिः स्मृता।११।मृत्ते इत्यादि।अलाबुनोक्त
मज्जनं दृष्टं।मृल्लेपसंगनिर्मोक्षात्।एवं कर्माष्टकसंगत्यागात्सिद्धगतिसिद्धा।११।एरंडेत्यादि।आघ्रपादबीजबंधनच्छेदाद्यथाबंध
नविदारमेरंडबंधनच्छेदाद्गतिर्दृष्टा मिंजाकाष्टये एवं तथा एवं कर्मबंधविच्छेदात्सिद्धस्य गतिः।१२ ऊर्ध्वमित्यादि।ऊर्ध्वगमनमेवमौ
रवं धर्मः स्वभावो जीवानां पुद्गलानामधोगमनधर्माणः इति सर्वज्ञवचनं।१३ यथेत्यादि यथाक्रममधोगमनादि लोष्टानां वीनयो
गतयः स्वभावादेव जायंते।तथोर्ध्वगतिरात्मनां।१४ अतस्त्वित्यादि।अन्यथाकाराद्य थागतिवैकृत्यं यद्भवति गतिविकारक
पात्कर्मणः क्रियायाः प्रतिघातादिभिः प्रादेः।प्रयोगाद्वपुरुषेच्छानुविधानात्प्रदिष्यते सांधौ।१५ अध इत्यादि सर्वतोगतिर्जी
वानामधस्तिर्यगूर्ध्वं च कर्मजागतिः क्षीणकर्मणां हि मे ब्रातिस्तदूर्ध्वमेवा नाविकीगति कर्म येषां गतिः।१६ द्रव्यस्येत्यादि।द्रव्य
परमाणवादेः कर्मणः क्रियायाः यथोत्पत्तिरारंभो गतिरभ्युपसंयुगप न घातिद्धस्य गतिर्मोक्षभवक्षयाः।गतिर्मुक्तिः।मोक्षस्यात्मस्य
स्थानं भवक्षयो जन्मक्षयं।संसारक्षयो वेति।१७।उत्पत्तिरित्यादि प्रकाशतमसोर्यथा युगपदुत्पत्तिविनाशौ यस्मिन्काले प्रका
शउत्पद्यते।तस्मिन्नेव काले तमसो विनाश इति।युगपदेव निर्वाणे कर्मक्षया चैक एव।कालः तथा साज्ञापुक्तं।सत
तो बंधनमोक्षादूर्ध्वजीवः प्रवेगितो यानि।नचैरंडबीजं धनमुक्तं व्रजत्यूर्ध्वं।संगमुक्तालघुरात्मा भवत्वा समुत्पतत्यूर्ध्वं नभोगत
लेपालाबुसदृशानिजनिमग्नापि ध्यानेन तथात्मा प्रयोजितो येन सव्रजत्यूर्ध्वं तिष्ठामुरपिनशक्तः।प्रवेगितोनत्ततर स्था
तुं।अपि वाग्निरिवगमनं स्वाभाविकमूर्ध्वमात्मनस्तस्य।आत्मा शिखैवाग्नि गतिरस्याकर्मानिजवशाद्धि स्ववशस्यानभिसंबंधश्च
तस्य न विग्रहागतिर्भवति।भवति हि विग्रहगतिः कर्मवशस्यार्थिनश्चेह।अपि चानुश्रेणिगतिर्जीवानां चैवपुद्गलानां चस्वाभा
विकी भवति येनतेन विग्रहा मिद्धस्य सिद्धस्य गतिरपुक्ताश्चवशात्वानिः प्रयोजनत्वाद्।नो सिद्धता चयुक्ता कर्मविमुक्तस्य निःपा
तनः १ बंधविमोक्षात्संगत्याग्पूर्वप्रयोगतो वापि नतुग्छतो सवसंतानवयुक्तो नीयते विवसो।८ इत्येषां विप्रलापोस्य गतो।
नांतरास्ति यत्कालः सस्मात् सो नरा वस्तायां सानि द्विरतेरीवा।९ सोस्य ऋष्यादिगत्वानंतरमेव समये जगच्छिखरं अवगाह
तेनरात्रे न चास्ति नतु नो व्रजत्काले।१० सिद्धं निगत्वा लोकान्तसिद्धिक्षेत्रे पदापदेहमिह।नह्यंतरास्ति सिद्धिरस्तामुक्तस्य।।
सवशस्यानभिसंबंधे कृत्यस्य वयथाव्य भावेन।तस्मापयोगतः सत्यागति।सास्त्वविना।१२ अथयस्याः पृथिव्या उपरिमुक्ता
नामवस्थानं साकिंस्वरूपेत्याह।१८ तन्वीत्यादि।मध्ययोजनाष्टक बहला प्रदेशपरिहाण्यामापर्यंतपरिमक्षिकापत्रात्तनुतराप
र्यते तितन्वी मनोज्ञेत्यत्यंतरुचिराक्षरविरि छ्यं धौतगुणवद्धिः ऋष्यविकायिके निर्विशेषितागुणाः भरामासनशीला प्राग्भारेति

तत्त्वार्थटी.
२८९

नामतस्याः सा च लोकमूर्द्धनि व्यवस्थिता ॥ १९ ॥ लोके इत्यादि । तिर्यग्लोको द्वितीयाद्वीपा मानुषोत्तरमहीधरपरिक्षिप्ताः ॥ तत्तुल्येवि-
कं जायं च चत्वारिंशद्योजनलक्षाविस्तारेत्यर्थः ॥ उत्तानीकृतसितछत्राकृतिः शुभरूपा ... तिलका शुभा । तस्याः क्षितेरुपरि लो-
कांतस्तत्र सिद्धानामवस्थानं ॥ २० ॥ तदात्मेत्यादि । सम्यक्त्वमात्मभावो येषां ते तदात्मानः । तद्भावः तदात्मत्वं । तस्मात् केवलज्ञानदर्श-
नभावात् सद्वेद्योपयुक्ताः क्षायिकसम्यक्त्वसिद्धत्वावस्थाः । द्वित्वभावावधिः क्रियाः क्रियापरिणामं प्रति न किंचित्तेषामस्ति
निमित्तमिति ॥ २१ ॥ ततोप्यूर्द्ध्वमित्यादि । लोकांतात्परतोपि गतिस्तेषां कस्मान्न भवतीति चेत् । गतेर्हेतुर्धर्मास्तिकायः परप्रधान-
मपेक्षाकारणं । तदभावान्न परतो गतिः ॥ २२ ॥ संसारेत्यादि । संसारविषयमतीतं मुक्तानां सुखमव्ययत्वादिगुणमव्याबाधं परमं प्र-
कृष्टं परमर्षिभिस्तीर्थकरादिभिरभिहितं ॥ २३ ॥ स्यादेतदित्यादि । नष्टाष्टकर्म्मणो विगतयोगत्रयस्य कथम् [illegible] सुखसंभव
इत्यत्रोच्यते ॥ २४ ॥ लोके इत्यादि । प्रतीतिं दर्शयति । सुखे वा विषयशब्दादिः तथा दुःखाभावे दनायार्थनावे कर्मविपाके च सद्वेद-
नीयादिके तथा सकलकर्मक्षयलक्षणे च मोक्षः ॥ २५ ॥ सुखो वह्निरित्यादि । उदाहरणनियमात् क्रमं दर्शयति ॥ २६ ॥ पुण्यकर्म-
त्यादि । गतार्थः चैव श्लोकः ॥ २७ ॥ सुप्तवदित्यादि । शोभनेन स्वापेन सुखनिद्रया सुप्तवदित्येतत् । निरर्थकं तदेतद्युक्तं योगवत्त्वात् क्रि-
यावत्त्वात् तथा सुखानुशयाद् दुःखानुशयः । प्रकर्षापकर्षवत्वं ॥ २८ ॥ श्रमेत्यादि । श्रमो खेदः । क्लमो ग्लानिः । मदो मद्यपानादिजनितः व्याधिर्ज्वरा-
दिः मदनः कामासेवनं एभ्यः श्रमादिभ्यः सुप्तत्वस्य संभवात् । रत्यरतिभयशोकादिको मोहो दर्शनमोहश्च सुप्तत्वे संभवः दर्शनं दर्शना-
वरणकर्मणस्य विपाकोदयात् सुप्तत्वं सुप्तत्वमिति न चैते नानिकारणानि मुक्तानां संभवंति ॥ २९ ॥ लोके इत्यादि । मोक्षस्य सदृशोर्थः
सकलेपि लोके न कश्चिदस्ति । ततोनुपमं न तावत् ॥ लिंगेत्यादिना अनुमानं तत्र क्रमते सादृश्याभावात् सादृश्यार्थं लिंगं नास्ति । मोक्षसुख-
स्यानायत्तमानस्य मुक्तिसुखं गोचरीभवति । यस्मात्तत्प्रमाणं लिंगप्रसिद्धेः कारणात् । पक्षधर्मान्वयव्यतिरेकैव लिंगं न चास्ति ता-
दृशो मोक्षसुखप्रतिपत्तावित्यतोनाप्यनुमेयं प्रत्यक्षमित्याह । अर्हतां सर्वज्ञानामेव तत्प्रत्यक्षं प्रत्यक्षीकृतं चैतेषां यथावद्ज्ञापितं व्यपे-
तरागद्वेषमोहैः अर्हद्यवाक्ये । सर्वज्ञैरेव तदाख्याते । अतः सर्वज्ञप्रणीतागमप्रामाण्यात्तदस्तीति । गृह्यते । प्रज्ञासामर्थ्यान्न च परस्य
परीक्षया आगमव्यतिरिक्ते प्रत्यक्षस्य प्रत्यक्षादिभिः परीक्ष्यमाणं न जाड्यवलमत इति ॥ ३० ॥ एवमव्याबाधं शाश्वतं स्वाभाविकं मुक्ति-
सुखमनुभवति । क्षपितसकलकर्मजालो यः पुनरक्षमादुष्षमकालं संसारमवेक्ष्य तन्निःसरणकृतप्रयत्नः सम्यग्दर्शनज्ञानच-
रणसंपन्नो निरूर्म्मितांबुधिर्घटमानो मोक्षार्थं कृतोत्साहो दुष्षमाकालदोषात् परियेलवकीलिकासृगार्त्तसंहननदोषादनेका-
पायत्वादायुर्दीर्घत्वाच्छक्तिरतीवल्लोकवीर्यः कर्म्मणां च मोहनीयादीनां मतिगुरुत्वात् इत्यतीत्यानुभावात् अकृतार्थ एवा- २८९
कल्पितकर्म्मा कश्चिदेवोपरमते कालं करोति । स पल्लपचितस्तु नराशिः सो धर्म्मादीनां द्वादशानां कल्पानां विमानानां च सवर्थ-
सिद्धांतानामन्यतमस्मिन् कल्पे विमाने वा देवत्वायोपपद्यते । देवत्वेनोपपद्यत इत्यर्थः । तत्रासौ धर्म्मादिषु कल्पेषु विमानेषु

वा सुकृतं कर्मपुण्यं तस्य फलं विपाकमनुभूयानुभूय स्थितिक्षयात्प्रच्युतो भगवदाचार्यादेशकुत्रियादौ मनुष्यजाताविह
कुलत्वादिषु शीलवत्सु सद्वेश्मसु विद्यामुक्तगुणं ज्ञानं विनयो ज्ञानादिः । विभवो धनधान्यादिविभवसंपत् विषयाः शब्दादयः
सर्वेषामेवैषां विस्तरः प्राचुर्यं विस्तरं च वविभूतिः क्रमेण प्रत्ययातिमनाप्य जन्म समधिगम्य पुनः सम्यग्दर्शनादिविशुद्धं
बोधिस्वरूपयोः बोधिमवाप्नोति ज्ञानचरणे बोधिशब्दवाच्ये समवाप्नोतीत्यर्थः । अनेनोक्तलक्षणेनक्रमाभ्यासानुबंधक्र-
मेण सुखपरंपरायुक्तेन परं प्रकर्षं त्रिर्जनित्वा मनुष्यो देवः पुनर्मनुष्य इति । एवं त्रीणि जन्मानि समवाप्य सम्यक्ज्ञानलाभा-
दृहितसंवरस्तपसा क्षपितकर्मराशिः सिध्यति सिद्धिर्हेत्वर्थ इत्युक्तं च । एवं संवरवर्म्मापिनद्धसम्यक्त्ववाहप्रविरूढः सज्ज्ञानमहा-
चापाध्यानादितपः शितष्टषत्कैः संयमरणाजिरस्थः क्षेत्राचमूः । संविधूय भव्यात्मा कर्मरिपून्हत्वा पवर्गराज्यश्रियं लभ-
ते । एवं कर्मोदयजैर्भावैः । कर्मक्षयोपशमजैश्च संसारमुवाचार्हन सिद्धिकर्मक्षयादेव । २ ज्ञानं सुमार्गदीपं सम्यक्त्वं तु त-
द्विप्रणाशं चारित्रमाश्रवद्वारं रुधयति । कर्माणि तु तपोग्निध । एतेन भवति सिद्धिः । सिद्धांतचतुष्टयेन जिनवचनेन
तु संवररहितस्य च सास्यान्न ज्ञानमात्रेण ॥ ५ इत्येकानसमेकद्वीपं विविधरूपमेषपातालं । अष्टाग्रं । द्विरयं चतुरावर्त्तं च
तुष्कलं त्रिमद्वावातं ऋदयं षड्वेगं चतुरशीतिनियतं मीसंसाराद्भुमात्मानावाचतुरंगयोत्तरति ७ प्रतिवाचको निजावार्थी
न्वयं द्विप्रकारमवाप्याविदयते । तत्रायं प्रवाजकात्वः । यः शिवश्रीर्नामवाचकः पितामहः ॥ संग्रहकारस्य तस्य शिष्योघोषनं-
दि क्षमाश्रमणस्तस्यायं संग्रहकारः शिष्यः संप्रतिवाचना वार्यान्वयो मुंडपादो नाम महावाचकः क्षमण सोस्यपितामहः संग्रहकारस्य
तस्य शिष्यो मूलनामा वाचकस्तस्यायं संग्रहकारकशिष्यः संजन्य तीय जन्मान्वयस्तन्नमाचष्टे न्यग्रोधिको नाम ग्रामस्तत्र जातेन
पाटलिपुत्रे कुसुमपुरनाम्नि विहरता कौभीषणिनेति । गोत्रकाल स्वातितनयेनेति पितुराख्यानं वात्सीसुतेनेति गोत्रेण नाम्ना
उमेति मातुराख्यानं संप्रदायाविच्छेदेनायातमर्हद्वचनं सम्यगवधार्य शारीरैर्मानसैश्च दुःखैरार्त्तं दुरागमोरेहिकसुखोप-
देशाप्रायैश्चैवन्तिभिः प्रमाणविघटनाया मक्षमैर्विहतमतिमुपहतविज्ञानमवलोक्य लोकम् । मुख्ये नागर वाचकेनेति
स्वशाखासूत्रकं तत्त्वार्थाधिगमाख्यं । शास्त्रं न समसत्वानुकंपया विरचितं । स्फुटार्थमुमास्वातिनेति । तदेतच्छास्त्रं जीवादित-
त्त्वाधिगमार्थयोव जो स्यते सूत्रेनार्थतश्चानुष्ठास्यति । तत्रोक्तं सोऽव्याबाधरवलक्षणमनंतमनुपमं परमार्थं मोक्षमचिरेण प्रा-
प्स्यतीति ॥ आसीदिह गणी क्षमाश्रमणेशापक्रमेणैवयो विद्वत्सु प्रतिभागुणेन जयिना प्रख्यातकीर्त्तिर्भृशं चोदाशीलव-
रत्नसमृद्धत निधिर्मोहार्थिनामर्द्धणी जङ्घालामलपुच्छके निजतपस्तेजोनिरभात्तं ॥ १ यत्नश्रितेश्च वचने पुस्तकनिरपे-
क्षं तं विमल शिष्यगणसंयदेह्यं जिनेंद्रवक्त्राद्विनिःक्रांतां ॥ २ तस्यानुस्मरवादिनिर्जयपदु सेहीद्भूरतानाम्ना प्रख्यातसि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

दृष्टदृष्टिवज्ञानाखिलार्थागमः शिष्यः शिष्यजनप्रियः प्रियहृतभाहारं चे ... याज्ञ्यानां शरणं भावोद्यपतनक्लेशार्दिता
नां नुविा निर्द्दतत्तमः संहरति ररविंकलशशांकसंस्थया । अद्यापि यस्य कीर्त्तिर्भ्रमति दिगंतान विश्रांता ॥४॥ शिष्यस्तस्य
चव राजि कशिरो रत्नप्रभाजालकाभासंगक्षुरितस्फुरित्नरवमणिप्रोन्नासिपादद्वयः । स्वामीति विजितमनामजगरे प्रसिजा
सां संपदा भास्वंतं नवनिर्जबोद्यनमतिर्विद्वज्जनाग्रेसरः ॥५॥ कृमयायुक्तो तज्जयास्समस्तशास्त्रार्थविन्सदाश्रमणः गणाधिप
गुणयोगाद्गुणाधिपत्यं चकारार्थ्यां ह्तत्त्वादरजोवयवः सज्ञागमस्रो सुखीकवडजाम्यः । तत्त्वार्थशास्त्रटीकामिमांय
भास्सिद्धसेनगणिः ॥७॥ अष्टादशसहस्राणि द्विशतेच तथापरे । अशीतिरधिका ह्यस्यां टीकायां श्लोकसंग्रहः ॥ छ ॥ ग्रं
थाग्रं ॥१८२८०॥ छ ॥ ॥श्री॥ शुभं भूयात् ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥